यो० । अप्रतिपूजिताः जामयः यानि गेहानि शपंति — कृत्या हतानि इव तानि समन्तः विनश्यंति ॥

भा० । ता० । तिरस्कारको प्राप्तहुई जामि (पत्नी—कन्या—पुत्रकीबहू) जिनकुलों को शाप देतीहैं अर्थात् इनका यह अनिष्टहो ऐसे कहतीहैं वे ऐसे चारोंओर से नष्टहोतेहैं जैसे अभिचार (मारनेकाप्रयोग) से हतेहुये नष्टहोतेहैं ५८ ॥

तस्मादेताःसदापूज्याभूषणाच्छादनाशनैः।भूतिकामैर्नरैर्नित्यंसत्कारेषूत्सवेषुच ५९ ॥

प० । तस्मात् एताः सदा पूज्याः भूषणाच्छादनाशनैः भूतिकामैः नरैः नित्यं सत्कारेषु उत्सवेषु च ॥

यो० । तस्मात् भूतिकामैः नरैः सत्कारेषु चपुनः उत्सवेषु — एताः भूषणाच्छादनाशनैः नित्यं पूज्याः ॥

भा० । ता० । जिससे अपनी वृद्धिकी कामना चाहनेवाले मनुष्य सत्कार (दीवालीआदि) में और उत्सव यज्ञोपवीत आदिमें भूषण वस्त्रआदिसे इनस्त्रियों को सदापूजें—(सत्कारकरें) ५९ ॥

संतुष्टोभार्ययाभर्त्ताभर्त्राभार्यातथैवच । यस्मिन्नेवकुलेनित्यंकल्याणंतत्रवैध्रुवम् ६० ॥

प०। संतुष्टः भार्यया भर्त्ता भर्त्रा भार्या तथा एव च यस्मिन् एव कुले नित्यं कल्याणं तत्र वै ध्रुवम् ॥

यो० । यस्मिन् एव कुले भार्यया भर्त्ता—नित्यं संतुष्टः चपुनः तथैव भर्त्रा भार्या नित्यं संतुष्टा वर्त्तते तत्र वै (निश्चयेन) ध्रुवं कल्याणं (भवति)

भा० । ता० । जिस कुल स्त्री से पति प्रसन्न रहताहै अर्थात् अन्य स्त्री के संग रत नहीं होता और पति से स्त्री प्रसन्न रहतीहै उसकुल में चिरकालतक कल्याण रहताहै—अर्थात् केवल स्त्री पुरुष में ही प्रसन्नता नहीं रहती किंतु पुत्र पौत्र आदि सन्तानभी श्रेय की भागी होतीहै ६० ॥

यदिहिस्त्रीनरोचेतपुमांसंनप्रमोदयेत् । अप्रमोदात्पुनःपुंसःप्रजननंनप्रवर्त्तते ६१ ॥

प० । यदि हि स्त्री न रोचेत् पुमांसं न प्रमोदयेत् अप्रमोदात् पुनः पुंसः प्रजननं न प्रवर्त्तते ॥

यो० । यदि स्त्री न रोचेत् (तर्हि) पुमांसं न प्रमोदयेत्—पुंसः पुनः अप्रमोदात् प्रजननं न प्रवर्त्तते ॥

भा० । ता० । यदि स्त्री वस्त्र और भूषण दीप्ति(शोभा)को प्राप्त न होय तो पुरुषकोभी प्रसन्न नहीं करसक्ती—फिर पुरुष की अप्रसन्नता से गर्भ का धारणभी नहींहोता ६१ ॥

स्त्रियांतुरोचमानायांसर्वंतद्रोचतेकुलम् । तस्यांत्वरोचमानायांसर्वमेवनरोचते ६२ ॥

प० । स्त्रियां तु रोचमानायां सर्वं तत् रोचते कुलम् तस्यां तु अरोचमानायां सर्वं एव न रोचते॥

यो० । स्त्रियांतु रोचमानायां सत्यां सर्वं तत्कुलं रोचते—तस्यां स्त्रियां अरोचमानायां सत्यां सर्वं एव कुलं न रोचते॥

भा० । ता० । जब स्त्री मंडन वस्त्र आदिसे कांतिवाली होतीहै अर्थात् पतिमें प्रीति और परपुरुषके संपर्कके त्यागसे तो वह सबकुल दीपताहै और पतिके द्वेषसे यदि स्त्री अरोचमान (उदासीन) होय तो परपुरुष के संपर्क से सबकुल मलीन होजाताहै ६२ ॥

कुविवाहैःक्रियालोपैर्वेदानध्ययनेनच । कुलान्यकुलतांयान्तिब्राह्मणातिक्रमेणच ६३ ॥

प० । कुविवाहैः क्रियालोपैः वेदानध्ययनेन च कुलानि अकुलतां यान्ति ब्राह्मणातिक्रमेण च॥

यो० । कुविवाहैः क्रियालोपैः चपुनः वेदानध्ययनेन—कुलानि अकुलतां यांति—(नीचाभवंतीत्यर्थः) ॥

भा० । ता० । आसुर आदि निंदित विवाह—जातकर्म आदि कर्म के त्याग—वेद के अध्ययन का अभाव और ब्राह्मणोंका अभोजन वा अवलंघनसे विख्यात कुलभी नीचकुल होजातेहैं ६३॥

शिल्पेनव्यवहारेणशूद्रापत्यैश्चकेवलैः । गोभिरश्वैश्चयानैश्चकृष्याराजोपसेवया ६४॥

प० । शिल्पेन व्यवहारेण शूद्रापत्यैः च केवलैः गोभिः अश्वैः च यानैः च कृष्या राजोपसेवया ॥

यो० । शिल्पेन—व्यवहारेण—केवलैः शूद्रापत्यैः गोभिः चपुनः अश्वैः चपुनः यानैः कृष्या—राजोपसेवया—(कुलानिविनश्यंति)—अग्रिमश्लोकेन अन्वयः ॥

भा० । ता० । चित्रकर्म आदि शिल्प से और व्याजपर रुपया देना आदि व्यवहार से—और केवल शूद्राकी सन्तानसे—गौ—घोड़े—यान (सवारी) खेती—और राजाकी सेवासे—अच्छे कुलभी शीघ्र नष्ट होजातेहैं ६४ ॥

अयाज्ययाजनैश्चैवनास्तिक्येनचकर्मणाम् ।
कुलान्याशुविनश्यन्तियानिहीनानिमन्त्रतः ६५ ॥

प० । अयाज्ययाजनैः च एव नास्तिक्येन च कर्मणां कुलानि आशु विनश्यंति यानि हीनानि मंत्रतः ॥

यो० । चपुनः अयाज्ययाजनैः चपुनः कर्मणां नास्तिक्येन — यानि मंत्रतः हीनानि तानि कुलानि आशु विनश्यंति॥

भा० । अयाज्य को यज्ञकराने—कर्मों की नास्तिकता—और वेदकी हीनता से कुल शीघ्र नष्ट होजातेहैं ॥

ता० । अयाज्यों (जिनको यज्ञ कराने का अधिकार नहीं है जैसे कि व्रात्य आदि) को यज्ञ कराने—अर्थात् श्रुति वा स्मृति में उक्तकर्मों के करने से और कर्मोंके फलके अभाव का निश्चय रूप नास्तिकतासे—और वेद अध्ययनकी हीनतासे उत्तम कुलभी शीघ्रही नष्ट होजातेहैं अर्थात् नीचकुल होजातेहैं—यहांपर विवाह के प्रकरण में क्रियाके लोप आदि की भी निंदाकीहै और निंदासे यह सूचितकिया कि ये सब निषिद्धकर्म नहीं करने ६५ ॥

मन्त्रतस्तुसमृद्धानिकुलान्यल्पधनान्यपि।कुलसंख्यांचगच्छन्तिकर्षन्तिचमहद्यशः६६॥

प० । मंत्रतः तु समृद्धानि कुलानि अल्पधनानि अपि कुलसंख्यां च गच्छंति कर्षंति च महत् यशः ॥

यो० । मंत्रतः समृद्धानि अल्पधनानि अपि कुलानि कुलसंख्यां गच्छंति चपुनः महत् यशः कर्षंति ॥

भा० । ता० । अब कुलोंकी निंदा के प्रसंग से कुलों की प्रशंसा के लिये कहतेहैं कि यद्यपि जगत् में यह प्रसिद्धहै कि धनसे कुल प्रसिद्धहोताहै तथापि अल्पधनवाले भी वेदाध्ययन आदिसे बढ़े (वेदके अर्थ का ज्ञान और कर्मों का करना आदि) हुई कुल उत्तम कुलों की गणनामें गिने जातेहैं और बड़ीख्याति (प्रसिद्धता) को प्राप्तहोतेहैं ६६ ॥

वैवाहिकेऽग्नौकुर्वीतगृह्यंकर्मयथाविधि । पंचयज्ञविधानंचपंक्तिंचान्वाहिकींगृही ६७ ॥

प० । वैवाहिके अग्नौ कुर्वीत गृह्यं कर्म यथाविधि पंचयज्ञविधानं च पंक्तिं च अन्वाहिकीं गृही ॥

यो० । गृही — गृह्यं कर्म — चपुनः पंचयज्ञविधानं — चपुनः अन्वाहिकीं पंक्तिं — वैवाहिके अग्नौ यथाविधि कुर्वीत ॥

भा० । यथाविधि शास्त्र के अनुसार गृहस्थी के कर्म—पांच यज्ञों की विधि और प्रतिदिन कर्तव्य पाक विवाहकी अग्नि में गृहस्थी करै ॥

ता० । विवाह का प्रकरण समाप्त हुआ—अब विवाह की अग्नि में करने योग्य महायज्ञ विधिकी जो प्रतिज्ञा कीथी उस महायज्ञ आदि के अनुष्ठान (करनेकी विधि) को कहते हैं—कि वैवाहिक अग्नि (जिसअग्निमें होमहोकर विवाह होताहै) अपने गृह्यसूत्रमें कहेहुये कर्म अर्थात् सायंकाल और प्रातःकाल होम और अष्टका आदिकर्म—और शास्त्रोक्त विधिके अनुसार अग्नि में करने योग्य पंचयज्ञांतर्गत बलि वैश्वदेवका अनुष्ठान और प्रतिदिन करने योग्य पाक गृहस्थी करै—६७ ॥

पञ्चसूनागृहस्थस्यचुल्लीपेषण्युपस्करः । कण्डनीचोदकुम्भश्चबध्यतेयास्तुवाहयन् ६८

प० । पंच सूनाः गृहस्थस्य चुल्ली पेषणी उपस्करः कण्डनी च उदकुम्भः च बध्यते याः तु वाहयन् ॥

यो० । गृहस्थस्य चुल्ली पेषणी (चक्की) उपस्करः (मार्जनी) कंडनी (मुसल ऊषल) उदकुम्भः (जलपात्र) एताः पंचसूनाः (हत्याः) भवंति याः वाहयन् गृहस्थी बध्यते ॥

भा० । ता० । जैसे पशुओं के मारने के स्थान को सूना कहतेहैं इसीप्रकार जीवों के बधका स्थान होनेसे गृहस्थी की ये पांच सूना होतीहैं कि चुल्ली-चक्की उपस्कर (मार्जनी) कण्डनी (मुसल और ऊषल) और जलका पात्र-इनपांचों को अपने गृहस्थके काम में लाताहुआ गृहस्थी बन्धन को प्राप्तहोता है ६८ ॥

तासांक्रमेणसर्वासांनिष्कृत्यर्थंमहर्षिभिः । पञ्चक्लृप्तामहायज्ञाःप्रत्यहंगृहमेधिनाम् ६९ ॥

प० तासां क्रमेण सर्वासां निष्कृत्यर्थं महर्षिभिः पंच क्लृप्ताः महायज्ञाः प्रत्यहं गृहमेधिनाम् ॥

यो० । तासां सर्वासां (सूनानां) क्रमेण निष्कृत्यर्थं महर्षिभिः गृहमेधिनां प्रत्यहं पंच महायज्ञाः क्लृप्ताः (रचिताः वा स्मृताः) ॥

भा० । उनपांच हत्याओंकी निवृत्तिके लिये महर्षियोंने गृहस्थियोंको प्रतिदिन पांच महायज्ञ करने कहे हैं ॥

ता० । क्रमसे उन चुल्ली आदि स्थानों में पैदाहुये पापके नाशके लिये गृहस्थियों को पांच महायज्ञ करने मनुआदि ने कहे हैं-मनुने इनपांचोंको हिंसा कहा और इनका प्रायश्चित्त कहा और पंचयज्ञ करनेवाले का इनकी हिंसा से दोष का अभाव कहेंगे अतएव ये पांचसूना पाप के कारण हैं और पांच महायज्ञ पापके नाशकहैं और प्रतिदिन यह कहने से यह सूचितकिया कि इनके पाप का नाश आवश्यक है इससे पांच महायज्ञ भी संध्या वन्दन के समान नित्य कर्म हैं ६९ ॥

अध्यापनंब्रह्मयज्ञःपितृयज्ञस्तुतर्पणम् । होमोदैवोबलिर्भौतोनृयज्ञोऽतिथिपूजनम् ७० ॥

प० । अध्यापनं ब्रह्मयज्ञः पितृयज्ञः तु तर्पणम् होमः दैवः बलिः भौतः नृयज्ञः अतिथिपूजनम् ॥

यो० । अध्यापनं ब्रह्मयज्ञः-तर्पणं पितृयज्ञः होमः दैवः (देवयज्ञः) बलिःभौतः (भूतयज्ञः) अतिथिपूजनं नृयज्ञः (मनुष्ययज्ञः मनुआदिभिः उक्तः ॥

भा० । ता० । पढ़ाना और पढ़ना ब्रह्मयज्ञ-और अन्न व जलसे पितरोंका तर्पण (तृप्ति) पितृयज्ञ-और होम देवयज्ञ-और बलिवैश्वदेव भूतयज्ञ-और अतिथि का पूजन मनुष्ययज्ञ-मनुआदिने कहा है-यहां अध्यापन आदिमें यज्ञशब्द और महाशब्द स्तुतिके लिये गौणहैं मुख्य नहीं ७० ॥

पञ्चैतान्योमहायज्ञान्नहापयतिशक्तितः । सगृहेऽपिवसन्नित्यंसूनादोषैर्नलिप्यते ७१ ॥

प० । पंच एतान् यः महायज्ञान् न हापयति शक्तितः सः गृहे अपि वसन् नित्यं सूनादोषैः न लिप्यते ॥

यो० । यः (द्विजः) एतान् पंच महायज्ञान् शक्तितः न हापयति – गृहे वसन् सः नित्यं सूनादोषैः न लिप्यते ॥

भा० । ता० । जो द्विज अपनी शक्तिके अनुसार इनपांच महायज्ञों को नहीं त्यागताहै घरमें बसता हुआभी वह द्विज सूना (हत्या) के दोषोंसे लिप्त नहींहोता अर्थात् उस द्विजको हत्या नहीं लगती ७१ ॥

देवतातिथिभृत्यानांपितॄणामात्मनश्चयः । ननिर्वपतिपञ्चानामुच्छ्वसन्नसजीवति ७२ ॥

प० । देवतातिथिभृत्यानां पितॄणां आत्मनः च यः न निर्वपति पंचानां उच्छ्वसन् न सः जीवति ॥

यो० । यः द्विजः पंचानां – देवतातिथिभृत्यानां – पितॄणां चपुनः आत्मनः न निर्वपति सः उच्छ्वसन् अपि न जीवति ॥

भा० । देवता–भूत–अतिथि–पितर–और आत्मा इनको जो द्विजनहीं देता वह श्वासलेता हुआ भी नहीं जीवता है ॥

ता० । देवता शब्द से भूतों कोभी लेना क्योंकि बलि के ग्रहण में वेभी देवता रूपही हैं–अर्थात् देवता और भूत और भृत्य (पालनेयोग्य पिता आदि) और पितर और अपनीआत्मा क्योंकि इसे श्रुतिमें आत्माकी भी सबसे रक्षाकही है–इससे आत्मा कोभी रक्षाकरनी–देवता आदि पांचों को जो अन्न नहीं देता वहश्वास लेताहुआ भी अपने जीनेके कार्य के न करने से नहीं जीता है–इस निंदा से इनको देना भी अवश्य करने योग्य है ७२ ॥

अहुतंचहुतंचैवतथाप्रहुतमेवच । ब्राह्म्यंहुतंप्राशितंचपञ्चयज्ञान्प्रचक्षते ७३ ॥

प० । अहुतं च हुतं च एव तथा प्रहुतं एव च ब्राह्म्यं हुतं प्राशितं च पंचयज्ञान् प्रचक्षते ॥

यो० । अहुतं – चपुनः हुतं – तथैव प्रहुतं – ब्राह्म्यंहुतं – चपुनः प्राशितं – (एतान्) पंचयज्ञान् (मुनयः) प्रचक्षते ॥

भा० । ता० । नाम शब्द से वाक्यका भेदहोताहै यह दिखानेके लिये इतर मुनियोंने रची पांच यज्ञोंकी इतरभी संज्ञा कहते हैं–अहुत १– हुत २–और प्रहुत ३–और ब्राह्म्यहुत ४–और प्राशित ५–इनको मुनि पंचयज्ञ कहतेहैं ७३ ॥

जपोऽहुतोहुतोहोमःप्रहुतोभौतिकोबलिः।ब्राह्म्यंहुतंद्विजाग्र्यार्चाप्राशितंपितृतर्पणम् ७४

प० । जपः अहुतः हुतः होमः प्रहुतः भौतिकः बलिः–ब्राह्म्यं हुतं द्विजाग्र्यार्चा–प्राशितं पितृतर्पणम् ॥

यो० । जपः अहुतः – होमः हुतः – भौतिकः बलिः प्रहुतः – द्विजाग्र्यार्चा ब्राह्म्यं हुतं – पितृतर्पणं प्राशितं भवतीतियोज्यम् सर्वत्र ॥

भा० । ता० । जप (ब्रह्मयज्ञ) को अहुत–और होम (देवयज्ञ) को हुत–और भूतों की बलि (भूतयज्ञ) को प्रहुत–और ब्राह्मणों में श्रेष्ठ की पूजा (मनुष्य यज्ञ) को ब्राह्म्यहुत–और पितरों के तर्पण (पितृयज्ञ)को प्राशित–मुनिकहतेहैं ७४ ॥

---

१ सर्वतएवात्मानं गोपायेत् ॥

स्वाध्यायेनित्ययुक्तःस्याद्दैवेचैवेहकर्मणि । दैवकर्मणियुक्तोहिबिभर्तीदंचराचरम् ७५ ॥

प० । स्वाध्याये नित्ययुक्तः स्यात् दैवे चै एवं इह कर्मणि दैवकर्मणि युक्तः हि बिभर्ति इदं चराचरम् ॥

यो० । द्विजः स्वाध्याये चपुनः दैवे कर्मणि इह (जगति) नित्ययुक्तः स्यात् — हि (यतः) दैवकर्मणि युक्तः (द्विजः) इदं चराचरं बिभर्ति ॥

भा० । ता० । यदि दारिद्र्य आदि दोषसे अतिथि के भोजन आदि कराने को असमर्थ हो तो स्वाध्याय (ब्रह्मयज्ञ) और दैवकर्म (होम) में नित्ययुक्त रहै क्योंकि दैवकर्म में युक्त (तत्पर) मनुष्य इस चराचर (स्थावरजंगम) जगत् की पालनाकरताहै ७५ ॥

अग्नौप्रास्ताहुतिःसम्यगादित्यमुपतिष्ठते । आदित्याज्जायतेवृष्टिर्वृष्टेरन्नंततःप्रजाः ७६

प० । अग्नौ प्रास्ता आहुतिः सम्यक् आदित्यं उपतिष्ठते—आदित्यात् जायते—वृष्टिः वृष्टेः अन्नं ततः प्रजाः ॥

यो० । अग्नौ सम्यक् प्रास्ता (दत्ता) आहुतिः आदित्यं उपतिष्ठते — आदित्यात् वृष्टिः वृष्टेः अन्नं — जायते ततः (अन्नात्) प्रजाः जायंते ॥

भा० । ता० । अग्निमें भलीप्रकार दीहुई आहुति सूर्यको प्राप्तहोतीहै क्योंकि सूर्य संपूर्णरसों को खींचताहै—और वह आहुतिकारस सूर्यकेद्वारा वृष्टिरूपहोजाता है और वृष्टि से अन्न होताहै और अन्न के उपभोगसे प्रजा उत्पन्नहोतीहै ७६ ॥

यथावायुंसमाश्रित्यवर्त्तन्तेसर्वजन्तवः । तथागृहस्थमाश्रित्यवर्त्तन्तेसर्वआश्रमाः ७७ ॥

प० । यथा वायुं समाश्रित्य वर्त्तन्ते सर्वजन्तवः तथा गृहस्थं आश्रित्य वर्त्तन्ते सर्वे आश्रमाः ॥

यो० । यथा वायुं समाश्रित्य सर्वजन्तवः वर्त्तन्ते तथा गृहस्थं आश्रित्य सर्वे आश्रमाः वर्त्तन्ते ॥

भा० । ता० । जैसे प्राणरूप वायु के आश्रयसे संपूर्ण प्राणी जीवतेहैं ऐसेही गृहस्थकेआश्रयसे संपूर्ण आश्रम वर्त्तते (निर्वाहकरते) हैं ७७ ॥

यस्मात्त्रयोऽप्याश्रमिणोज्ञानेनान्नेनचान्वहम् ।
गृहस्थेनैवधार्यन्तेतस्माज्ज्येष्ठाश्रमोगृही ७८ ॥

प० । यस्मात् त्रयः अपि आश्रमिणः ज्ञानेन अन्नेन च अन्वहम् गृहस्थेन एव धार्यंते तस्मात् ज्येष्ठाश्रमः गृही ॥

यो० । यस्मात् त्रयः अपि आश्रमिणः ज्ञानेन चपुनः अन्नेन अन्वहं गृहस्थेन एव धार्यंते तस्मात् गृही (गृहस्थी) ज्येष्ठाश्रमः (भवति) ॥

भा० । ता० । गृहस्थी को सब आश्रमियों का प्राण तुल्य वर्णन करतेहैं कि जिससे गृहस्थ से भिन्न तीनों आश्रमी-वेदके अर्थका व्याख्यान और अन्न दानके द्वारा गृहस्थसेही धारणकिये जातेहैं तिससे गृहस्थीही सबसे ज्येष्ठ बड़े आश्रमवाला है ७८ ॥

ससंधार्यःप्रयत्नेनस्वर्गमक्षयमिच्छता । सुखंचेहेच्छतानित्यंयोऽधार्योदुर्बलेन्द्रियैः७९॥

प० । सः संधार्यः प्रयत्नेन स्वर्गं अक्षयं इच्छता सुखं च इह इच्छता नित्यं यः अधार्यः दुर्बलेन्द्रियैः ॥

यो० । अक्षयं स्वर्गं इच्छता चपुनः इह सुखं इच्छता पुरुषेण प्रयत्नेन सः (गृहस्थः) नित्यं संधार्यः— यः दुर्बलेंद्रियैः अधार्यः (भवति) ॥

भा० । ता० । अक्षय स्वर्गकी और इसलोकमें स्त्रीसंभोग स्वादिष्ट अन्न भोजनआदि सुख की निरंतर इच्छाकरनेवाले गृहस्थीको उस ज्येष्ठ (उत्तम) गृहस्थाश्रमकी बड़े यत्नसे रक्षाकरनी क्योंकि जिसगृहस्थकी धारणा वे नहीं करसक्ते जिनकी इंद्रिय वशमें नहीं है ७९ ॥

ऋषयःपितरोदेवाभूतान्यतिथयस्तथा ।
आशासतेकुटुम्बिभ्यस्तेभ्यःकार्यंविजानता ८० ॥

प० । ऋषयः पितरः देवाः भूतानि अतिथयः तथा आशासते कुटुम्बिभ्यः तेभ्यः कार्यं विजानता ॥

यो० । ऋषयः पितरः देवाः भूतानि तथा अतिथयः तेभ्यः कुटुम्बिभ्यः आशासते — अतः विजानता गृहस्थेन कार्यम् ॥

भा० । ता० । ऋषि पितर देवता भूत और अतिथि ये सब उन कुटुम्बियोंसेही अन्न जल-आदिकी प्रार्थनाकरतेहैं—इससे बुद्धिमान् गृहस्थी यह करै कि ८० ॥

स्वाध्यायेनार्चयेदृषीन्होमैर्देवान्यथाविधि । पितॄन्श्राद्धैश्चनॄनन्नैर्भूतानिबलिकर्मणा ८१

प० । स्वाध्यायेन—अर्चयेत् ऋषीन् होमैः देवान् यथाविधि पितॄन् श्राद्धैः च नॄन् अन्नैः भूतानि बलिकर्मणा ॥

यो० । कर्त्तव्यमेवाह — स्वाध्यायेन ऋषीन्-होमैः देवान्-श्राद्धैः पितॄन्-अन्नैः नॄन् बलिकर्मणा भूतानि यथाविधि अर्चयेत् गृहस्थ इतिशेषः ॥

भा० । ता० । वेदके पठनपाठनसे ऋषियों का—होमोंसे देवताओं का—श्राद्धोंसे पितरोंका—अन्नोंसे मनुष्यों का—बलिवैश्वदेव से भूतोंका—यथाविधि (शास्त्रोक्तरीतिसे) पूजनकरे ८१ ॥

कुर्यादहरहःश्राद्धमन्नाद्येनोदकेनवा । पयोमूलफलैर्वापिपितृभ्यःप्रीतिमावहन् ८२ ॥

प० । कुर्यात् अहः अहः श्राद्धं अन्नाद्येन उदकेन वा पयोमूलफलैः वा अपि पितृभ्यः प्रीतिं आवहन् ॥

यो० । अन्नाद्येन-वा उदकेन-वा पयोमूलफलैः पितृभ्यः प्रीतिं आवहन गृहस्थः अहः अहः श्राद्धं कुर्यात् ॥

भा० । ता० । पितरोंकी प्रसन्नता चाहताहुआ गृहस्थी अन्न आदि—वा जल—वा दूध—मूल—और फलोंसे प्रतिदिन पार्वणश्राद्धकरै—यह श्राद्ध शब्द पार्वण श्राद्ध का बोधकहै ८२ ॥

एकमप्याशयेद्विप्रंपित्रर्थेपाञ्चयज्ञिके । नचैवात्राशयेत्किंचिद्वैश्वदेवंप्रतिद्विजम् ८३ ॥

प० । एकं अपि आशयेत् विप्रं पित्रर्थे पाञ्चयज्ञिके न च एव अत्र आशयेत् किंचित् वैश्वदेवं प्रति द्विजम् ॥

यो० । पित्र्ये पांचयज्ञिके एकं अपि विप्रं आशयेत् — अत्र वैश्वदेवंप्रति किंचित् अपि द्विजं नैव आशयेत् ॥

भा० । ता० । पितरोंके निमित्त किया जो पंचयज्ञोंका कर्म उसमें चाहै एक भी ब्राह्मणको जिमावे अर्थात् सामर्थ्यहोय तो बहुत भी ब्राह्मण जिमावे—और वैश्वदेवके लिये किसी एक ब्राह्मणको भी न जिमावे ८३ ॥

वैश्वदेवस्यसिद्धस्यगृह्येऽग्नौविधिपूर्वकम् ॥
आभ्यःकुर्याद्देवताभ्योब्राह्मणोहोममन्वहम् ८४ ॥

प० । वैश्वदेवस्य सिद्धस्य गृह्ये अग्नौ विधिपूर्वकं आभ्यः कुर्यात् देवताभ्यः ब्राह्मणः होमं अन्वहम् ॥

यो० । ब्राह्मणः गृह्ये अग्नौ सिद्धस्य वैश्वदेवस्य (अन्नस्य) विधिपूर्वकं होमं आभ्यः देवताभ्यः अन्वहं कुर्यात् ॥

भा० । सब देवताओंके अर्थ बनाये अन्नका होम—ब्राह्मण प्रतिदिन गृह्य अग्निमेंही इनदेवताओंके निमित्त प्रतिदिनकरै ॥

ता० । संपूर्ण देवताओंके अर्थ सिद्ध (बनाया) किये हुये अन्नका इन देवताओं (जो आगे कहेंगे) केनिमित्त प्रतिदिन विधिपूर्वक (अर्थात् पर्युक्षण आदिकरके) ब्राह्मण गृह्य(घरकी) अग्नि में होमकरै—यहां ब्राह्मणसे तीनों द्विजानिलेने क्योंकि तीनों काही प्रकरण है—और वैश्वदेव पदका यह अर्थ है कि विश्वे (संपूर्ण) जो देव उनके लिये बनाया जाय—अर्थात् अपने भोजनके लिये पाक न करै किन्तु देवताओं को देकर जो शेष बचै उसको ही आप भोजन करै ८४ ॥

अग्नेःसोमस्यचैवादौतयोश्चैवसमस्तयोः । विश्वेभ्यश्चैवदेवेभ्योधन्वन्तरयएवच ८५ ॥

प० । अग्नेः सोमस्य च एव आदौ तयोः च एव समस्तयोः विश्वेभ्यः च एव देवेभ्यः धन्वन्तरये एव च ॥

यो० । आदौ (प्रथमं) अग्नेः (अग्नये) चपुनः सोमस्य एव सोमाय चपुनः तयोः समस्तयोः—अग्निसोमाभ्यां चपुनः विश्वेभ्यः देवेभ्यः — चपुनः धन्वन्तरये — स्वाहेति सर्वत्र शेषः ॥

भा० । पहिले अग्नि—सोम—के और फिर अग्नि सोमके—फिर विश्वेदेवाओं के—फिर धन्वन्तरिके निमित्त प्रतिदिन द्विज होम करै ॥

ता० । बलिवैश्वदेवके होमका प्रकार लिखते हैं कि पहिले अग्नयेस्वाहा—सोमायस्वाहा देवताकी अपेक्षारहित (पृथक्)येदो होम करके फिर अग्निसोमाभ्यांस्वाहा यह समस्त (दोनों मिले)विश्वेदेवाओं के निमित्त—और फिर धन्वन्तरयेस्वाहा—धन्वन्तरिके निमित्तहोम करै—यहां इस कात्यायनऋषिके वचनसे कि स्वाहा कहकर अग्निमें आहुतिदे—सब देवताओं के आगे स्वाहा पद लगालेना अर्थात्—अग्नयेस्वाहा १—सोमायस्वाहा २—अग्निसोमाभ्यांस्वाहा ३—विश्वेभ्यः देवेभ्यःस्वाहा४—धन्वन्तरये स्वाहा ५—ये आहुति दे ८५ ॥

कुह्वैचैवानुमत्यैचप्रजापतयएवच । सहद्यावापृथिव्योश्चतथास्विष्टकृतेऽन्ततः ८६ ॥

प० । कुह्वै च एव अनुमत्यै च प्रजापतये एव च सह द्यावापृथिव्योः च तथा स्विष्टकृते अन्ततः ॥

---

१ स्वाहाकारप्रदानं होमः ॥

यो० । कुहवै चपुनः अनुमत्यै चपुनः प्रजापतये–चपुनः सहद्यावापृथिव्योः तथा अन्ततः स्विष्टकृते–स्वाहा एवंहोमं कुर्यात् सर्वत्रस्वाहेति योज्यम् ॥

भा० । कुहै स्वाहा और अनुमत्यैस्वाहा और धन्वंतरयेस्वाहा–सहद्यावाप्टथिवीभ्यांस्वाहा और अंतमें स्विष्टकृते स्वाहा–इसप्रकार होमकरै ॥

ता० । कुहै स्वाहा ६–अनुमत्यैस्वाहा ७–प्रजापतयेस्वाहा ८–सहद्यावाप्टथिवीभ्यांस्वाहा ९–अंतमें स्विष्टकृतेस्वाहा १० इसप्रकार होमकरै यद्यपि अन्य श्रुतियोंमें अग्निसहित (अग्नये-स्विष्टकृते स्वाहा) स्विष्टकृत स्वाहा लिखा है तथापि केवल स्विष्टकृत का प्रयोग भी अग्निकाही विशेषणही का बोधक है–और यद्यपि पढ़ने के क्रमसेही अंतमें स्विष्टकृत स्वाहाहोजाता तथा-पि यहां पर अंततः (अंतमें) कहना यह सूचित करता है कि अन्यस्मृतियों के होम में भी स्विष्टकृत स्वाहा अंतमें ही होताहै ८६ ॥

एवंसम्यग्घविर्हुत्वासर्वादिक्षुप्रदक्षिणम्।इन्द्रान्तकाप्पतीन्दुभ्यःसानुगेभ्योबलिंहरेत्८७

प० । एवं सम्यक् हविः हुत्वा सर्वदिक्षु प्रदक्षिणं इन्द्रान्तकाप्पतीन्दुभ्यः सानुगेभ्यः बलिं हरेत् ॥

यो० । एवं सम्यक् हविः हुत्वा सानुगेभ्यः इन्द्रान्तकाप्पतीन्दुभ्यः सर्वदिक्षु प्रदक्षिणं (यथास्यात्तथा) बलिं हरेत् ॥

भा० । इसप्रकार सावधानी से होमोंको करके पूर्वआदि चारों दिशाओंमें अनुगोंसहित इन्द्र–यम–वरुण–चन्द्र इनको प्रदक्षिण क्रम (पूर्व–दक्षिण–पश्चिम–उत्तर दिशा) से बलिदे ॥

ता० । इस प्रकार से भलीप्रकार (निश्चल मनसे देवताओंके ध्यानपूर्वक) होमकरके पूर्व आदि चारों दिशाओं में सानुग (अनुयायियोंसहित) इन्द्र–यम–वरुण–चन्द्र–इनचारों देव-ताओं को प्रदक्षिण क्रम से बलिदे अर्थात् सानुगाय इन्द्रायनमः प्राच्यांदिशि–सानुगाययमाय नमः दक्षिणस्यांदिशि–सानुगायवरुणायनमः पश्चिमायांदिशि–सानुगायसोमायनमः उत्तरस्यां दिशि–यद्यपि देवता तो शब्दसे भी प्रतीत होसके थे इससे अन्तक–अप्पति–इंदु शब्दही होम दिखाने थे तथापि बहृचके इस गृह्यसूत्रमें यम यमके पुरुष–वरुण वरुणके पुरुष–सोम सोमके पुरुषोंको प्रति दिशामें बलिदेना लिखाहै इससे पूर्वोक्त प्रयोग भी ठीक हैं ८७ ॥

मरुद्भ्यइतितुद्वारिक्षिपेदप्स्वद्भ्यइत्यपि । वनस्पतिभ्यइत्येवंमुशलोलूखलेहरेत् ८८

प० । मरुद्भ्यः इति तु द्वारि क्षिपेत् अप्सु अद्भ्यः इति अपि वनस्पतिभ्यः इति एवं मुशलो-लूखले हरेत् ॥

यो० । मरुद्भ्योनमः इत्युच्चार्य द्वारि – अद्भ्योनमः इत्युच्चार्य अप्सु – वनस्पतिभ्योनमःइत्युच्चार्यमुशलोलूखले बलिंहरेत् सर्वत्र नम इतिशेषः ॥

भा० । मरुद्भ्योनमः इससे द्वारपर–अद्भ्योनमः इससे जलोंमें–वनस्पतिभ्योनमः इससे मुशल और ऊखलमें बलिदे ॥

ता० । मरुद्भ्योनमः इसमंत्रसे द्वारपर–अद्भ्योनमः इसमंत्र से जलोंमें–वनस्पतिभ्योनमः इसमंत्रसे मुशल और ऊखलमें बलिदे अर्थात् जहां मुशल और ऊखलका स्थानहो वहांदे यहां मुशल और ऊखलद्वन्द्वसे पढ़ेहैं इससे दोनों जहां रक्खेरहतेहों वहां कोई सेकीजगह एकबलिदे

अर्थात् पृथक् २ बलि नदे क्योंकि गौणउद्देश्य के अनुरोध से प्रधान बलिकर्मकी आवृत्ति का अ-योगहै ८८ ॥

उच्छीर्षकेश्रियैकुर्याद्भद्रकाल्यैचपादतः।ब्रह्मवास्तोष्पतिभ्यांतुवास्तुमध्येबलिंहरेत्८९॥

प० । उच्छीर्षके श्रियै कुर्यात् भद्रकाल्यै च पादतः ब्रह्मवास्तोष्पतिभ्यां तु वास्तुमध्ये बलिं हरेत् ॥

यो० । उच्छीर्षके श्रियै भद्रकाल्यै पादतः (वास्तुपादे) तुपुनः ब्रह्मवास्तोष्पतिभ्यां वास्तुमध्ये बलिं हरेत् (दद्यात्)

भा० । श्रियैनमः इसमंत्र से वास्तु (घर) पुरुष के शिरकीजगह—भद्रकाल्यैनमः इसमंत्र से पादोंमें—और ब्रह्मणेनमः और वास्तोष्पतयेनमः इनदोमंत्रों से वास्तुके मध्यमें बलिदे ॥

ता० । वास्तुपुरुषके शिरके प्रदेश (ऐशानदिशा) में श्रियैनमः इसमंत्रसे श्री (लक्ष्मी) को और पाददेश (नैर्ऋत) दिशा में भद्रकाल्यैनमः इसमंत्र से भद्रकाली को और कोई ऋषि तो यहकहतेहैं कि उच्छीर्षकपदसे गृहस्थकी शय्याका जो शिरकाभूभाग और पादशब्दसे उसका चरणकाभाग लेते हैं—और ब्रह्मणेनमः वास्तोष्पतयेनमः इसमंत्र से घर के मध्य में ब्रह्मा और वास्तोष्पति को—बलिदे यद्यपि ब्रह्मा और वास्तोष्पति द्वंद्वनिर्देशसे पढ़े हैं तथापि पृथक् २ ही देवताहैं क्योंकि जहां द्वंद्वमें मिलेही देवताहोतेहैं वहां सहआदि शब्दोंका पढ़तेहैं जैसे सहद्यावा पृथिव्योश्च—यह लिखाहै ८९ ॥

विश्वेभ्यश्चैवदेवेभ्योबलिमाकाशउत्क्षिपेत्।दिवाचरेभ्योभूतेभ्योनक्तंचारिभ्यएवच९०॥

प० । विश्वेभ्यः च एवं देवेभ्यः बलिं आकाशे उत्क्षिपेत् दिवाचरेभ्यः भूतेभ्यः नक्तंचारिभ्यः एवं च ॥

यो० । चपुनः विश्वेभ्यः देवेभ्यः—दिवाचरेभ्यः भूतेभ्यः—नक्तंचारिभ्यः भूतेभ्यः आकाशे बलिं उत्क्षिपेत् (ऊर्ध्वं कृत्वा बलिंदद्यात्) ९० ॥

भा० । आकाश में विश्वेदेवा और दिवाचर और रात्रिञ्चर भूतोंको बलि दे ॥

ता० । विश्वेभ्यो देवेभ्योनमः यह मन्त्र पढ़कर विश्वेदेवाओं को और दिवाचरेभ्यो भूतेभ्यो नमः नक्तंचारिभ्यो भूतेभ्योनमः यह मन्त्र पढ़कर दिवाचारीभूतों को और नक्तंचारी भूतों को गृहके आकाशमें बलि दे अर्थात् दिनमें बलि वैश्वदेव करने में दिवाचारी भूतोंको और रात्रिमें बलिवैश्व करने में नक्तंचारी भूतोंको बलि दे ९० ॥

पृष्ठवास्तुनिकुर्वीतबलिंसर्वात्मभूतये।पितृभ्योबलिशेषंतुसर्वंदक्षिणतोहरेत् ९१ ॥

प० । पृष्ठवास्तुनि कुर्वीत बलिं सर्वात्मभूतये पितृभ्यः बलिशेषं तु सर्वं दक्षिणतः हरेत् ॥

यो० । सर्वात्मभूतये पृष्ठवास्तुनि बलिं कुर्वीत—तुपुनः सर्वं बलिशेषं पितृभ्यः दक्षिणतः (दक्षिणादिशि) हरेत् ॥

भा० । वास्तु के पीठभाग में सर्वात्मभूतयेनमः इसमंत्रसे बलिदे और पूर्वोक्त बलियोंसे बचे हुये अन्नको पितृभ्योनमः दक्षिणदिशामें दे ॥

ता० । घरके ऊपर जो घर (अट्टा) उसे पृष्ठवास्तु कहते हैं—अथवा बलिदेनेवालेकी पीठकी भूमिको—वहां सर्वात्मभूतयेनमः इसमंत्र से बलिदे—और उक्त बलिदेनेसे शेष (बचे) सम्पूर्ण

अन्नको दक्षिणदिशामें दक्षिणको मुखकर स्वधापितृभ्योनमः इसमंत्र से बलिदे और यह बलि अपसव्यहोकरदे—क्योंकि इसगृह्य सूत्रसे यही प्रतीत होताहै ९१ ॥

शुनांचपतितानांचश्वपचांपापरोगिणाम् । वायसानांकृमीणांचशनकैर्निर्वपेद्भुवि ९२ ॥

प० । शुनां चं पतितानां चं श्वपचां पापरोगिणां वायसानां कृमीणां चं शनकैः निर्वपेत् भुंवि ॥

यो० । शुनां चपुनः पतितानां—श्वपचां—पापरोगिणां—वायसानां—चपुनः कृमीणां शनकैः भुवि (बलिं) निर्वपेत् ॥

भा० । ता० । अन्य सम्पूर्ण अन्नको निकासकर श्वभ्योनमः पतितेभ्योनमः श्वपग्भ्योनमः पापरोगिभ्योनमः वायसेभ्योनमः कृमिभ्योनमः इनछःमंत्रोंसेभूमिपर शनैः२(जैसेधूलमें न मिले) बलिदे ९२ ॥

एवंयःसर्वभूतानिब्राह्मणोनित्यमर्चति । सगच्छतिपरंस्थानंतेजोमूर्त्तिपथर्जुना ९३ ॥

प० । एवं यः सर्वभूतानि ब्राह्मणः नित्यं अर्चति सः गच्छति परं स्थानं तेजोमूर्त्तिपथा ऋजुना ॥

यो० । यः ब्राह्मणः एवं सर्वभूतानि नित्यं अर्चति सः ऋजुना तेजोमूर्त्तिपथा परं स्थानं गच्छति ॥

भा० । इसप्रकार जो ब्राह्मण सबभूतोंको नित्य पूजताहै वह प्रकाशमान कोमलमार्ग होकर परमस्थानको प्राप्तहोता है ॥

ता० । इस उक्तप्रकार से जो ब्राह्मण अन्नदानआदि से सम्पूर्णभूतों को नित्यपूजता है वह तेजोमूर्त्ति (प्रकाशमान) सीधेमार्ग (अर्चिरादि) मार्ग से परमस्थान (ब्रह्म) को प्राप्तहोता है अर्थात् ब्रह्ममें लीनहोताहै क्योंकि ज्ञान और कर्मसेही मोक्षप्राप्ति होतीहै—और जहां तेजोमूर्त्तिः-यह विसर्गसहित पाठहै वहां ब्राह्मण का विशेषण है अर्थात् प्रकृष्ट ब्रह्मज्ञान स्वभाव होकर वह ब्राह्मण ब्रह्ममें लीनहोताहै ९३ ॥

कृत्वैतद्बलिकर्मैवमतिथिंपूर्वमाशयेत् । भिक्षांचभिक्षवेदद्याद्विधिवद्ब्रह्मचारिणे ९४ ॥

प० । कृत्वा एतत् बलिकर्म एवं अतिथिं पूर्वं आशयेत् भिक्षां चं भिक्षवे दद्यात् विधिवत् ब्रह्मचारिणे ॥

यो० । एवं एतद्बलिकर्म कृत्वा पूर्वं अतिथिं आशयेत् चपुनः ब्रह्मचारिणे भिक्षवे विधिवत् भिक्षां दद्यात् ॥

भा० । इस बलि वैश्वदेव कर्मको करके सब भोक्ताओंसे पहिले अतिथिको जिमावे और ब्रह्मचारी भिक्षुकको विधिसे भिक्षादे ॥

ता० । इसपूर्वोक्त प्रकार बलि वैश्वदेवकर्म को करके घरके मनुष्योंसे पहिले अतिथिको भोजन करावे और ब्रह्मचारी—संन्यासी—वा गृहस्था—भिक्षुक (भिखारी) को विधिसे (स्वस्तिआदि कहकर) भिक्षादे क्योंकि इस गौतमऋषि स्वस्तिकहकर पीछेही भिक्षादेनाकहा है—और भिक्षाभी इस शातातपऋषि के वचनसे एकग्रास प्रमाणकी होती है यदि शक्तिहोय तो अधिक भी देय ९४ ॥

---

१ स्वधापितृभ्यइतिप्राचीनावीतीशेषंदक्षिणानिनयेत् ॥

२ स्वस्तिवाच्यभिक्षादानमप्पूर्वम् ॥

३ ग्रासमात्राभवेद्भिक्षा ॥

यत्पुण्यफलमाप्नोतिगांदत्वाविधिवद्गुरोः।तत्पुण्यफलमाप्नोतिभिक्षांदत्वाद्विजोगृही९५

प० । यत् पुण्यफलं आप्नोति गां दत्वा विधिवत् गुरोः तत् पुण्यफलं आप्नोति भिक्षां दत्वा द्विजः गृही ॥

यो० । गृही द्विजः गुरोः विधिवत् गां दत्वा यत् पुण्यफलं आप्नोति तत् पुण्यफलं भिक्षां दत्वा आप्नोति ॥

भा० । ता० । गृहस्थी द्विज विधि (सोनेकेसींग आदि) से गुरुको गौ देकर जिस पुण्यफलको प्राप्तहोताहै उसी पुण्यफलको भिक्षाके दानसे प्राप्तहोताहै ९५ ॥

भिक्षामप्युदपात्रंवासत्कृत्यविधिपूर्वकम् । वेदतत्त्वार्थविदुषेब्राह्मणायोपपादयेत ९६ ॥

प० । भिक्षां अपि उदपात्रं वा सत्कृत्य विधिपूर्वकं वेदतत्त्वार्थविदुषे ब्राह्मणाय उपपादयेत् ॥

यो० । भिक्षां अपि —वा उदपात्रं विधिपूर्वकं सत्कृत्य वेदतत्त्वार्थविदुषे ब्राह्मणाय गृहस्थी उपपादयेत् ॥

भा० । ता० । अधिक अन्नके अभावमें व्यंजन आदिसे सत्कारकरके ग्रासभर भिक्षा और उसके भी अभाव में जलकाभरा पात्र फल और फूल आदिसे सत्कारकरके वेदके यथार्थ अर्थके ज्ञाता ब्राह्मण विधिपूर्वक (स्वस्तिकहो यह कहाकर) दे ९६ ॥

नश्यन्तिहव्यकव्यानिनराणामविजानताम्।भस्मीभूतेषुविप्रेषुमोहाद्दत्तानिदातृभिः९७

प० । नश्यन्ति हव्यकव्यानि नराणां अविजानताम् भस्मीभूतेषु विप्रेषु मोहात् दत्तानि दातृभिः ॥

यो० । भस्मीभूतेषु विप्रेषु मोहात् दातृभिः दत्तानि हव्यकव्यानि अविजानतां नराणां नश्यन्ति ॥

भा० । ता० । वेदका अध्ययन और वेदके अर्थोंकाज्ञान और वेदोक्त कर्मोंका करना इनसे शून्य भस्मरूप ब्राह्मणोंको मोहसे दिये अज्ञानी मनुष्योंके हव्य और कव्य नष्टहोजातेहैं—अर्थात् निष्फल होतेहैं ९७ ॥

विद्यातपःसमृद्धेषुहुतंविप्रमुखाग्निषु । निस्तारयतिदुर्गाच्चमहतश्चैवकिल्बिषात् ९८ ॥

प० । विद्यातपःसमृद्धेषु हुतं विप्रमुखाग्निषु निस्तारयति दुर्गात् च महतः च एव किल्बिषात् ॥

यो० । विद्यातपः समृद्धेषु विप्रमुखाग्निषु हुतं दुर्गात् चपुनः महतः किल्बिषात् निस्तारयति ॥

भा० । ता० । विद्या और तप और तेजसे युक्त ब्राह्मणोंके मुखरूप अग्नियोंमें होमकिया पदार्थ इसलोकमें दुस्तर व्याधि शत्रु राजाकी पीडा आदि दुःखसे और परलोकमें पाप (नरक) से तारताहै ९८ ॥

संप्राप्तायत्वातिथयेप्रदद्यादासनोदके । अन्नंचैवयथाशक्तिसत्कृत्यविधिपूर्वकम् ९९ ॥

प० । संप्राप्ताय तु अतिथये प्रदद्यात् आसनोदके अन्नं च एव यथाशक्ति सत्कृत्य विधिपूर्वकम् ॥

यो० । गृही संप्राप्ताय अतिथये आसनोदके चपुनः यथाशक्ति अन्नं सत्कृत्य विधिपूर्वकं प्रदद्यात् ॥

भा० । ता० । स्वयंप्राप्त (आये) हुये अतिथिको आसन जल और यथाशक्ति अन्न विधिपूर्वक सत्कारकरके दे अर्थात् स्वस्तिवाचन कहाकर अन्न आदिको अर्पणकरै ९९ ॥

शिलानप्युञ्छतोनित्यंपञ्चाग्नीनपिजुह्वतः।सर्वंसुकृतमादत्तेब्राह्मणोऽनर्चितोवसन् १००

प० । शिलान् अपि उञ्छतः नित्यं पंचाग्नीन् अपि जुह्वतः सर्वं सुकृतं आदत्ते ब्राह्मणः अन-र्चितः वसन् ॥

यो० । अनर्चितः वसन् सन् ब्राह्मणः शिलान् अपि उञ्छतः पंचाग्नीन् अपि नित्यं जुह्वतः (गृहस्थस्य) सर्वं सुकृतं आदत्ते (गृह्णाति) ॥

भा० । शिलोञ्छहै वृत्ति जिसकी और पंचाग्नियोंमें होमकरतेहुये भी गृहस्थीके संपूर्ण पुण्य को अपूजित वसताहुआ ब्राह्मण ग्रहणकरलेताहै ॥

ता० । कटेहुये खेतमें शेष (बचे) हुये अन्नोंको शिलकहतेहैं उनको भी उञ्छतेहुये अर्थात् अपनी वृत्तिके संयममें युक्त और आहवनीय–गार्हपत्य–दक्षिणाग्नि–आवसथ्य और सभ्य (शीतके दूरकरनेको जो प्रज्वलितकीजातीहै) इन पांचों अग्नियोंमें प्रतिदिन करतेहुये गृहस्थी के घरमें अपूजित अर्थात् असत्कारको प्राप्तहुआ ब्राह्मण (अतिथि) संपूर्ण सुकृत (पुण्य) को ग्रहणकरताहै अर्थात् वृत्तिके संकोचसे पंचाग्निके होमका फल उस गृहस्थीको नहींमिलता जि-सने अतिथि की पूजा न कीहो–इससे अतिथिका सत्कार अवश्यसेवकरै १०० ॥

तृणानिभूमिरुदकंवाक्चतुर्थीचसूनृता । एतान्यपिसतांगेहेनोच्छिद्यन्तेकदाचन १०१ ॥

प० । तृणानि भूमिः उदकं वाक् चतुर्थी च सूनृता एतानि अपि सतां गेहे न उच्छिद्यन्ते कदाचन ॥

यो० । तृणानि भूमिः उदकं—चपुनः चतुर्थी सूनृतावाक् एतानि अपि सतांगेहे कदाचन न उच्छिद्यन्ते ॥

भा० । ता० । तृण (आसन वा शय्या) भूमि–जल अर्थात् पादप्रक्षालन वा स्नानकेलिये जलको देना–और चौथी सत्यवाणी ये सत्पुरुषोंके घरमें कभी भी नष्ट नहींहोतीं अर्थात् अतिथि के सत्कारके लिये सदैव विद्यमान रहती हैं अर्थात् अन्न आदि देने का सामर्थ्य न होय तो इन को तो अवश्यमेव दे १०१ ॥

एकरात्रंतुनिवसन्नतिथिर्ब्राह्मणःस्मृतः ॥
अनित्यंहिस्थितोयस्मात्तस्मादतिथिरुच्यते १०२ ॥

प० । एकरात्रं तु निवसन् अतिथिः ब्राह्मणः स्मृतः अनित्यं हि स्थितः यस्मात् तस्मात् अ-तिथिः उच्यते ॥

यो० । एकरात्रं निवसन् ब्राह्मणः स्मृतः हि (यतः) यस्मात् अनित्यं स्थितः तस्मात् अतिथिः (मन्वादिभिः) उच्यते ॥

भा० । ता० । अप्रसिद्ध अतिथि शब्द का लक्षण कहतेहैं–कि एकही रात्रि जो पराये घर में वसे उसे अतिथि कहतेहैं जिससे जिसकी स्थिति अनित्यहो अर्थात् दूसरी तिथि न हो उसे अतिथि कहतेहैं १०२ ॥

नैकग्रामीणमतिथिंविप्रंसाङ्गतिकंतथा। उपस्थितंगृहेविद्याद्भार्यायत्राग्नयोऽपिवा १०३॥

प० । न एकग्रामीणं अतिथिं विप्रं साङ्गतिकं तथा उपस्थितं गृहे विद्यात् भार्या यत्र अग्नयः अपि वा ॥

यो० । यत्र गृहे भार्या (स्त्री) अग्नयः अपि संति तस्मिन् गृहे उपस्थितं एकग्रामीणं तथा साङ्गतिकं अतिथिं न विद्यात् ॥

भा० । ता० । जो एकही ग्रामका निवासीहो और जो परिहास विचित्रकथा आदिरूप संगति से वृत्ति (जीविका) चाहताहो—भार्या और अग्निवाले घरमें प्राप्तहुये भी ऐसे अतिथिको चाहे वह वैश्वदेव कालके समयमें भी आवे तोभी अतिथि न जाने अर्थात् उसका अतिथि के समान सत्कार न करे १०३ ॥

उपासतेयेगृहस्थाःपरपाकमबुद्धयः। तेनतेप्रेत्यपशुतांव्रजन्त्यन्नादिदायिनाम् १०४ ॥

प० । उपासते ये गृहस्थाः परपाकं अबुद्धयः तेन ते प्रेत्य पशुतां व्रजंति अन्नादिदायिनां ॥

यो० । अबुद्धयः ये गृहस्थाः परपाकं उपासते (भुंजते) (तेनपरान्नभोजनेन) ते प्रेत्य अन्नादिदायिनां पशुतां व्रजंति ॥

भा० । ता० । आतिथ्य के लोभसे जो गृहस्थी अन्य ग्रामों में जाकर पराये अन्नको खाते हैं वे मरनेके पीछे अन्नआदि देनेवालोंके पशुहोतेहैं—तिससे गृहस्थी परपाकका भोजन न करे१०४॥

अप्रणोद्योऽतिथिःसायंसूर्योढोगृहमेधिना ॥
कालेप्राप्तस्त्वकालेवानास्यानश्नन्गृहेवसेत् १०५ ॥

प० । अप्रणोद्यः अतिथिः सायं सूर्योढः गृहमेधिना काले प्राप्तः तु अकाले वा न अस्य अनश्नन् गृहे वसेत् ॥

यो० । गृहमेधिना सूर्योढः अतिथिः सायं अप्रणोद्यः काले प्राप्तः वा अकाले प्राप्तः अतिथिः अस्य (गृहमेधिनः) गृहे अनश्नन (अभुंजन) सन न वसेत् ॥

भा० । सूर्य के छिपनेपर सायंकालको आये अतिथिको गृहस्थी नाहीं न करे और भोजन के समय वा असमयपर आया अतिथि गृहस्थीकेघरमें भोजनको न करताहुआ न वसे अर्थात् गृहस्थी अतिथि को अवश्यमेव भोजन दे ॥

ता० । सूर्यने ऊढ (प्राप्तकिया) अर्थात् दूसरे बलिवैश्वदेव के समय रात्रिको अपनेघरआये अतिथिका गृहस्थी प्रत्याख्यान (विडारना) न करे क्योंकि वह अतिथि रात्रिको दूसरी जगह नहीं जासक्ता—और चाहे वह असमय (भोजन के पीछे) और चाहे समय (भोजन के समय) में प्राप्तहो परन्तु इस गृहस्थी के घरमें भोजनको न करताहुआ न वसे अर्थात् गृहस्थी अतिथि को अवश्यमेव भोजनदे क्योंकि इसविष्णुपुराण से उसके प्रत्याख्यानमें अधिक प्रायश्चित्त है कि दिनके अतिथि के विमुखकरनेमें जो पापहोता है उससे आठगुणा पाप सूर्य के छिपने के समय अतिथि के विमुख होनेपर होताहै—गोविंदराजने तो इसका यह अभिप्रायकहाहै कि निषिद्ध अतिथि भी संध्या के समय आवे तो प्रत्याख्यान करने योग्य नहीं है १०५ ॥

---

१ दिवातिथौ तु विमुखे गते यत्पातकं नृप तदेवाष्टगुणं प्रोक्तं सूर्योढे विमुखेगते ॥

नवैस्वयंतदश्नीयादतिथिंयन्नभोजयेत्।धन्यंयशस्यमायुष्यंस्वर्ग्यंवातिथिपूजनम्१०६

प०। न वै स्वयं तत् अश्नीयात् अतिथिं यत् न भोजयेत् धन्यं यशस्यं आयुष्यं स्वर्ग्यं वा अतिथिपूजनम् ॥

यो०। यत् (वस्तु) अतिथिं न भोजयेत् तत् स्वयं वै अपि न अश्नीयात् — वा (यतः) अतिथिपूजनं धन्यं यशस्यं आयुष्यं स्वर्ग्यं (भवति) ॥

भा०। ता०। जो दधि घृत आदि उत्कृष्टपदार्थ अतिथिको न जिमावे उसको स्वयंभी भोजन न करे यदि किसी पदार्थको अतिथि नाहीं करदे तो भोजन करले क्योंकि अतिथि का पूजन धन—यश—अवस्था और स्वर्ग इनका हितहै अथवा कारणहै १०६ ॥

आसनावसथौशय्यामनुव्रज्यामुपासनाम्।उत्तमेषूत्तमंकुर्याद्धीनेहीनंसमेसमम्१०७॥

प०। आसनावसथौ शय्यां अनुव्रज्यां उपासनाम् उत्तमेषु उत्तमं कुर्य्यात् हीने हीनं समे समम् ॥

यो०। आसनावसथौ — शय्यां अनुव्रज्यां — उपासनां उत्तमेषु उत्तमं — हीने हीनं समे समं कुर्यात् ॥

भा०। ता०। आसन (पीठ वा चर्म) आवसथ (विश्राम का स्थान) शय्या (खाट) अनुव्रज्या (पीछेचलना) उपासना (सेवा) इन सबको यदि बहुत अतिथिहोयँ तो उत्तम अतिथि में उत्तम और मध्यममें मध्यम—हीन(छोटा)में हीनकरे अर्थात् सबका समान न करे१०७॥

वैश्वदेवेतुनिर्वृत्तेयद्यन्योऽतिथिराव्रजेत्।तस्याप्यन्नंयथाशक्तिप्रदद्यान्नबलिंहरेत् १०८

प०। वैश्वदेवे तु निर्वृत्ते यदि अन्यः अतिथिः आव्रजेत् तस्य अपि अन्नं यथाशक्ति प्रदद्यात् न बलिं हरेत् ॥

यो०। वैश्वदेवे निर्वृत्तेसति यदि अन्यः अतिथिः आव्रजेत् — तस्य अपि यथाशक्ति अन्नं प्रदद्यात् — बलिं न हरेत् पुनः पाकेपि बलिवैश्वदेवं न कुर्यादित्यर्थः ॥

भा०। बलि वैश्वदेव करने के अनन्तर यदि अन्य अतिथि आजाय तो उसकोभी यथाशक्ति फिर पाककरके अन्न दे परंतु फिर बलिवैश्वदेव न करे ॥

ता०। एक अतिथिके भोजनपर्य्यन्त बलिवैश्वदेव किये पीछे यदि दूसरा अतिथि आजाय तो फिर पाकबनाकर उसकोभी अपनी शक्ति के अनुसार अन्न दे और उस अन्नमें से फिर बलि वैश्वदेव न करे—यहां पर बलिवैश्वदेवके निषेध से यह जानागया कि बलिवैश्वदेव कुछ अन्न का संस्कार कर्त्ता नहींहै क्योंकि जो वैश्वदेव अन्न का संस्कारक होता तो अतिथिको असंस्कृत अन्नको कैसे जिमावे १०८ ॥

नभोजनार्थंस्वेविप्रःकुलगोत्रेनिवेदयेत्।भोजनार्थंहितेशंसन्वान्ताशीत्युच्यतेबुधैः१०९

प०। न भोजनार्थं स्वे विप्रः कुलगोत्रे निवेदयेत् भोजनार्थं हि ते शंसन् वान्ताशी इति उच्यते बुधैः ॥

यो०। विप्रः भोजनार्थं स्वे कुलगोत्रे न निवेदयेत् — हि (यतः) भोजनार्थं ते (कुलगोत्रे) शंसन् विप्रः बुधैः वांताशी इति उच्यते ॥

भा० । ता० । ब्राह्मण भोजनलिये अपने कुल और गोत्र का न कहै क्योंकि भोजन के लिये कुल और गोत्रको कहतेहुये ब्राह्मणको पण्डितजन वांताशी कहते हैं अर्थात् वमनकिये पदार्थ को भक्षणकरनेवाला कहतेहैं १०९ ॥

नब्राह्मणस्यत्वतिथिर्गृहेराजन्यउच्यते । वैश्यशूद्रौसखाचैवज्ञातयोगुरुरेवच ११० ॥

प० । न ब्राह्मणस्य तु अतिथिः गृहे राजन्यः उच्यते वैश्यशूद्रौ सखा च एव ज्ञातयः गुरुः एव च ॥

यो० । ब्राह्मणस्यगृहे राजन्यः(क्षत्रियः)अतिथिः बुधैः) न उच्यते — वैश्यशूद्रौ — चपुनः सखा — ज्ञातयः चपुनः गुरुः एतेपि ब्राह्मणस्यगृहे अतिथयो न उच्यंते ॥

भा० । ब्राह्मण के घरमें क्षत्रिय वैश्य शूद्र—मित्र—ज्ञाति—और गुरु ये अतिथिनहीं होतेहैं ॥

ता० । ब्राह्मण के घरमें क्षत्रिय वैश्य और शूद्रको पंडितजनोंने अतिथि नहीं कहा क्योंकि ये ब्राह्मणसे नीचेवर्ण हैं—और इसीप्रकार क्षत्रिय के घरमें वैश्य और शूद्र और वैश्य के घरमें शूद्र अतिथि नहीं होते और अपने सम्बन्धिहोने से मित्र और ज्ञाति अतिथि नहीं होतेहैं और अपना स्वामी होनेसे गुरुभी अतिथिनहीं होता अर्थात् ब्राह्मणकाअतिथि ब्राह्मण और इतरोंके अतिथि अपनेसे उत्कृष्ट जाति और समानजाति के होतेहैं ११० ॥

यदितत्वतिथिधर्मेणक्षत्रियोगृहमाव्रजेत् । भुक्तवत्सूक्तविप्रेषुकामंतमपिभोजयेत् १११ ॥

प० । यदि तु अतिथिधर्मेण क्षत्रियः गृहं आव्रजेत् भुक्तवत्सु उक्तविप्रेषु कामं तं अपि भोजयेत् ॥

यो० । यदि ब्राह्मणस्यगृहे अतिथिधर्मेण क्षत्रियः आव्रजेत् (तर्हि) उक्तविप्रेषु भुक्तवत्सु सत्सु तं (क्षत्रियं) अपि कामं भोजयेत् ॥

भा० । ता० । यदि ब्राह्मण के घरमें अतिथि के धर्म से अर्थात् ग्रामांतर से अथवा अतिथि आने के समयपर क्षत्रियभी आजाय तो ब्राह्मण के घरमें प्रथम आये ब्राह्मणों के भोजनकरनेके पीछे उस क्षत्रियको भी यथेच्छ भोजनकरावे १११ ॥

वैश्यशूद्रावपिप्राप्तौकुटुम्बेऽतिथिधर्मिणौ ॥
भोजयेत्सहभृत्यैस्तावानृशंस्यंप्रयोजयन् ११२ ॥

प० । वैश्यशूद्रौ अपि प्राप्तौ कुटुम्बे अतिथिधर्मिणौ भोजयेत् सह भृत्यैः तौ आनृशंस्यं प्रयोजयन् ॥

यो० । ब्राह्मणस्य कुटुम्बे अतिथिधर्मिणौ प्राप्तौ यौ वैश्यशूद्रौ (भवेतां) तौ अपि भृत्यैस्सह आनृशंस्यं प्रयोजयन् सन् ब्राह्मणः भोजयेत् ॥

भा० । ता० । यदि वैश्य और शूद्रभी अतिथि के धर्मसे ब्राह्मण के कुटुम्ब में आवें तो उन दोनोंकोभी दयाभाव से सेवकों के संग भोजनकरादे अर्थात् क्षत्रिय के भोजन से पीछे और दंपती (स्त्री पुरुष) के भोजन से पहिले उनको जिमावे ११२ ॥

इतरानपिसख्यादीन्संप्रीत्यागृहमागतान् ॥
सत्कृत्यान्नंयथाशक्तिभोजयेत्सहभार्यया११३ ॥

प० । इतरान् अपि सख्यादीन् संप्रीत्या गृहं आगतान् सत्कृत्य अन्नं यथाशक्ति भोजयेत् सह भार्यया ॥

यो० । संप्रीत्या गृहं आगतान् इतरान् सख्यादीन् अपि सत्कृत्य यथाशक्ति भार्यया सह अन्नं भोजयेत् ॥

भा० । अत्यंत प्रेमसे अपने घरपर आयेहुये अन्य मित्र आदिकोंको भी सत्कारकरके अपनी स्त्रीके भोजनकरने के समय यथाशक्ति जिमावे ॥

ता० । उक्त भोजन के समय अत्यन्त प्रीति से अपने घरपर आयेहुये मित्रआदिकों को भी (अर्थात् अतिथि धर्म से जो न आयेहों) अपनी शक्तिके अनुसार उत्तम अन्न बनवाकर स्त्री के भोजनकरनेके समय भोजनकरादे–यद्यपि–अवशिष्टंतुदम्पती–इसवचनमें अपने भी भोजनका वही समय है इससे अपने संग जिमावे यह कहनाथा स्त्रीके संग जिमावे यहकहना आचार्य के वचनकी विचित्रताहै अर्थात् एकही दोनोंकाभाव है–और गुरुके भोजनका समय इससे नहीं कहा कि वे बड़ेहैं चाहे जब भोजनकरें ११३ ॥

सुवासिनीःकुमारीश्वरोगिणोगर्भिणीःस्त्रियः ॥
अतिथिभ्योऽग्रएवैतान्भोजयेदविचारयन् ११४ ॥

प० । सुवासिनीः कुमारीः च रोगिणः गर्भिणीः स्त्रियः अतिथिभ्यः अग्रे एव एतान् भोजयेत् अविचारयन् ॥

यो० । सुवासिनीः कुमारीः चपुनः रोगिणः गर्भिणीः स्त्रियः एतान् सर्वान् अतिथिभ्यः अग्रे (प्रथमं) एव अविचारयन् सन् भोजयेत् ॥

भा० । नवीनविवाही स्त्री–कन्या–रोगी–गर्भवाली स्त्री–इनको विनाविचारे अभ्यागतों से पहिलेही भोजनकरावे ॥

ता० । सुवासिनी (नईविवाही स्त्री) कुमारी (कन्या) रोगी–और गर्भवती स्त्री इनसबको विना विचारे अभ्यागतोंसे पहिलेही भोजनकरादे–अर्थात् यह न विचारे कि अतिथियोंसे पहिले इनको कैसे जिमाऊं–और मेधातिथि तो–अतिथिभ्योनुएवैतान–ऐसापाठपढ़कर यहअर्थ करते हैं कि अतिथि के संगही इनको जिमावे–और अन्यभ्रपि अग्रेयहपढ़तेहैं–इनदोनोंमें मेधातिथि का अर्थ ठीकहै क्योंकि अतिथि का सम्मान इसीअर्थ में होसक्ताहै ११४ ॥

अदत्वातुयएतेभ्यःपूर्वंभुंक्तेविचक्षणः।सभुञ्जानोनजानातिश्वगृध्रैर्जग्धिमात्मनः ११५ ॥

प० । अदत्वा तु यः एतेभ्यः पूर्वं भुंक्ते विचक्षणः सः भुंजानः न जानाति श्वगृध्रैः जग्धि आत्मनः ॥

यो० । यः विचक्षणः एतेभ्यः अदत्वा पूर्वं भुंक्ते–भुंजानः सः आत्मनः श्वगृध्रैः जग्धिं न जानाति मृतं तं श्वगृध्राः खादंतीत्यर्थः ॥

भा० । ता० । जो पण्डित अर्थात् भोजनके व्यतिक्रमके दोषोंकाज्ञाता इनअतिथिआदि भृत्य

पर्य्यन्तोंको विनादिये पहिले खाताहै—वह मरणके पीछे कुत्ते और गीधोंसे अपने देहके भक्षणको नहीं जानता—अर्थात् उसको कुत्ते और गीधखातेहैं ११५ ॥

भुक्तवत्स्वथविप्रेषुस्वेषुभृत्येषुचैवहि । भुञ्जीयातांततःपश्चादवशिष्टंतुदम्पती ११६ ॥

प० । भुक्तवत्सु अथ विप्रेषु स्वेषु भृत्येषु च एव हि भुंजीयातां ततः पश्चात् अवशिष्टं तु दम्पती ॥

यो० । अथ विप्रेषु—चपुनः स्वेषु भृत्येषु भुक्तवत्सु (सत्सु) ततः पश्चात् अवशिष्टं अन्नं दंपती भुंजीयातां ॥

भा० । ता० । ब्राह्मण अतिथि और अपने भृत्य (सेवक) जब भोजनकरचुकें तिसके पीछे शेष अन्नको दंपती (स्त्री पुरुष) भोजनकरें ११६ ॥

देवानृषीन्मनुष्यांश्चपितॄन्गृह्याश्चदेवताः ॥
पूजयित्वाततःपश्चाद्गृहस्थःशेषभुग्भवेत् ११७ ॥

प० । देवान् ऋषीन् मनुष्यान् च पितॄन् गृह्याः च देवताः पूजयित्वा ततः पश्चात् गृहस्थः शेषभुक् भवेत् ॥

यो० । गृहस्थः देवान् ऋषीन् चपुनः मनुष्यान् चपुनः गृह्याः देवताः पूजयित्वा ततः पश्चात् शेषभुक् भवेत् ॥

भा० । देवता ऋषि—मनुष्य और घरके देवता इन सबका अन्नदानसे पूजनकरके शेष अन्न का गृहस्थी भोजनकरे ॥

ता० । देवता—ऋषि—और मनुष्य और गृह्य (बलिवैश्वदेवमेंकहे) देवता इन सबका पूजन करके गृहस्थी शेष अन्नके भोजन करनेवालाहे—इसमें गृह्यदेवताओंके पूजनसे भूत यज्ञ कहा अर्थात् पंचयज्ञों का कर्ताहुआ गृहस्थी शेष अन्नका भोजन करे—यद्यपि—अवशिष्टंतुदंपती—इससे शेष अन्नका भोजन कहआयेथे तथापि जो आगे दोष कहेंगे उसका यह अनुवादहै—अथवा देवान् इसमेंही भूत यज्ञका संग्रहकरना और गृह्य देवता इससे उनका पूजन कहा जो वासुदेव आदिकी प्रतिमा (मूर्त्ति) अपने घरमेंहो ११७ ॥

अघंसकेवलंभुंक्तेयःपचत्यात्मकारणात् । यज्ञशिष्टाशनंह्येतत्सतामन्नंविधीयते ११८ ॥

प० । अघं सः केवलं भुंक्ते यः पचति आत्मकारणात् यज्ञशिष्टाशनं हि एतत् सतां अन्नं विधीयते ॥

यो० । यःपुरुषः आत्मकारणात् पचति सःकेवलं अघं भुंक्ते — हि (यतः) एतत् यज्ञशिष्टाशनं सतां अन्नं विधीयते ॥

भा० । जो मनुष्य केवल अपनेही अर्थ पाक करताहे वह पापको खाताहै क्योंकि यज्ञसे शेष का भोजनही सत्पुरुषोंका अन्न कहाहे ॥

ता० । जो पुरुष केवल अपने लियेही पाक करताहे वह पापको भोगताहै क्योंकि यह जो यज्ञ से शेष अन्नका भक्षणहै सोई सत्पुरुषों का अन्नकहाहे क्योंकि इस[१] श्रुतिमें यह लिखा है कि

---

१ केवलाघो भवति केवलादी यस्माद्यदेव पाकयज्ञावशिष्टमशनमसमश्यते इति ॥

जिससे जो अकेला आपही खाता है वह केवल पाप रूपहै और जो पाक यज्ञसे अवशिष्ट अन्न खाया जाताहै वही अशन (भोजन) है ११८ ॥

राजर्त्विक्स्नातकगुरून्प्रियश्वशुरमातुलान् । अर्हयेन्मधुपर्केणपरिसंवत्सरात्पुनः ११९

प० । राजर्त्विक्स्नातकगुरून् प्रियश्वशुरमातुलान् अर्हयेत् मधुपर्केण परिसंवत्सरात् पुनः ॥

यो० । राजर्त्विक्स्नातकगुरून्—प्रियश्वशुरमातुलान् परिसंवत्सरान् पुनः मधुपर्केण पूजयेत्—संवत्सरात् ऊर्ध्वं समागतान् पुनः पूजयेत् वर्षमध्येतु न पूजयेदितिभावः ॥

भा० । राजा—ऋत्विक्—स्नातक—गुरु—जामाता—श्वशुर—मातुल—एकवर्षके मध्यमें एकवार अपने घर पर आयेहुये इनका प्रतिवर्ष पूजनकरै ॥

ता० । अतिथिकी पूजाके प्रसंगसे अपने घरपर आये राजा आदिकी पूजाकी विशेषता कहते हैं कि—राजा—ऋत्विक्—यज्ञ आदि जो करावे स्नातक (विद्या और व्रतसंयुक्त) गुरु प्रिय (जामाता)श्वशुर—और मातुल अपने घरपर आये इन सातोंका मधुपर्कसे पूजनकरै—परन्तु संवत्सर को वर्जदे अर्थात् यदि वर्ष दिनके पीछे ये आवें तो मधुपर्कसे पूजे—मध्यमें आवें तो नहीं—क्योंकि परिसंवत्सरात् यहां परि इस उपसर्गका अर्थ वर्जनाहै और—पंचम्यपाङ् परिभिः—इस सूत्र से परिके योगमें—संवत्सरात्—यह पंचमीहै—मेधातिथि तो यह कहतेहैं कि—परिसंवत्सरान्—यहपाठ है और उसका अर्थ यहहै कि परिगत निकसगयाहै संवत्सर जिनको ऐसे राजा आदिको मधुपर्कसे पूजे मध्यमें नहीं ११९ ॥

राजाचश्रोत्रियश्चैवयज्ञकर्मण्युपस्थितौ । मधुपर्केणसंपूज्यौनत्वयज्ञइतिस्थितिः १२०॥

प० । राजा च श्रोत्रियः च एव यज्ञकर्मणि उपस्थितौ मधुपर्केण संपूज्यौ न तु अयज्ञे इति स्थितिः ॥

यो० । राजा—चपुनः श्रोत्रियः—यज्ञकर्मणि उपस्थितौ एतौ द्वौ मधुपर्केण संपूज्यौ—अयज्ञेतु न संपूज्यौ—इतिस्थितिः शास्त्रमर्यादेत्यर्थः ॥

भा० । राजा—वेदपाठी—यज्ञकर्ममें आयेहुयेही इनका मधुपर्कसे पूजनकरै अयज्ञ (यज्ञकेविना) में न करै यह शास्त्रकी मर्यादाहै ॥

ता० । राजा और स्नातक की पूजामें संकोचकहते हैं कि वर्ष दिनके अनंतर भी यज्ञकर्ममें ही आयेहुये राजा और स्नातक का मधुपर्कसे पूजनकरै और जामाता (जमाई) आदि तो यज्ञके विना भी वर्ष दिनके अनंतर आये मधुपर्कके योग्यहोतेहैं और वर्ष दिनके मध्यमें तो सबको यज्ञ और विवाह में ही मधुपर्क देना इसी वचन में गोतमऋषि ने कहाहै ऋत्विक् आचार्य श्वशुर—पितृव्य (चाचा) मामा—इनके आने पर मधुपर्कदे और वर्ष के मध्यमें तो यज्ञ और विवाहमेंही राजा और श्रोत्रिय (वेदपाठी) कोहीदे १२० ॥

सायंत्वन्नस्यसिद्धस्यपत्न्यमन्त्रंबलिंहरेत् । वैश्वदेवंहिनामैतत्सायंप्रातर्विधीयते १२१ ॥

प० । सायं तु अन्नस्य सिद्धस्य पत्नी अमंत्रं बलिं हरेत् वैश्वदेवं हि नाम एतत् सायं प्रातः विधीयते ॥

---

१. ऋत्विगाचार्यश्वशुरपितृव्यमातुलानामुपस्थानेमधुपर्कः संवत्सरे पुनर्यज्ञविवाहयोरर्वाक राज्ञः श्रोत्रियस्यच ॥

यो० । सायंसिद्धस्य अन्नस्य पत्नी अमंत्रं बलिं हरेत् हि (यतः) एतत् वैश्वदेवं नामकर्म सायं प्रातः विधीयते ॥

भा० । ता० । संध्याको बनाये हुये अन्नमें से पत्नीही विना मंत्रोंके पढ़े बलिदे अर्थात् मनमें देवताओं के स्मरण को करके दे—क्योंकि यह वैश्वदेवनामक कर्म—(होम—बलिदेना—अतिथि भोजन) गृहस्थी को सायंकाल और प्रातःकाल करना कहाहै १२१ ॥

पितृयज्ञंतुनिर्वर्त्यविप्रश्चेन्दुक्षयेऽग्निमान्॥
पिण्डान्वाहार्यकंश्राद्धंकुर्यान्मासानुमासिकम् १२२ ॥

प० । पितृयज्ञं तु निर्वर्त्य विप्रः च इंदुक्षये अग्निमान् पिण्डान्वाहार्यकं श्राद्धं कुर्यात् मासानुमासिकम् ॥

यो० । अग्निमान विप्रः पितृयज्ञं निवर्त्य इन्दुक्षये (अमावास्यायां) पिण्डान्वाहार्यकं श्राद्धं मासानुमासिकं कुर्यात् ॥

भा० । पिण्ड और पितृ यज्ञ को निवृत्त करके अमावस्याके दिन अग्निहोत्री ब्राह्मण पिण्डा न्वाहार्यक श्राद्धको प्रतिमास में करै ॥

ता० । अब सनातन श्राद्धकल्प सुनो यह अनुक्रमणिका में जो पहिले प्रतिज्ञा की है उसके अनुसार श्राद्ध प्रकरणका प्रारम्भ करते हैं कि अग्निहोत्रवाला ब्राह्मण अमावस्या में पितृयज्ञ पिण्डदानादि करके—पिण्डान्वाहार्यक (पितृयज्ञ और पिण्ड इन दोनोंके अनु (पीछे) जो किया जाय उसे पिण्डान्वाहार्यक श्राद्ध कहतेहैं) श्राद्ध मासानुमासिक (प्रतिमास में) करै—इस श्लोक से इसश्राद्ध को अमावस्याके दिन नित्य कर्त्तव्य कहा है और विप्रका ग्रहण भी तीनों द्विजातियों का बोधक है क्योंकि तीनोंकाही प्रकरण है १२२ ॥

पितॄणांमासिकंश्राद्धमन्वाहार्यंविदुर्बुधाः । तच्चामिषेणकर्त्तव्यप्रशस्तेनसमंततः १२३ ॥

प० । पितॄणां मासिकं श्राद्धं अन्वाहार्यं विदुः बुधाः तत् च आमिषेण कर्त्तव्यम् प्रशस्तेन समंततः ॥

यो० । बुधाः पितॄणां मासिकं श्राद्धं अन्वाहार्यं विदुः (जानंति) तत् (अन्वाहार्यं श्राद्धं) समंततः प्रशस्तेन आमिषेण (मांसेन) कर्त्तव्यम् ॥

भा० । पितरों के मासिक श्राद्ध को पण्डितजन अन्वाहार्य जानते हैं अर्थात् कहतेहैं और उस श्राद्ध को सब प्रकार से श्रेष्ठ मांस से करना ॥

ता० । अब अन्वाहार्य पदके अर्थ को कहकर पितृयज्ञ से अनन्तर करने को दृढ़करते हैं कि यह प्रतिमासमें होनेवाला श्राद्ध जिसमें पितृयज्ञ और पिण्डोंके पीछे किया जाताहै तिससे इस पितरों के मासिक श्राद्धको पण्डितजन पिण्डान्वाहार्यक जानतेहैं इससे इसको पितृयज्ञके पीछे ही करना उचित है—और उस पिण्डान्वाहार्यक श्राद्धको प्रशस्त (जिस में दुर्गंध नहो और जो मनोहर हो) मांस से करै—अथवा यहांपर—पिण्डानांमासिकंश्राद्धं—ऐसा भी पाठ है—उसका यह अर्थ है कि पितृयज्ञके पिण्डोंके श्राद्ध को पण्डितजन अन्वाहार्य कहते हैं १२३ ॥

तत्रयेभोजनीयाःस्युर्येचवर्ज्याद्विजोत्तमाः॥
यावन्तश्चैवयैश्चान्नैस्तान्प्रवक्ष्याम्यशेषतः १२४॥

प०। तत्र ये भोजनीयाः स्युः ये च वर्ज्याः द्विजोत्तमाः यावंतः च एव यैः च अन्नैः तान् प्रवक्ष्यामि अशेषतः॥

यो०। तत्र (श्राद्धे) ये द्विजोत्तमाः भोजनीयाः चपुनः ये वर्ज्याः यैः अन्नैः भोजनीयाः यावंतः भोजनीयाः तान् अशेषतः प्रवक्ष्यामि॥

भा०। ता०। श्राद्धमें जैसे-ब्राह्मण जिमाने और जैसे न जिमाने और जितने जिमाने और जिन अन्नोंसे जिमाने-उन सम्पूर्णों को कहताहूं १२४॥

द्वौदैवेपितृकार्येत्रीनेकैकमुभयत्रवा। भोजयेत्सुसमृद्धोऽपिनप्रसज्जेतविस्तरे १२५॥

प०। द्वौ दैवे पितृकार्ये त्रीन् एकैकं उभयत्र वा भोजयेत् सुसमृद्धः अपि न प्रसज्जेत विस्तरे॥

यो०। दैवे (श्राद्धे) द्वौ-पितृकार्ये त्रीन्-वा उभयत्र एकैकं ब्राह्मणं सुसमृद्धः अपि भोजयेत् विस्तरे न प्रसज्जेत॥

भा०। विश्वेदेवाओंके कार्य में दो और पितरों के कार्यमें तीन२ अथवा दोनों जगह एक २ ब्राह्मण जिमावे और सामर्थ्य होनेपर भी विस्तारमें आसक्त न हो॥

ता०। यद्यपि जैसे ब्राह्मणजिमावे यह प्रतिज्ञाके अनुसार ब्राह्मणोंका लक्षणही प्रथमकहना था तथापि ब्राह्मणोंकी संख्या में वक्तव्य अल्प है इससे प्रथम ब्राह्मणों की संख्याकोही कहते हैं कि देवता (विश्वेदेवा) ओंके श्राद्ध में दो ब्राह्मण और पितरों (पिता पितामह प्रपितामह) के श्राद्धमें तीन ब्राह्मण-जिमावे-अथवा दोनों जगह एक२ अर्थात् एक दैवश्राद्धमें और एकपितृ श्राद्ध में जिमावे और अधिक भोजन में समर्थ भी विस्तार में आसक्त न हो-मेधातिथिने तो यह कहा है कि पितृकार्यमें तीन अर्थात् तीन पिताके तीनपितामह के तीनप्रपितामहके निमित्त ब्राह्मण जिमावे और अथवा दोनों जगह एकएक अर्थात् एकदैवश्राद्धमें एकपिताके एकपितामह के एकप्रपितामहके निमित्त जिमावे और पिताआदि तीनों के निमित्त एकही ब्राह्मण को न जिमावे क्योंकि इस आश्वलायन गृह्यसूत्र का विरोधहोगा-कि जैसे पिताआदि तीनों को एक पिण्ड नहीं दिया जाता तिसी प्रकार तीनों के निमित्त एक ब्राह्मण भी नहीं जिमाना-तिस से पिता आदि तीनोंको एकही ब्राह्मण न जिमाना-यह मेधातिथिका कथन असंगतहै क्योंकि उसी गृह्यके कर्त्ता ने यह कहा है कि आद्य (सपिण्डी) से अन्य श्राद्धों में अपनी कामना से पिता आदि तीनों के निमित्त एकही ब्राह्मणको जिमावे अथवा अनाद्य (खानेके योग्य द्रव्य के अभाव) में एक ब्राह्मणको भी जिमावे-उभयत्रापि इसके व्याख्यान में पार्वण आदि श्राद्ध में पिता आदि तीनों को एकही ब्राह्मण जिमावे-और वशिष्ठजीने इस वचनसे सबके निमित्त एक

१ नत्वेवैकं सर्वेषां पिंडैर्व्याख्यातम्॥

२ काममनाद्ये॥

३ यद्येकंभोजयेच्छ्राद्धे दैवतन्त्रंकथंभवेत् अन्नंपात्रे समुद्धृत्य सर्वस्य प्रकृतस्यच देवतायतने कृत्वा यथाविधि प्रवर्तयेत्-प्रास्येदग्नौ तदन्नंवा-दद्याद्वा ब्रह्मचारिणे॥

ही ब्राह्मण जिमाना कहाहै कि यदि एकही ब्राह्मणको श्राद्धमें जिमावे तो दैवतंत्र (देवताओंका श्राद्ध) कैसे होगा–जितना अन्न बनायाहो उस सबको एकपात्र में निकासकर देवताओं के स्थान में रखकर यथाविधि (विधिके अनुसार)परसे–अथवा देवताओं के निमित्त जो अन्नहो उसे अग्नि में होमदे–अथवा ब्रह्मचारीको देदे–सिद्धान्त यहहै कि जो अर्थ हमने कहा वह ठीक है मेधातिथिका अर्थ ठीक नहीं है–यद्यपि–प्रथने वाच शब्दः–इस पाणिनिके सूत्र से विस्तारः यह प्रयोग वृद्धिकी महिमा से पाता है तथापि स्मृतियों को भी वेदकी तुल्यता है और सर्वे विधयश्छंदसिविकल्पंते–इसवचनसे सबविधि वेदमें विकल्पकरके होती हैं इससे विस्तरे यह प्रयोग भी ठीकहै १२५ ॥

सत्क्रियांदेशकालौचशौचंब्राह्मणसंपदः ।
पञ्चैतान्विस्तरोहन्तितस्मान्नेहेतविस्तरम् १२६ ॥

प० । सत्क्रियां देशकालौ च शौचं ब्राह्मणसम्पदः पंच एतान् विस्तरः हंति तस्मात् न ईहेत विस्तरम् ॥

यो० । सत्क्रियां चपुनः देशकालौ – शौचं – ब्राह्मणसम्पदः एतान् पंच विस्तरः हंति तस्मात् विस्तरं न ईहेत (नकुर्यात्) ॥

भा० । सज्जन ब्राह्मणों की पूजा–देश–काल–शौच–सुपात्र ब्राह्मण का लाभ–इनपांचोंको विस्तार नष्टकरता है तिससे श्राद्धमें विस्तारको न करे ॥

ता० । सत्क्रिया (ब्राह्मणकी पूजा१)–और दक्षिणकोप्रवण (नीचा) देश२–काल (अपराह्ण आदि ३)–शौच अर्थात् श्राद्ध करनेवाले–और भोजनकर्ता और सेवकआदि की शुद्धता ४–और ब्राह्मण सम्पत्ति अर्थात् गुणवाले ब्राह्मणोंकीप्राप्ति५–इनपांचोंको विस्तार नष्टकरताहै तिससे ब्राह्मणों का विस्तार न करे इससे सत्कार आदि के विरोधीहोनेसे विस्तारका निषेधकिया है यदि ब्राह्मण सत्कारआदि पांचों होसकें तो पिताआदि प्रत्येक तीनोंकेनिमित्त तीन२ ब्राह्मण के जिमानेकी भी आज्ञाहै–क्योंकि गौतमऋषि ने यहकहा है कि अवर (अल्प) ब्राह्मणों को अथवा अयुग्म ब्राह्मणोंको न जिमावे–और अपने उत्साहके अनुसार गृह्यकारने भी यहलिखा है कि पार्वणश्राद्धमें और काम्य (जो फलकी आकांक्षासे कियाजाय) श्राद्धमें–और आभ्युदयिक (नांदीमुख) श्राद्धमें–और एकोद्दिष्ट श्राद्ध में ब्राह्मणोंको जिमावे यह प्रारम्भकरके फिर यहकहाहै कि एकएक निमित्त एक२ वा दोदो वा तीन२ जिमावे औरवृद्धि (नांदीमुख) श्राद्ध में फलकी अधिकताहै इससे दो२ जिमावे यह आभ्युदयिकश्राद्ध विषयक के (लिये) है और आभ्युदयिककाही यहां प्रकरणहै १२६ ॥

प्रथितापेतकृत्यैषापित्र्यंनामविधुक्षये । तस्मिन्युक्तस्यैतिनित्यंप्रेतकृत्यैवलौकिकी १२७

प० । प्रथिता प्रेतकृत्या एषा पित्र्यं नाम विधुक्षये तस्मिन् युक्तस्य एति नित्यं प्रेतकृत्या एव लौकिकी ॥

१ नचावरानभोजयेदयुजो वा यथोत्साहम् ॥
२ अथातः पार्वणश्राद्धे काम्ये आभ्युदयिक एकोद्दिष्टे ब्राह्मणान्नित्युपक्रम्य एकैकमेकैकस्य द्वौ द्वौ त्रीन् त्रीन वा वृद्धौ फलभूयस्त्वम् ॥

यो० । यत् विधुक्षये पितृनाम (श्राद्धं) एषा प्रेतकृत्या प्रथिता — तस्मिन् (पितृकार्ये) नित्यं युक्तस्य लौकिकी प्रेतकृत्या भवतीति शेषः ॥

भा० । अमावस्या के दिन जो यह पितरोंका कर्महै यही प्रेतकृत्या प्रसिद्ध है और तिसपितरों के कर्म में जो नित्ययुक्त है उसकी लौकिक (जगत्में कर्त्तव्य) प्रेतकृत्याका फल प्राप्तहोताहै ॥

ता० । जो यह पितरोंके अर्थ श्राद्धरूप है यही पितरों के उपकारकी क्रिया (कर्म) प्रसिद्धहै— और यहां प्रेतशब्दसे—प्रकर्षेणइतःप्रेतः—इस व्युत्पत्तिसे पितृलोकमें स्थितकहाहै और विधुक्षय (अमावस्या) के दिन जो पितृकर्म में युक्त है उस मनुष्य का लौकिक सम्पूर्ण प्रेतकी क्रिया अर्थात् पितरोंके उपकारार्थ कर्म पुत्र पौत्रआदि के प्रबन्धरूप से करनेवाले को प्राप्तहोतीहै जिससे इसश्राद्धको करै—गोविंदराज ने तो—विधिःक्षये—यहपाठ पढ़ाहै और उसका अर्थ यहकिया है कि जो यह विधि कही है वह क्षय (चन्द्रमा के क्षय अमावस्या वा ग्रहण) में करना—यह सम्प्रदायसे नहींहै क्योंकि गोविंदराजसे भी वृद्ध मेधातिथि आदिकोंने स्वीकार नहीं किया और क्षये इसपद के सम्बन्धमें भी क्लेश है १२७ ॥

श्रोत्रियायैवदेयानिहव्यकव्यानिदातृभिः। अर्हत्तमायविप्रायतस्मैदत्तंमहाफलम् १२८

प० । श्रोत्रियाय एव देयानि हव्यकव्यानि दातृभिः अर्हत्तमाय विप्राय तस्मै दत्तं महाफलम् ॥

यो० । दातृभिः हव्यकव्यानि श्रोत्रियाय अर्हत्तमाय विप्राय एवदेयानि- (यतः) तस्मैदत्तं महाफलं (भवति) ॥

भा० । ता० । दाताओंको हव्य और कव्य वेदपाठी और आचारआदि पूजनेयोग्य ब्राह्मण को ही देने क्योंकि उसको जो दियाजाताहै अत्यन्त फलको देताहै १२८ ॥

एकैकमपिविद्वांसंदैवेपित्र्येचभोजयेत् । पुष्कलंफलमाप्नोतिनामन्त्रज्ञान्बहूनपि १२९॥

प० । एकैकं अपि विद्वांसं दैवे पित्र्ये च भोजयेत् पुष्कलं फलं आप्नोति न अमंत्रज्ञान् बहून् अपि ॥

यो० । दैवे चपुनः पित्र्ये (कर्मणि) एकैकं अपि विद्वांसं यः भोजयेत् सः पुष्कलं फलं आप्नोति यः अमंत्रज्ञान् बहून् अपि भोजयेत् सः पुष्कलंफलं न आप्नोति ॥

भा० । देवता और पितरोंको श्राद्धमें एक २ ही विद्वान ब्राह्मणको जो जिमावै वह पुष्कल (बहुतसे) फलको प्राप्तहोताहै और वेदके न जाननेवाले बहुतसों को जो जिमावै वह अधिक फलको प्राप्त नहीं होता ॥

ता० । देवता और पितरोंके श्राद्धमें वेदके ज्ञाता एक २ ब्राह्मणको भी जो जिमाता है वह उत्तम फलको प्राप्तहोताहै और बहुत से भी अज्ञानियोंको जो जिमाताहै वह उत्तम फलको प्राप्त नहीं होता—इससे ब्राह्मणोंको भोजन प्रधान है और पिंडदान आदिक तो अंग हैं यह गोविंदराजकहतेहैं—हम तो यह कहतेहैं कि पिताके निमित्त ब्राह्मणके स्वीकार पर्यंत जो द्रव्यका त्याग वह श्राद्ध शब्द का अर्थ है और वही इस (पिंडान्वाहार्यकंश्राद्धं) से मनुने कहाहै और आपस्तंबने तो मनुकेही अर्थ का व्याख्यान कहाहै कि जिसीप्रकार मनुने कल्याण के लिये यह

१ तथैतन्मनुश्राद्धशब्दं कर्मप्रोवाचप्रजापतिः अयमार्थ तत्र पितरो देवताब्राह्मणस्त्वाहवनीयार्थे मासिमास्यपरपक्षस्यापराह्णः श्रेयान् ॥

भा० । मट्टीके ढेलेको न मलै—नखों से तृणोंका छेदन न करै—और निष्फल और जिससे आगे को दुःखनिकलै ऐसा कर्म न करै ॥

ता० । विना प्रयोजन मट्टीकेढेलाको हाथोंसे न मलै और नखोंसे तृणोंकोछेदन न करै क्योंकि आपस्तम्बने इस वचन से निषिद्धकिये हैं—यद्यपि (नकुर्वीत वृथाचेष्टां) इससेही इसका भी निषेधसिद्धथा तथापि अधिक प्रायश्चित्त और दोषदिखाने के लिये फिर कहाहै इसीसे आगे भी लिखेंगे कि लोष्टका मलनेवाला निषिद्धहै—और जिस कर्ममें दृष्ट अथवा अदृष्टफलनहो ऐसा कर्म भी न करै—यद्यपि यहभी न कुर्वीत वृथाचेष्टां अर्थात् वृथाचेष्टा न करै इससेही इसकाभी निषेध होजाता तथापि उससे देहकी वृथा चेष्टा निषिद्ध है और यहांपर मनका वृथा संकल्प निषिद्धहै इससे पुनः उक्तिदोषनहींहै—और जो कर्म आगामिकाल (भविष्य)में सुखदायी नहो जैसे अजीर्णपर भोजन उसकोभी न करै ७० ॥

लोष्ठमर्दीतृणच्छेदीनखखादीचयोनरः । सविनाशंव्रजत्याशुसूचकोऽशुचिरेवच ७१॥

प० । लोष्ठमर्दी तृणच्छेदी नखखादी च यः नरः सः विनाशं व्रजति आशु सूचकः अशुचिः एव च ॥

यो० । यः नरः लोष्ठमर्दी तृणच्छेदी—चपुनः नखखादी सूचकः चपुनः अशुचिः (भवति) स आशु विनाशं व्रजति—शीघ्रंम्रियते इत्यर्थः ॥

भा० । ता० । ढेलेको मलनेवाला—तृणोंको छेदन (तोड़ना) करनेवाला—और दांतोंसेनखोंके खानेवाला—और सूचक (चुगल) और जो अशुद्धरहै—ऐसा जो मनुष्य है वह शीघ्रही नष्टहोता है—अर्थात् ये सब कुलक्षण नाशकरनेवाले होतेहैं—इनको न करै ७१ ॥

---

१ सचमुहूर्त्तत्रयम् ॥

२ नाकारणंमृल्लोष्ठंमृद्नीयात् तृणानिच नछिन्द्यात् ॥

नविगर्ह्यकथांकुर्याद्बहिर्माल्यंनधारयेत् । गवांचयानंपृष्ठेनसर्वथैवविगर्हितम् ७२ ॥

प० । न विगर्ह्य कथां कुर्यात् बहिः माल्यं न धारयेत् गवां च यानं पृष्ठेन सर्वथा एव विगर्हितम् ॥

यो० । विगर्ह्य कथां न कुर्यात् — माल्यं बहिः न धारयेत् — चपुनः पृष्ठेन गवांयानं--सर्वथा विगर्हितं भवति--अतस्तदपि न कुर्यात् ॥

भा० । ता० । वाद विवादके अभिनिवेश (आग्रहसे) शास्त्र वा लौकिक अर्थोंकी कथा न करै—और केशों के समूह से बाहिरमालाको न धारै—और गौओं (बैल) की पीठपर चढ़कर चलना सर्वथा निंदित है अर्थात् कपड़ाआदिको पीठपर रखकर भी चलना निषिद्ध है और गौ जिनको लेचलें ऐसे रथ—गाड़ीपर चढ़कर चलनेमें कुछ दोषनहींहै ७२ ॥

अद्वारेणचनातीयाद्ग्रामंवावेश्मवावृतम् । रात्रौचवृक्षमूलानिदूरतःपरिवर्जयेत् ७३॥

प० । अद्वारेण च न अतीयात् ग्रामं वा वेश्म वा आवृतं रात्रौ च वृक्षमूलानि दूरतः परिवर्जयेत् ॥

यो० । आवृतं ग्रामं वा वेश्म (गृहं) अद्वारेण न अतीयात् (नविशेत्) चपुनः रात्रौ वृक्षमूलानिदूरतः परिवर्जयेत् ॥

भा० । ता० । प्राकार (परकोटाआदि) से ढकेहुये ग्राम वा घरमें प्राकारआदिका अवलंघन करके न घुसे और रात्रिकेसमय वृक्षों के नीचे टिकनेको दूरसे त्यागदे ७३ ॥

नाक्षैःक्रीडेत्कदाचित्तुस्वयंनोपानहौहरेत् । शयनस्थोऽपिभुञ्जीतनपाणिस्थंनचासने ७४

प० । न अक्षैः क्रीडेत् कदाचित् तु स्वयं न उपानहौ हरेत् शयनस्थः अपि भुंजीत न पाणिस्थं न च आसने ॥

यो० । कदाचित् तु (अपि) अक्षैः न क्रीडेत् — स्वयं उपानहौ आत्महस्तादिना न हरेत् — शयनस्थः — मनुष्यः न भुंजीत — पाणिस्थं अन्नं चपुनः आसने भोजनपात्रं धृत्वा न भुंजीत ॥

भा० । ता० । कभी हँसीसेभी अक्षों (फांसे) से न खेले और अपनेउपानह हाथसे न लेचले शय्यापर बैठकर भोजन न करै और हाथपर भोजनको रखकर और भोजन के पात्रको आसन पर रखकर भोजन न करै ७४ ॥

सर्वंचतिलसंबद्धंनाद्यादस्तमितेरवौ । नचनग्नःशयीतेहनचोच्छिष्टःक्वचिद्व्रजेत् ७५ ॥

प० । सर्वं च तिलसंबद्धं न अद्यात् अस्तमिते रवौ न च नग्नः शयीत इह न च उच्छिष्टः क्वचित् व्रजेत् ॥

यो० । रवौ अस्तं इते (प्राप्ते) सति यत् तिलसंबद्धं (कृसरआदि) तत्सर्वं न अद्यात् नग्नः (शाटिकारहितः) इह (जगति) न शयीत — उच्छिष्टः सन् क्वचित् न व्रजेत् ॥

भा० । ता० । जो कुछ तिलसे मिला पदार्थ है उस सबको सूर्य के छिपने पर न खाय—और नग्न हुआ अर्थात् धोतीके धारणकिये विना यहां (शय्या आदिपर) न सोवे—और उच्छिष्ट हुआ दूसरी जगह न जाय ७५ ॥

आर्द्रपादस्तुभुञ्जीतनार्द्रपादस्तुसंविशेत् । आर्द्रपादस्तुभुञ्जानोदीर्घमायुरवाप्नुयात् ७६

प० । आर्द्रपादः तु भुंजीत न आर्द्रपादः तु संविशेत् आर्द्रपादः तु भुंजानः दीर्घं आयुः अवाप्नुयात् ॥

यो० । तुपुनः आर्द्रपादः भुंजीत आर्द्रपादः पुरुषः न संविशेत् — यतः आर्द्रपादः सन् भुंजानः पुरुषः दीर्घं आयुः अवाप्नुयात् — (लभते) ॥

भा० । ता० । जलसे आर्द्र (भीजे) हैं पाद जिसके ऐसा पुरुष भोजनकरै और पादहैं भीगे जिसके ऐसा पुरुष शयन (सोना) न करै—क्योंकि जो पाद धोकर भोजन करता है वह दीर्घ (अधिक) अवस्था को प्राप्तहोताहै ७६ ॥

अचक्षुर्विषयंदुर्गंनप्रमाद्येतकर्हिचित् । नविण्मूत्रंनिरीक्षेतनबाहुभ्यांनदींतरेत् ७७ ॥

प० । अचक्षुर्विषयं दुर्गं न प्रमाद्येत कर्हिचित् न विण्मूत्रं निरीक्षेत न बाहुभ्यां नदीं तरेत् ॥

यो० । अचक्षुर्विषयं दुर्गं कर्हिचित् न प्रमाद्येत (न आक्रमेत) विण्मूत्रं न निरीक्षेत — बाहुभ्यां नदीं न तरेत ॥

भा० । ता० । वृक्षलता आदिसे गहन (जिसकी भूमि न दीखे) वनमें न जाय क्योंकि उसमें छिपेहुये सर्पआदिकी संभावना होसक्ती है और विष्टा और मूत्रकोभी न देखे—और अपनी भुजाओं से नदीको न तरै ७७ ॥

अधितिष्ठेन्नकेशांस्तुनभस्मास्थिकपालिकाः ।
नकार्पासास्थिनतुषान्दीर्घमायुर्जिजीविषुः ७८ ॥

प० । अधितिष्ठेत् न केशान् तु न भस्मास्थिकपालिकाः न कार्पासास्थि न तुषान् दीर्घं आयुः जिजीविषुः ॥

यो० । दीर्घं आयुः जिजीविषुः पुरुषः केशान् — भस्मास्थिकपालिकाः न अधितिष्ठेत् कार्पासास्थि — तुषान् न अधितिष्ठेत् ॥

भा० । ता० । दीर्घ (अधिक) अवस्थातक जीवन की इच्छाकरनेवाला पुरुष केश—भस्म—अस्थि (हाड़) कपालिका (फूटेहुये मट्टीकेपात्रके टुकड़े) कपास के अस्थि (लकड़ी) और तुष इनपर न बैठे—अर्थात् ये सब बैठनेसे अवस्थाको नष्टकरतेहैं ७८ ॥

नसंवसेच्चपतितैर्नचाण्डालैर्नपुल्कसैः । नमूर्खैर्नावलिप्तैश्चनान्त्यैर्नान्त्यावसायिभिः ७९

प० । न संवसेत् च पतितैः न चाण्डालैः न पुल्कसैः न मूर्खैः न अवलिप्तैः च न अन्त्यैः न अन्त्यावसायिभिः ॥

यो० । पतितैः चाण्डालैः पुल्कसैः चपुनः अवलिप्तैः अन्त्यैः अन्त्यावसायिभिःसह न संविशेत् (नकुर्यात्) ॥

भा० । पतित—चांडाल—पुल्कस—मूर्ख—धन आदिसे अभिमानी—अन्त्य और अन्त्यावसायी—इनके संग एक स्थानमें न बैठे ॥

ता० । अन्यग्रामका वासी भी इनका संग न वसे अर्थात् एक वृक्षकी छाया आदि में इनके समीप न बैठे यही अधार्मिक ग्राममें न वसे—इनपूर्वोक्तसे भेदहै कि पतित—चांडाल पुल्कस

(जो निषादसे शूद्रा में पैदाहो) यही इसे वचनसे आगे मनु कहेंगे—मूर्ख—अवलिप्त (जिनको धनका अभिमानहो) और अन्त्यज (रजक आदि) अन्त्यावसायी (जो निषादकी स्त्रीमें चांडालसे पैदाहो) क्योंकि इसे वचनसे मनु आगे यहीकहेंगे ७९ ॥

नशूद्रायमतिंदद्यान्नोच्छिष्टंनहविष्कृतम् । नचास्योपदिशेद्धर्मंनचास्यव्रतमादिशेत् ८०

प० । न शूद्राय मतिं दद्यात् न उच्छिष्टं न हविष्कृतम् न च अस्य उपदिशेत् धर्मं न च अस्य व्रतं आदिशेत् ॥

यो० । शूद्राय मतिं उच्छिष्टं—हविष्कृतं न दद्यात चपुनः अस्य (शूद्रस्य) धर्मं न उपदिशेत्—चपुनः अस्य व्रतं अपि न आदिशेत (उपदिशेत) ॥

भा० । शूद्रको मति—उच्छिष्ट—और हविःका शेष न दे—और धर्मका उपदेश और प्रायश्चित्त उपदेश भी शूद्रको न दे ॥

ता० । शूद्रको मति न दे अर्थात् लौकिक अच्छा उपदेश न करे क्योंकि धर्मके उपदेशका पृथक् निषेधहै—और दाससे अन्य शूद्रको उच्छिष्ट न दे क्योंकि दासको उच्छिष्ट देना आगे मनुजी कहेंगे—यद्यपि द्विजके उच्छिष्ट भोजनहै यहतो शास्त्रसे विधिहै और दाताको शूद्र आदिको उच्छिष्टदेनेका निषेध है तथापि यथासंभव इनका विषय विभाग देखना चाहिये—और हविः (साकल्य) का शेष भी शूद्रको न दे—और शूद्रको धर्मका उपदेश भी न करे और प्रायश्चित्त रूप व्रतका उपदेश भी इसको साक्षात् न करे किंतु ब्राह्मणको बीचमें करके प्रायश्चित्त बतादे—क्योंकि अंगिराऋषि ने यह कहाहै कि धर्मपूर्वक शूद्रको मिलकर मध्य में ब्राह्मणको बैठाकर प्रायश्चित्तका उपदेशकरे अर्थात् संपूर्ण शूद्रके कर्तव्य धर्मको बतावे क्योंकि प्रायश्चित्त पद धर्ममात्रका उपलक्षणहै ८० ॥

योह्यस्यधर्ममाचष्टेयश्चैवादिशतिव्रतम् । सोऽसंवृतंनामतमःसहतेनैवगच्छति ८१ ॥

प० । यः हि अस्य धर्मं आचष्टे यः च आदिशति वा व्रतम् सः असंवृतं नाम तमः सह तेन एव गच्छति ॥

यो० । यः (ब्राह्मणः) अस्य (शूद्रस्य) धर्मं आचष्टे चपुनः यः व्रतं आदिशति सः असंवृतं नाम तमः (नरकं) तेन (शूद्रेण) सह एव गच्छति ॥

भा० । ता० । जो ब्राह्मण शूद्रको धर्म कहताहै और जो शूद्रको प्रायश्चित्तका उपदेश देताहै वे दोनों ब्राह्मण—उस शूद्रकेही साथ असंवृत नाम गहन नरकमें जातेहैं—पिछले पांचोंमें दोकाही कथन प्रायश्चित्तकी अधिकताके लियेहै ८१ ॥

नसंहताभ्यांपाणिभ्यांकण्डूयेदात्मनःशिरः । नस्पृशेच्चैतदुच्छिष्टोनचस्नायाद्विनाततः ८२

प० । न संहताभ्यां पाणिभ्यां कंडूयेत् आत्मनः शिरः न स्पृशेत् च एतत् उच्छिष्टः न च स्नायात् विना ततः ॥

---

१ जातोनिषादाच्छूद्रायां जात्याभवतिपुल्कसः ॥

२ निषादस्त्रीतुचांडालात्पुत्रमंत्यावसायिनम् ॥

३ सवर्णाचरनयाउच्छिष्टं अवंदातव्यम् ॥

४ तथाशूद्रं समासाद्य सदाधर्मपुरस्सरं अंतरा ब्राह्मणंकृत्वा प्रायश्चित्तं समादिशेत् ॥

यो० । संहताभ्यां पाणिभ्यां आत्मनः शिरः न कंडूयेत् — उच्छिष्टःसन् एतत् शिरः न स्पृशेत् — चपुनः ततः (शिरः) विना न स्नायात् ॥

भा० । मिलेहुये हाथोंसे अपने शिरको न खुजावे—और उच्छिष्टहुआ अपने शिरका स्पर्श भी न करै—और विनाशिर भिगोये स्नान भी न करै ॥

ता० । संहत (मिले) अपने दोनों हाथोंसे शिरको न खुजावे—और उच्छिष्टहुआ अपने शिरका स्पर्श भी न करै—और शिरके विना भिगोये स्नान भी न करै अर्थात् नित्य और नैमित्तिक स्नान न करै—किसी दृष्ट अर्थके लिये स्नानमें गात्रका प्रक्षालन करनेमें शिरको न भिगोवे तो कुछ दोष नहींहै—और यह स्नान भी उसीकोहै जो स्नान करनेमें समर्थहो—और अशक्तको तो जाबालि ऋषिने विना शिरकेही कर्म करनेके लिये कहाहै ८२ ॥

केशग्रहान्प्रहारांश्चशिरस्येतान्विवर्जयेत्।शिरःस्नातश्चतैलेननाङ्गंकिंचिदपिस्पृशेत्८३

प० । केशग्रहान् प्रहारान् च शिरसि एतान् विवर्जयेत् शिरःस्नातः च तैलेन न अंगं किंचित् अपि स्पृशेत् ॥

यो० । केशग्रहान् चपुनः प्रहारान् एतान् शिरसि विवर्जयेत् चपुनः शिरःस्नातः पुरुषः तैलेन किंचित् अपि अंगं न स्पृशेत् — अथवा तैलेनशिरस्नातः तैलेन किंचित् अपि अंगं न स्पृशेत् अत्रतैलेनेतिपदं देहलीदीपकन्यायेन उभयत्र संबध्यते ॥

भा० । क्रोधसे केशोंकाग्रहण और केशोंपरप्रहार इनदोनोंको वर्जदे—और शिरसहित स्नान करके किसीअंगका भी तैलसे स्पर्श न करै ॥

ता० । क्रोध से केशोंका ग्रहण और केशोंपर प्रहार इनको वर्जदे अर्थात् प्रीतिपूर्वक रति के समय कामिनीके केशोंका ग्रहण निषिद्धनहीं है और शिरसहित स्नानकरके अथवा तैलसे शिर सहित स्नानकरके किसी अंगकाभी तैलसे स्पर्श न करै इस दूसरे अर्थ में तैलपद दोनों ओर लगालेना—इसीसे जो शिरराज्ञि में विनातैल शिरसहित स्नानकरते हैं उनको तैलसे पादों का अभ्यंग दूषितनहींहै ८३ ॥

नराज्ञःप्रतिगृह्णीयादराजन्यप्रसूतितः । सूनाचक्रध्वजवतांवेषेणैवचजीवताम् ८४ ॥

प० । न राज्ञः प्रतिगृह्णीयात् अराजन्यप्रसूतितः सूनाचक्रध्वजवतां वेषेण एव च जीवताम् ॥

यो० । अराजन्यप्रसूतितः राज्ञः सकाशात् न प्रतिगृह्णीयात् सूनाचक्रध्वजवतां चपुनः वेषेण एव जीवतां — न प्रतिगृह्णीयात् ॥

भा० । जो राजा क्षत्रियसे पैदा न हो उस राजा का—और सौनिक (कसाई) तेली—करार और वेश बनाकर जीविका करनेवाले (नर्तक आदि) इन का प्रतिग्रह न ले ॥

ता० । क्षत्रियसे अन्य से पैदा हुये राजासे प्रतिग्रह न ले—और प्राणियों के वध (हिंसा) करने वाले अर्थात् जो पशुओं को मारकर मांस बेचकर जीविका करतेहैं चक्रवाले (तेली) ध्वज वाले (मदिरा बेचकर जीने वाले करारजिसे कहतेहैं) और वेश से जीविका करतेहैं अर्थात् जो पुरुष वा स्त्री किसी नर्तक आदि का वेश (रूप) बनाकर जीतेहैं—इनका भी प्रतिग्रह न ले ८४ ॥

१ आशिरस्कंभवेत्स्नानं स्नानाशक्तातुकर्मणाम् ॥

दशसूनासमंचक्रंदशचक्रसमोध्वजः । दशध्वजसमोवेशोदशवेशसमोनृपः८५ ॥

प० । दशसूनासमं चक्रं दशचक्रसमः ध्वजः दशध्वजसमः वेशः दशवेशसमः नृपः ॥

यो० । चक्रं दशसूनासमं — ध्वजः दशचक्रसमः — वेशः दशध्वजसमः — नृपः दशवेशसमः — भवतीति सर्वत्र योज्यम् ॥

भा० । दशहिंसकों के समान एकचक्र—और दश चक्रोंके समान एकध्वज—और दशध्वजों के समान एक वेश—और दश वेशोंके समान एक राजा होताहै ॥

ता० । इस श्लोकमें सूना आदि शब्दोंसे सूना आदिके करनेवाले लेतेहैं—दशसूना करने वालोंके प्रतिग्रह लेनेमें जितना दोषहै उतनाही एक चक्रके प्रतिग्रह में है—और दश चक्रोंके प्रतिग्रहमें जो दोषहै उतनाही एकध्वजके प्रतिग्रहमेंहै—और जितना दशध्वजोंके प्रतिग्रहमें दोष है उतनाही एक वेशके प्रतिग्रहमेंहै—और जितना दश वेशोंके प्रतिग्रह में दोषहै उतनाही एक राजाके प्रतिग्रहमेंहै—यहांगोविंराजतो—दशवेश्यासमोनृपः—यह पाठ पढ़तेहैं अर्थात् दश वेश्याओंके तुल्य राजाके प्रतिग्रह में दोषहै—और मेधातिथि आदि तो पूर्वोक्तही पाठपढ़तेहैं ८५ ॥

दशसूनासहस्राणियोवाहयतिसौनिकः । तेनतुल्यःस्मृतोराजाघोरस्तस्यप्रतिग्रहः ८६

प० । दश सूनासहस्राणि यः वाहयति सौनिकः तेन तुल्यः स्मृतः राजा घोरः तस्य प्रतिग्रहः ॥

यो० । यः सौनिकः दशसूनासहस्राणि वाहयति (यतः) राजा तेन तुल्यः (मन्वादिभिः) स्मृतः (अतः) तस्य प्रतिग्रहः घोरः भवतीतिशेषः ॥

भा० । ता० । जो सौनिक इसप्रकार संकलना (जोड़) से दशसहस्र सूना (हत्या) अपनेनिमित्त प्रतिदिन करताहै उसके तुल्य राजा मनु आदिने कहाहै इससे उसका प्रतिग्रह घोर (भयानक) है ८६ ॥

योराज्ञःप्रतिगृह्णातिलुब्धस्योच्छास्त्रवर्तिनः । सपर्यायेणयातीमान्नरकानेकविंशतिम् ८७

प० । यः राज्ञः प्रतिगृह्णाति लुब्धस्य उच्छास्त्रवर्तिनः सः पर्यायेण याति इमान् नरकान् एकविंशतिम् ॥

यो० । यः लुब्धस्य उच्छास्त्रवर्तिनः राज्ञः सकाशात् प्रतिगृह्णाति सः पर्यायेण (क्रमशः) इमान् एकविंशतिं नरकान् याति (गच्छति) ॥

भा० । ता० । जो मनुष्य लोभी और शास्त्र के अवलंघनसे वर्तते हुये राजा का प्रतिग्रहलेता है वह क्रमसे इन इक्कीस नरकों में जाताहै ८७ ॥

तामिस्रमन्धतामिस्रंमहारौरवरौरवौ । नरकंकालसूत्रंचमहानरकमेवच ८८ ॥
संजीवनंमहावीचिंतपनंसंप्रतापनम् । संहातंचसकाकोलंकुड्मलंप्रतिमूर्तिकम् ८९ ॥
लोहशंकुमृजीषंचपन्थानंशाल्मलींनदीम् । असिपत्रवनंचैवलोहदारकमेवच ९० ॥

प० । तामिस्रं अन्धतामिस्रं महारौरवरौरवौ नरकं कालसूत्रं च महानरकं एव च ॥

प० । संजीवनं महावीचिं तपनं संप्रतापनं संहातं च सकाकोलं कुड्मलं प्रतिमूर्तिकम् ॥

प० । लोहशंकुं ऋजीषं च पंथानं शाल्मलीम् नदीम् असिपत्रवनं च एव लोहदारकं एव च ॥

यो० । तामिस्रं — अन्धतामिस्रं — महारौरवरौरवौ — नरकं कालसूत्रं — चपुनः महानरकं + संजीवनं — महावीचिं —

तपनं--संप्रतापनं — सकाकोलं — संहातं--कुड्मलं--प्रतिमूर्त्तिकम्--लोहशंकुं--चपुनःऋजीषं पंथानं--शाल्मलीं नदीं--चपुनः असिपत्रवनं — चपुनः लोहदारकं — क्रमेण इमान् नरकान् यातीत्यर्थः ॥

भा० । ता० । पिछले श्लोकमें जो इक्कीस नरक सामान्यसे कहे हैं उनके नाम तीनश्लोकों से दिखातेहैं और इनकास्वरूप पुराणों में विस्तारसे कहाहै इससे यहांपर नहीं कहते हैं—जो उक्त राजाका प्रतिग्रह लेताहै वह इनइक्कीसनरकोंमें जाताहै—कि तामिस्र १ अन्धतामिस्र २ महारौरव ३ रौरव ४ नरक ५ कालसूत्र ६ महानरक ७ संजीवन ८ महावीचि ९ तपन १० संप्रतापन ११ संहात १२ काकोल १३ कुड्मल १४ प्रतिमूर्त्तिक १५ लोहशंकु १६ ऋजीष-पंथा १७ शाल्मली १८ वैतरणीनदी १९ असिपत्रवन २० और लोहदारक२१+८८।८९ । ९०

एतद्विदन्तोविद्वांसोब्राह्मणाब्रह्मवादिनः ।
नराज्ञःप्रतिगृह्णन्तिप्रेत्यश्रेयोऽभिकांक्षिणः ९१ ॥

प० । एतत् विदंतः विद्वांसः ब्राह्मणाः ब्रह्मवादिनः न राज्ञः प्रतिगृह्णंति प्रेत्य श्रेयोभिकांक्षिणः ॥

यो० । प्रेत्य श्रेयोभिकांक्षिणः एतद्विदंतः विद्वांसः ब्रह्मवादिनः ब्राह्मणाः राज्ञः न प्रतिगृह्णंति ॥

भा० । यहीजानते—विद्वान्—ब्रह्मवादी—परलोकमें कल्याण के अभिलाषी ब्राह्मण राजाका प्रतिग्रह नहींलेतेहैं ॥

ता० । राजाका प्रतिग्रह अनेक नरकों का हेतु है यहजानतेहुये और धर्मशास्त्र और पुराण आदि के ज्ञाता और जन्मांतर में कल्याण के अभिलाषी—और वेद के ज्ञाता ब्राह्मण राजा का प्रतिग्रह नहीं लेतेहैं—और आगे यहकहेंगे कि मूर्खप्रतिग्रहसे डरै इसमें विद्वानको प्रतिग्रहलेने में अत्यन्त दोषनहीं है—परन्तु राजाका प्रतिग्रह विद्वानोंको भी निषिद्ध है और अधिक पाप काहेतुहै इसीसे इसश्लोकमें विद्वान् और ब्रह्मवादिदोनोंको राजाकाप्रतिग्रह निषिद्धकहाहै ९१ ॥

ब्राह्मेमुहूर्तेबुध्येतधर्मार्थौचानुचिन्तयेत् । कायक्लेशांश्चतन्मूलान्वेदतत्त्वार्थमेवच ९२ ॥

प० । ब्राह्मे मुहूर्ते बुध्येत धर्मार्थौ च अनुचिंतयेत् कायक्लेशान् च तन्मूलान् वेदतत्त्वार्थं एव च ॥

यो० । ब्राह्मे मुहूर्ते बुध्येत — चपुनः धर्मार्थौ चपुनः तन्मूलान् (धर्मार्थहेतून्) कायक्लेशान् — चपुनः वेदतत्त्वार्थं अनुचिंतयेत् ॥

भा० । ब्राह्म मुहूर्तमें जगे और धर्म और अर्थकी चिंताकरै और धर्म अर्थ के कारण देहके क्लेश और वेदके तत्त्वार्थ (ब्रह्म) का चिंतनभी ब्राह्म मुहूर्त्तमेंहीकरै ॥

ता० । रात्रि के पिछले पहरको मुहूर्त कहतेहैं क्योंकि यहां मुहूर्तशब्द समयका बोधक है और उसमुहूर्त को ब्राह्म इससे कहतेहैं कि उसमें ब्राह्मी (बुद्धि) का ज्ञान अधिक होताहै उस ब्राह्म मुहूर्त्तमें सोनेसे जगे क्योंकि दक्ष ऋषिने भी यह कहकर प्रभात में जगनाकहाहै कि—पीछले दोपहर प्रदोषहोतेहैं उन दोनोंको वेदके अभ्याससे बितावे क्योंकि दोपहरही जो सोताहै वह ब्रह्मभावको प्राप्तहोताहै और गोविंदराजने तो यह कहाहै कि रात्रिके पिछले मुहूर्त्तमें जगे—और परस्परके अविरोधसे धर्म अर्थका निश्चयभी उसीसमय करले और धर्म और अर्थके संपा-

---

१ प्रदोषपश्चिमौयामौ वेदाभ्यासेन तौ नयेत् प्रहरद्वयं शयानोहिब्रह्मभूयाय कल्पते ॥

दक कायाके क्लेश आदिका भी निर्णय करले अर्थात् जिसकाममें कायाको क्लेश अधिकहो और धर्म और अर्थ अल्पहोंय तो उसकर्मको न करै—और वेदके तत्त्व अर्थ (कर्मस्वरूप ब्रह्म) का निश्चयकरै क्योंकि बुद्धिका प्रकाश उसीसमय होताहै ९२ ॥

उत्थायावश्यकंकृत्वाकृतशौचःसमाहितः । पूर्वांसंध्यांजपंस्तिष्ठेत्स्वकालेचापरांचिरम् ९३

प० । उत्थाय आवश्यकं कृत्वा कृतशौचः समाहितः पूर्वां संध्यां जपन् तिष्ठेत् स्वकाले च अपरां चिरम् ॥

यो० । शय्यायाः उत्थाय आवश्यकं (मलोत्सर्गादि) कृत्वा कृतशौचः समाहितः (द्विजः) पूर्वां संध्यां--चपुनः अपरां संध्यां स्वकाले चिरं गायत्रीजपन् सन् तिष्ठेत ॥

भा० । ता० । प्रभातकेसमय शय्यासे उठकर और आवश्यक मलमूत्रको त्यागकर सावधान द्विज प्रातःकालकी और सायंकालकी संध्याके शास्त्रोक्त समयमें चिरकालतक गायत्रीका जपकरताहुआ द्विज बैठारहे ९३ ॥

ऋषयोदीर्घसंध्यत्वाद्दीर्घमायुरवाप्नुयुः । प्रज्ञांयशश्चकीर्तिंचब्रह्मवर्चसमेवच ९४ ॥

प० । ऋषयः दीर्घसंध्यत्वात् दीर्घं आयुः अवाप्नुयुः प्रज्ञां यशः च कीर्तिं च ब्रह्मवर्चसं एव च ॥

यो० । यतः दीर्घसंध्यत्वात् ऋषयः दीर्घं आयुः प्रज्ञां — चपुनः यशः चपुनः कीर्तिं — चपुनः ब्रह्मवर्चसं अवाप्नुयुः तस्मात् चिरंसंध्यां उपासीत — संध्या शब्दोत्रसंध्यानुष्ठेयजपादिबोधकः ॥

भा० । ता० । जिससे ऋषि चिरकालतक संध्याकेसमय गायत्रीके जप आदिकरनेसे अधिक अवस्था—प्रजा—और जीवते समय यश और अचल कीर्ति और अध्ययन आदिसे ब्रह्मतेजको प्राप्तहुये—तिससे संध्याके समय चिरकालतक गायत्रीका जपकरै ९४ ॥

श्रावण्यांप्रौष्ठपद्यांवाप्युपाकृत्ययथाविधि ।
युक्तश्छन्दांस्यधीयीतमासान्विप्रोऽर्द्धपञ्चमान् ९५ ॥

प० । श्रावण्यां प्रौष्ठपद्यां वा अपि उपाकृत्य यथाविधि युक्तः छंदांसि अधीयीत मासान् विप्रः अर्द्धपंचमान् ॥

यो० । श्रावण्यां वा प्रौष्ठपद्यां यथाविधि उपाकृत्य (उपाकर्म कृत्वा) विप्रः युक्तः सन् अर्द्धपंचमान् मासान् छंदांसि अधीयीत---(पठेत्) ॥

भा० । ता० । श्रावण अथवा भाद्रपद की पूर्णिमाको यथाविधि (शास्त्रोक्तरीति) से उपाकर्म (जो सलूनोंको वेदपाठी करतेहैं) करके सावधानी से साढ़ेचारमहीनेतक वेदोंकोपढ़े ९५ ॥

पुष्येतुछन्दसांकुर्याद्बहिरुत्सर्जनंद्विजः । माघशुक्लस्यवाप्राप्तेपूर्वाह्णेप्रथमेऽहनि ९६ ॥

प० । पुष्ये तु छंदसां कुर्यात् बहिः उत्सर्जनं द्विजः माघशुक्लस्य वा प्राप्ते पूर्वाह्णे प्रथमे अहनि ॥

यो० । द्विजः पुष्ये वा माघशुक्लस्य प्रथमे अहनि पूर्वाह्णे प्राप्ते सति छंदसां बहिः उत्सर्जनं कुर्यात् ॥

भा० । ता० । साढ़ेचारमहीने बीतेपर जो पुष्य नक्षत्रआवे उसदिन ग्रामसे बाहर जाकर अपने गृह्यसूत्रके अनुसार उत्सर्ग नाम कर्मको द्विजकरै अथवा माघशुदि प्रतिपदाको पूर्वाह्ण

के समय करै—और माघ शुक्लमें वही मनुष्यकरै जिसने भाद्रपदकी पूर्णिमाको उपाकर्म न कियाहो ९६ ॥

यथाशास्त्रंतुकृत्वैवमुत्सर्गंछन्दसांवहिः । विरमेत्पक्षिणींरात्रिंतदेवैकमहर्निशम् ९७॥

प० । यथाशास्त्रं तु कृत्वा एवं उत्सर्गं छंदसां वहिः विरमेत् पक्षिणीं रात्रिं तत् एव एकं अहर्निशम् ॥

यो० । एवं यथाशास्त्रं वहिः छंदसां उत्सर्गं कृत्वा पक्षिणीं रात्रिं अथवा तत् एव एकं अहर्निशं विरमेत्—अध्ययनं न कुर्यादितिभावः ॥

भा० । ता० । इसप्रकार शास्त्रके अनुसार ग्रामसे बाहर वेदोंका उत्सर्ग रूप कर्म करके पक्षिणी रात्रि अर्थात् उत्सर्ग के दिन और अगलेदिन और बीचकी रात्रिभर अध्ययन न करै अथवा उसी उत्सर्ग के दिनरातमें अध्ययन न करै ९७ ॥

अतऊर्ध्वंतुछन्दांसिशुक्लेषुनियतःपठेत् । वेदाङ्गानिचसर्वाणिकृष्णपक्षेपुसंपठेत् ९८ ॥

प० । अतः ऊर्ध्वं तु छंदांसि शुक्लेषु नियतः पठेत् वेदांगानि च सर्वाणि कृष्णपक्षेषु संपठेत् ॥

यो० । अतः ऊर्ध्वं शुक्लेषु छंदांसि नियतः सन् पठेत्—चपुनः सर्वाणि वेदांगानि कृष्णपक्षेषु संपठेत् ॥

भा० । ता० । उत्सर्ग के अनध्यायके अनन्तर शुक्लपक्ष में मंत्र ब्राह्मणात्मक वेदोंको और कृष्णपक्ष में सम्पूर्ण वेदांगों (व्याकरण आदि) को नियतहोकर (नियमसे) पढ़ै ९८ ॥

नाविस्पष्टमधीयीतनशूद्रजनसन्निधौ । ननिशान्तेपरिश्रान्तोब्रह्माधीत्यपुनःस्वपेत् ९९

प० । न अविस्पष्टं अधीयीत न शूद्रजनसन्निधौ न निशान्ते परिश्रान्तः ब्रह्म अधीत्य पुनः स्वपेत् ॥

यो० । अविस्पष्टं शूद्रजनसन्निधौ न अधीयीत निशान्ते ब्रह्म अधीत्य परिश्रान्तः सन् पुनः न स्वपेत् ॥

भा० । ता० । जिसमें वर्ण और स्वर स्पष्टनहीं ऐसा न पढ़ै और शूद्रकेसमीपभी न पढ़ै और रात्रि के पिछलेपहर में वेदको पढ़कर श्रान्त (थका) हुआ मनुष्य फिर न सोवै ९९ ॥

यथोदितेनविधिनानित्यंछन्दस्कृतंपठेत् । ब्रह्मछन्दस्कृतंचैवद्विजोयुक्तोह्यनापदि १००॥

प० । यथोदितेन विधिना नित्यं छन्दस्कृतं पठेत् ब्रह्म छंदस्कृतं च एव द्विजः युक्तः हि अनापदि ॥

यो० । युक्तः द्विजः यथोदितेन विधिना छन्दस्कृतं (गायत्र्यादिछन्दोयुक्तमंत्रमात्रं) नित्यं पठेत्- अनापदि (सम्यक्करणादौसति) ब्रह्म (ब्राह्मणं) चपुनः छन्दस्कृतं (मंत्रजातं) पठेत् ॥

भा० । ता० । शास्त्रोक्त विधिसे द्विज सावधान होकर गायत्रीआदि छन्दसहित सबमंत्रों को प्रतिदिन पढ़ै और आपत्ति का अभाव (स्वस्थता) होय तो ब्रह्म (ब्राह्मण) और उक्त छंदोंसहित सब मंत्रोंको पढै १०० ॥

इमान्नित्यमनध्यायानधीयानोविवर्जयेत् । अध्यापनंचकुर्वाणःशिष्याणांविधिपूर्वकम् १०१

प० । इमान् नित्यं अनध्यायान् अधीयानः विवर्जयेत् अध्यापनं च कुर्वाणः शिष्याणां विधिपूर्वकं ॥

यो० । अधीयानः (शिष्यः) चपुनः शिष्याणां विधिपूर्वकं अध्यापनं कुर्वाणः (गुरुः) इमान् अनध्यायान् नित्यं विवर्जयेत् ॥

भा० । ता० । वेदोंको पढ़ताहुआ शिष्य और शिष्योंको विधिपूर्वक वेदपढ़ाताहुआ गुरु इन अनध्यायोंको नित्य (सदा) वर्जेदे १०१ ॥

कर्णश्रवेऽनिलेरात्रौदिवापांसुसमूहने । एतौवर्षास्वनध्यायावध्यायज्ञाःप्रचक्षते १०२॥

प० । कर्णश्रवे अनिले रात्रौ दिवा पांसुसमूहने एतौ वर्षासु अनध्यायौ अध्यायज्ञाः प्रचक्षते ॥

यो० । रात्रौ कर्णश्रवे-दिवा पांसुसमूहने अनिलेसति-अध्यायज्ञाः वर्षासु एतौ अनध्यायौ प्रचक्षते (कथयंति) ॥

भा० । ता० । यदि रात्रिमें ऐसा पवन चले जिसका शब्द कानोंमें सुने और दिनमें ऐसा चले जो पृथिवीकी धूलको भी उड़ासके—तो इन दो अनध्यायों को पढ़ानेकी विधिके जानने वाले मुनि कहतेहैं—गोविंदराज तो यह कहतेहैं कि सुना कानोंसेही जाता है इससे कर्णश्रव—पदसे अत्यंत पवन चलना लेतेहैं १०२ ॥

विद्युत्स्तनितवर्षेषुमहोल्कानांचसंप्लवे । आकालिकमनध्यायमेतेषुमनुरब्रवीत् १०३ ॥

प० । विद्युत्स्तनितवर्षेषु महोल्कानां च संप्लवे आकालिकं अनध्यायं एतेषु मनुः अब्रवीत् ॥

यो० । विद्युत्स्तनितवर्षेषु-चपुनः महोल्कानांसंप्लवे सति एतेषु आकालिकं अनध्यायं मनुः अब्रवीत् ॥

भा० । ता० । बिजली और गर्जकर वर्षा—और बड़ी उल्काओं के जहां तहां पड़ने से—इन अनध्यायोंको मनुने आकालिक (अर्थात् अगलेदिन उसीसमय तक) कहाहै १०३ ॥

एतांस्त्वभ्युदितान्विद्याद्यदाप्रादुष्कृताग्निषु।तदाविद्यादनध्यायमनृतौचाभ्रदर्शने १०४

प० । एतान् तु अभ्युदितान् विद्यात् यदा प्रादुष्कृताग्निषु तदा विद्यात् अनध्यायं अनृतौ च अभ्रदर्शने ॥

यो० । प्रादुष्कृताग्निषु सत्सु एतान् (विद्युतादीन) अभ्युदितान (युगपदुत्पन्नान) यदा विद्यात् जानीयात् तदा वर्षासु अनध्यायं कुर्यात् न सर्वदा चपुनः अनृतौ अभ्रदर्शने सति अनध्यायं कुर्यात् (न वर्षासु) ॥

भा० । ता० । जब होमकेलिये अग्नि प्रज्वलितकरलीहो और ये विद्युत् आदि उत्पन्नहुयेजाने तो वर्षाकाल में अनध्याय माने—और जो वर्षाऋतु न होय तो मेघके दर्शनसेही अनध्यायमाने और वर्षाके समय में मेघके दर्शन से अनध्याय न माने १०४ ॥

निर्घातेभूमिचलनेज्योतिषांचोपसर्जने।एतानाकालिकान्विद्यादनध्यायानृतावपि १०५

प० । निर्घाते भूमिचलने ज्योतिषां च उपसर्जने एतान् आकालिकान् विद्यात् अनध्यायान् ऋतौ अपि ॥

यो० । निर्घाते- भूमिचलने--चपुनः ज्योतिषां उपसर्जने सति — एतान् अनध्यायान् ऋतौ अपि आकालिकान् विद्यात् (जानीयात्) ॥

भा० । ता० । आकाश में उत्पात का शब्दहो--भूकंप—और सूर्य चंद्र तारागण आदि का उपसर्ग (युद्ध)होय तो इन अनध्यायोंको ऋतु (वर्षा) में भी आकालिक जाने ऋतुमें भी यह

कहनेसे यह सूचितकिया कि जो यह कहतेहैं कि वर्षामें भूकंप आदि का दोष नहीं है सो ठीक नहीं है १०५ ॥

प्रादुष्कृतेष्वग्निषुतुविद्युत्स्तनितनिःस्वने।सज्योतिःस्यादनध्यायःशेषेरात्रौयथादिवा १०६

प० । प्रादुष्कृतेषु अग्निषु तु विद्युत्स्तनितनिःस्वने सज्योतिः स्यात् अनध्यायः शेषे रात्रौ यथा दिवा ॥

यो० । अग्निषु प्रादुष्कृतेषु विद्युत्स्तनितनिःस्वनेसति सज्योतिः अनध्यायः स्यात् — रात्रौ शेषे (पूर्वोक्त त्रितयेजाते सति यथा दिवा तथारात्रौ अपि अहोरात्र एव अनध्यायइत्यर्थः ॥

भा० । ता० । होमकेलिये अग्नि प्रज्वलितकर रक्खीहो और प्रातःकाल की संध्या के समय बिजली— गर्जन—और वर्षा तीनोंहोजायँ तो सज्योति (सूर्यास्तपर्यंत) अनध्याय होताहै और यदि रात्रिके समय पूर्वोक्त विद्युत् आदि तीनों होयँ तो जैसे दिनमें तैसेही रात्रिमें भी सज्योति अनध्याय होताहै अर्थात् इतने तारागणोंकी ज्योतिरहै तबतक होताहै १०६ ॥

नित्यानध्यायएवस्याद्ग्रामेपुनगरेषुच । धर्मनैपुण्यकामानांपूतिगंधेचसर्वदा १०७ ॥

प० । नित्यानध्यायः एव स्यात् ग्रामेषु नगरेषु च धर्मनैपुण्यकामानां पूतिगंधे च सर्वदा ॥

यो० । धर्मनैपुण्यकामानां (पुरुषाणां) ग्रामेषु चपुनः नगरेषु पूतिगंधेसति सर्वदा नित्यानध्यायः एव स्यात् ॥

भा० । ता० । जो धर्म में निपुणहोनेकीहै कामनाजिनको ऐसे मनुष्योंको—कुत्सित (बुरी) गंधआनेपर ग्राम अथवा नगरोंमें नित्य और सब ऋतुओंमें अनध्यायहोताहै और जिन्हें विद्या में निपुणताकी इच्छाहै उनको नहींहोता—जो शिष्य वेदपढ़कर अदृष्टकोचाहतेहैं वे धर्मनिपुण और प्रथम पढ़कर विद्यावृद्धि के निमित्त वेदका अभ्यास करतेहैं वे विद्यानिपुण होतेहैं १०७ ॥

अन्तर्गतशवेग्रामेवृषलस्यचसन्निधौ । अनध्यायोरुद्यमानेसमवायेजनस्यच १०८ ॥

प० । अन्तर्गतशवे ग्रामे वृषलस्य च सन्निधौ अनध्यायः रुद्यमाने समवाये जनस्य च ॥

यो० । अंतर्गतशवे ग्रामे—चपुनः वृषलस्यसन्निधौ — रुद्यमाने चपुनः जनस्य समवायेसति अनध्यायः भवति ॥

भा० । ता० । जिस ग्राममें शवपड़ाहो वहां और वृषल (अधार्मिक) के समीप और रोनेका शब्द सुननेपर—और बहुतजनोंके समूह होनेपर—अनध्यायहोताहै—और यहां वृषलपदसे अधर्मी लेना क्योंकि शूद्रके समीप पढ़नेको निषेध (न शूद्रजनसन्निधौ) इससे करआयेहैं १०८ ॥

उदकेमध्यरात्रेचविण्मूत्रस्यविसर्जने । उच्छिष्टःश्राद्धभुक्चैवमनसापिनचिन्तयेत् १०९

प० । उदके मध्यरात्रे च विण्मूत्रस्य विसर्जने उच्छिष्टः श्राद्धभुक् च एव मनसा अपि न चिंतयेत् ॥

यो० । उदके — चपुनः मध्यरात्रे — विण्मूत्रस्य विसर्जने सति — उच्छिष्टः चपुनः श्राद्धभुक मनुष्यः मनसा अपि वेदं न चिंतयेत् किंपुनः कंठतः ॥

भा० । जलमें—और रात्रि के मध्यमें और विष्टा और मूत्रके त्यागके समय—और उच्छिष्ट होकर और श्राद्धका भोजनकरनेवाला—मनसे भी वेदका चिंतन न करे ॥

ता० । जलके मध्यमें और मध्यरात्र (चारमुहूर्त रात्रिके मध्य) में क्योंकि इसी वचनसे गौतम ऋषिने चारमुहूर्तही कहेहैं—और गोविंदराजने तो रात्रिके मध्यके दोप्रहर कहेहैं—और विष्ठा और मूत्रके त्यागके समय—और जिससमय भोजन आदिसे उच्छिष्टहो—और श्राद्धका भोक्ता अर्थात् निमंत्रणसे लेकर श्राद्धके भोजनकरानेदिनमें मनसे भी वेदका चिंतन (स्मरण व पठन) न करै अर्थात् कंठसे तो कदाचित् भी न करै १०९ ॥

प्रतिगृह्यद्विजोविद्वानेकोद्दिष्टस्यकेतनम् । त्र्यहंनकीर्तयेद्ब्रह्मराज्ञोराहोश्चसूतके ११० ॥

प० । प्रतिगृह्य द्विजः विद्वान् एकोद्दिष्टस्य केतनं त्र्यहं न कीर्तयेत् ब्रह्म राज्ञः राहोः च सूतके ॥

यो० । विद्वान् द्विजः एकोद्दिष्टस्यकेतनं (निमंत्रणं) प्रतिगृह्य राज्ञः चपुनः राहोः सूतके त्र्यहं ब्रह्म (वेदं) न कीर्तयेत् (न पठेत्) ॥

भा० । ता० । विद्वान् ब्राह्मण एकोद्दिष्टके निमंत्रणको ग्रहण (मान) करके—और राजाके पुत्र जन्म आदिके और राहुके सूतकमें अर्थात् चंद्रमा और सूर्यके ग्रहणमें तीनदिनतक वेदको न पढ़ै ११० ॥

यावदेकानुदिष्टस्यगन्धोलेपश्चतिष्ठति । विप्रस्यविदुषोदेहेतावद्ब्रह्मनकीर्तयेत् १११ ॥

प० । यावत् एकानुदिष्टस्य गंधः लेपः च तिष्ठति विप्रस्य विदुषः देहे तावत् ब्रह्म न कीर्तयेत् ॥

यो० । एकानुदिष्टस्य गंधः चपुनः लेपः यावत् विदुषः विप्रस्य देहे तिष्ठति तावत् ब्रह्म न कीर्तयेत् ॥

भा० । ता० । इतने एक भी उच्छिष्ट कुंकुम आदिकी गंध अथवा लेप विद्वान् ब्राह्मणके देह पर लगीरहै तबतक श्राद्धके पीछे भी वेदको न पढ़ै १११ ॥

शयानःप्रौढपादश्चकृत्वाचैवावसक्थिकाम् ।नाधीयीतामिषंजग्ध्वासूतकान्नाद्यमेवच ११२

प० । शयानः प्रौढपादः च कृत्वा च एव अवसक्थिकाम् न अधीयीत आमिषं जग्ध्वा सूतकान्नाद्यं एव च ॥

यो० । शयानः चपुनः प्रौढपादः चपुनः अवसक्थिकां कृत्वा — आमिषं चपुनः सूतकान्नाद्यं जग्ध्वा वेदं न अधीयीत ॥

भा० । ता० । शय्यापर सोताहुआ—आसनपर चरण फैलाये—और गोड़े खड़े किये और मांस और जन्म मरण सूतकके अन्नको भक्षणकरके वेदको न पढ़ै ११२ ॥

नीहारेबाणशब्देचसंध्ययोरेवचोभयोः । अमावस्याचतुर्दश्योःपौर्णमास्यष्टकासुच ११३

प० । नीहारे बाणशब्दे च संध्ययोः एव च उभयोः अमावस्याचतुर्दश्योः पौर्णमास्यष्टकासु च ॥

यो० । नीहारे चपुनः बाणशब्दे — चपुनः उभयोः संध्ययोः — अमावस्याचतुर्दश्योः चपुनः पौर्णमास्यष्टकासु — वेदं न अधीयीत ॥

भा० । ता० । बहुत धूलीके समय—और बाणके शब्दहोनेपर और प्रातःकाल और संध्याकालकी दोनों संध्याओं में—मावस और चौदसको और पूर्णिमा और अष्टमीको—वेद न पढ़ै—कोई यहांपर बाण शब्दसे वीणा और अष्टका शब्दसे अष्टमी लेतेहैं ११३ ॥

---

१ निशायांच चतुर्मुहूर्तम् ॥

अमावस्यागुरुंहन्तिशिष्यंहन्तिचतुर्दशी ।
ब्रह्माष्टकापौर्णमास्यौतस्मात्ताःपरिवर्जयेत् ११४ ॥

प० । अमावस्या गुरुं हंति शिष्यं हंति चतुर्दशी ब्रह्म अष्टकापौर्णमास्यौ तस्मात् ताः परिवर्जयेत् ॥

यो० । अमावस्यागुरुं — चतुर्दशी शिष्यं हंति — अष्टकापौर्णमास्यौ ब्रह्म (वेदं) हतः तस्मात् ताः परिवर्जयेत् ॥

भा० । ता० । अमावस्या गुरुको और चतुर्दशी शिष्यको और अष्टका और पूर्णमासी वेदको नष्टकरती हैं तिससे उन सबको वेदके पढ़ने पढ़ानेमें वर्जदे ११४ ॥

पांशुवर्षेदिशांदाहेगोमायुविरुतेतथा । श्वखरोष्ट्रेचरुवतिपंक्तौचनपठेद्द्विजः ११५ ॥

प० । पांशुवर्षे दिशां दाहे गोमायुविरुते तथा श्वखरोष्ट्रे च रुवति पंक्तौ च न पठेत् द्विजः ॥

यो० । पांशुवर्षे — दिशांदाहे — तथा गोमायुविरुते — चपुनः श्वखरोष्ट्रे रुवति (सति) चपुनः पंक्तौ द्विजः न पठेत् - वेदमितिशेषः ॥

भा० । ता० । धूलीकी वर्षामें—दिशाओंके दाहमें और सृगाल (गीदड़) के और कुत्ता—खर ऊंट इनके रोनके समय—और इनकी पंक्तिमें द्विज वेदको न पढ़े ११५ ॥

नाधीयीतश्मशानान्तेग्रामान्तेगोव्रजेऽपिवा।वसित्वामैथुनंवासःश्राद्धिकंप्रतिगृह्यच ११६

प० । न अधीयीत श्मशानान्ते ग्रामान्ते गोव्रजे अपि वा वसित्वा मैथुनं वासः श्राद्धिकं प्रतिगृह्य च ॥

यो० । श्मशानान्ते — ग्रामान्ते — वा गोव्रजे अपि — मैथुनं वासः वसित्वा चपुनः श्राद्धिकं प्रतिगृह्य वेदं न अधीयीत ॥

भा० । ता० । श्मशान और ग्रामके समीप और गोशालामें—और मैथुनके समय धारण किये वस्त्रको धारणकरके और श्राद्धका प्रतिग्रह लेकर—वेदको न पढ़े ११६ ॥

प्राणिवायदिवाऽप्राणियत्किंचिच्छ्राद्धिकंभवेत् ।
तदालभ्याप्यनध्यायःपाण्यास्योहिद्विजःस्मृतः ११७ ॥

प० । प्राणि वा यदि वा अप्राणि यत् किंचित् श्राद्धिकं भवेत् तत् आलभ्य अपि अनध्यायः पाण्यास्यः हि द्विजः स्मृतः ॥

यो० । प्राणि वा अप्राणि यत् किंचित् श्राद्धिकं भवेत् तत् आलभ्य (गृहीत्वा) अपि अनध्यायः भवति — हि (यतः) द्विजः पाण्यास्यः मन्वादिभिः स्मृतः ॥

भा० । ता० । श्राद्धके अन्न आदिको खाकर अनध्यायहोताहै यह पहिले कहाहै—श्राद्धकीवस्तु प्राणीहो अथवा प्राणी नहो उस सबको लेकर अनध्याय होताहै क्योंकि ब्राह्मणका हाथही मुख मनु आदिने कहाहै ११७ ॥

चोरैरुपप्लुतेग्रामेसंभ्रमेचाग्निकारिते । आकालिकमनध्यायंविद्यात्सर्वाद्भुतेषुच ११८॥

प० । चौरैः उपप्लुते ग्रामे संभ्रमे च अग्निकारिते आकालिकं अनध्यायं विद्यात् सर्वाद्भुतेषु च ॥

यो० । चौरैः उपप्लुते ग्रामे चपुनः अग्निकारिते संभ्रमे चपुनः सर्वाद्भुतेषु आकालिकं अनध्यायं विद्यात् ॥

भा० । ता० । चोरोंसे उपप्लुत (युक्त) ग्राममें और अग्नि के दाहसे भयके समय—और आकाश अथवा भूमिके संपूर्ण अद्भुत उत्पातोंके समय भी आकालिक अनध्याय जानना ११८ ॥

उपाकर्मणिचोत्सर्गेत्रिरात्रंक्षेपणंस्मृतम् । अष्टकासुत्वहोरात्रमृत्वन्तासुचरात्रिषु ११९॥

प० । उपाकर्मणि च उत्सर्गे त्रिरात्रं क्षेपणं स्मृतम् अष्टकासु तु अहोरात्रं ऋत्वन्तासु च रात्रिषु ॥

यो० । उपाकर्मणि चपुनः उत्सर्गे त्रिरात्रं क्षेपणं (त्याग) स्मृतम् — तुपुनः अष्टकासु चपुनः ऋत्वन्तासु रात्रिषु अहोरात्रं क्षेपणं स्मृतम् — मन्वादिभिरितिशेषः ॥

भा० । उपाकर्म और उत्सर्ग में तीनरात्र और अष्टका और ऋतुओंके अंतकी रात्रियोंमें एक अहोरात्र अध्ययनको त्यागदे ॥

ता० । उपाकर्म और उत्सर्ग—इन दोनों कर्मों के तीनरात्र और अष्टका श्राद्ध—और ऋतुओंके अंत की रात्रियों—में एक अहोरात्र वेद के अध्ययन का त्याग मनु आदि ने कहा है—यद्यपि उत्सर्ग में पक्षिणीमात्रही अनध्याय कहा है तथापि जो धर्म में निपुणता चाहैं उनके प्रति यह उपदेशहै और आग्रहायणी (अगहन शुदि १५) से आगे जो कृष्णपक्षकी अष्टमीहैं वे चार अष्टका होतीहैं ११९ ॥

नाधीयीताश्वमारूढोनवृक्षंनचहस्तिनम् । ननावंनखरंनोष्ट्रंनेरिणस्थोनयानगः १२०॥

प० । न अधीयीत अश्वं आरूढः न वृक्षं न च हस्तिनम् न नावं न खरं न उष्ट्रं न ईरिणस्थः न यानगः ॥

यो० । अश्वं — वृक्षं — चपुनः हस्तिनं — नावं — खरं — उष्ट्रं आरूढः, ईरिणस्थः, यानगः पुरुषः (वेदं) न अधीयीत ॥

भा० । ता० । घोड़ा—वृक्ष—हाथी—नाव—खर—ऊंट इनपर चढ़ा—और उषर भूमिमें बैठा और यान (सवारी) से गमनकरताहुआ मनुष्य वेदको न पढ़े १२० ॥

नविवादेनकलहेनसेनायांनसंगरे । नभुक्तमात्रेनाजीर्णेनवमित्वानसूतके १२१ ॥

प० । न विवादे न कलहे न सेनायां न संगरे न भुक्तमात्रे न अजीर्णे न वमित्वा न सूतके ॥

यो० । विवादे — कलहे — सेनायां — संगरे — भुक्तमात्रे — अजीर्णे — वमित्वा — सूतके (वेदं) न अधीयीत — न अधीयीतेति सर्वत्रयोज्यम् ॥

भा० । ता० । वाणीके कलह—और दंडदेने धन देने के कलह—युद्धके लिये इकट्ठीहुई सेना—युद्ध—भोजन के अनंतर—अर्थात् इसमें वसिष्ठजी के वचन से इतने हाथ और पैर आर्द्र रहैं—और अजीर्ण—और वमनकिये पीछे और सूतक—इनमें वेदको न पढ़े १२१ ॥

अतिथिंचाननुज्ञाप्यमारुतेवातिवाभृशम् । रुधिरेचस्रुतेगात्राच्छस्त्रेणचपरिक्षते १२२॥

प० । अतिथिं च अननुज्ञाप्य मारुते वाति वा भृशम् रुधिरे च स्रुते गात्रात् शस्त्रेण च परिक्षते ॥

यो० । अतिथिं अननुज्ञाप्य — वा मारुते भृशं वातिसति — चपुनः गात्रात् रुधिरे स्रुतेसति — चपुनः शस्त्रेण परिक्षते सति- वेदं न अधीयीत ॥

---

१ यावदार्द्रहस्तोयावदार्द्रपाणिः ॥

भा० । ता० । अतिथिसे आज्ञालिये विना—और अत्यंत पवनके चलतेहुये—और देहमेंसे रुधिरके निकसतेहुये और शस्त्रसे घावहोनेपर—वेदको न पढ़ै १२२ ॥

सामध्वनावृग्यजुषीनाधीयीतकदाचन । वेदस्याधीत्यवाप्यन्तमारण्यकमधीत्यच १२३

प० । सामध्वनौ ऋग्यजुषी न अधीयीत कदाचन वेदस्य अधीत्य वा अपि अन्तं आरण्यकं अधीत्य च ॥

यो० । सामध्वनौ सति ऋग्यजुषी कदाचन न अधीयीत—वा वेदस्य अन्तं अधीत्य—चपुनः आरण्यकं अधीत्य (वेदान्तरं) न अधीयीत ॥

भा० । ता० । साम वेदके शब्द सुननेपर ऋग्वेद और यजुर्वेदको और एक वेदके अंतको करके और आरण्यक के एक अंशको पढ़कर अन्य वेदको कभी भी न पढ़ै १२३ ॥

ऋग्वेदोदेवदैवत्योयजुर्वेदस्तुमानुषः।सामवेदःस्मृतःपित्र्यस्तस्मात्तस्याशुचिर्ध्वनिः१२४

प० । ऋग्वेदः देवदैवत्यः यजुर्वेदः तु मानुषः सामवेदः स्मृतः पित्र्यः तस्मात् तस्य अशुचिः ध्वनिः ॥

यो० । ऋग्वेदः देवदैवत्यः तुपुनः यजुर्वेदः मानुषः सामवेदः पि यः मन्वादिभिः स्मृतः तस्मात् तस्य (सामवेदस्य) ध्वनिः अशुचिः (ज्ञेयः) ॥

भा० । ता० । ऋग्वेदके देवता देवहैं और यजुर्वेदके देवता मनुष्यहैं क्योंकि यजुर्वेदमें मनुष्योंकेही कर्म कहेहैं—और सामवेदके देवता पितरहैं और पितृकर्मको करके जलका आचमन शुद्धि के लिये कहाहै तिससे सामवेदका शब्द अशुद्धके समानहै इससे सामवेदके शब्द होते अन्य वेदको न पढ़ै—यह पहिले श्लोकमें जो सामवेदको ध्वनिहोते ऋग्वेद और यजुर्वेदको न पढ़ना कहाहै उसीका अनुवादहै १२४ ॥

एतद्विदन्तोविद्वांसस्त्रयीनिष्कर्षमन्वहम् । क्रमतःपूर्वमभ्यस्यपश्चाद्वेदमधीयते १२५॥

प० । एतत् विदन्तः विद्वांसः त्रयीनिष्कर्षं अन्वहं क्रमतः पूर्वं अभ्यस्य पश्चात् वेदं अधीयते॥

यो० । एतद्विदन्तः विद्वांसः अन्वहं त्रयीनिष्कर्षं क्रमतः पूर्वं अभ्यस्य पश्चात् वेदं अधीयते ॥

भा० । यही जानकर शास्त्र के ज्ञाता पंडित पहिले क्रमसे तीनोंवेदों के सारका प्रतिदिन अभ्यासकरके पीछे वेदको पढ़तेहैं ॥

ता० । यह जानतेहुये विद्वान कि ऋग्वेद यजुर्वेद सामवेद के क्रमसे देवता मनुष्य पितर देवता हैं—पहिले तीनों वेदों के सार (ओंकार व्याहृति गायत्री) को क्रमसे अभ्यास करके पश्चात् वेदों का अध्ययन करतेहैं—दूसरे अध्यायमें कहे का भी फेर अनध्यायके प्रकरण में कहना इसलियेहै कि जैसे ये कहेहुये अनध्यायहैं इसीप्रकार ओंकार व्याहृति गायत्री के पढ़नेमें भी अनध्यायहोताहै और शिष्यको इसप्रकार पढ़ावे और इसप्रकार स्नातक को व्रतकरना चाहिये१२५

पशुमण्डूकमार्जारश्वसर्पनकुलाखुभिः । अन्तरागमनेविद्यादनध्यायमहर्निशम् १२६ ॥

प० । पशुमंडूकमार्जारश्वसर्पनकुलाखुभिः अन्तरा गमने विद्यात् अनध्यायं अहर्निशम् ॥

यो० । पशुमंडूकमार्जारश्वसर्पनकुलाखुभिः अन्तरागमने सति अहर्निशं अनध्यायं विद्यात ॥

भा० । ता० । यदि शिष्य और गुरुके मध्यको पढ़ाने के समय—पशु—मेंडक—बिलाव—कुत्ता-सर्प—नोला—मूसा ये निकसजांय तो एक अहोरात्र अनध्याय जाने १२६ ॥

द्वावेववर्जयेन्नित्यमनध्यायौप्रयत्नतः।स्वाध्यायभूमिंचाशुद्धामात्मानंचाशुचिंद्विजः १२७

प० । द्वौ एव वर्जयेत् नित्यं अनध्यायौ प्रयत्नतः स्वाध्यायभूमिं च अशुद्धां आत्मानं च अशुचिं द्विजः ॥

यो० । द्विजः अशुद्धां स्वाध्यायभूमिं चपुनः अशुचिं आत्मानं इमौ द्वौ एव अनध्यायौ प्रयत्नतः नित्यं वर्जयेत् ॥

भा० । ता० । अब जो विद्यामें निपुणहुआ चाहै उसको पूर्वोक्त अनध्यायों का विकल्प है (माने चाहै न माने) अशुद्ध (जो उच्छिष्टहो अथवा जिसमें अपवित्रवस्तु पड़ीहो) पढ़ने की भूमि और बाह्य और अभ्यन्तर शौचरहित अपनादेह—इन दो अनध्यायोंकोही द्विज प्रयत्नसे नित्य त्यागदे और पूर्वोक्त अनध्यायों को न वर्जे—और उन अनध्यायोंमें भी उनको छोड़े जि-नमें नित्यत्यागकहाहै अथवा जहां अनुवाद (दुबाराकथन) है और इतर अनध्यायों को माने चाहै न माने १२७ ॥

अमावस्यामष्टमींचपौर्णमासींचतुर्दशीम् ।
ब्रह्मचारीभवेन्नित्यमप्यृतौस्नातकोद्विजः १२८ ॥

प० । अमावस्यां अष्टमीं च पौर्णमासीं चतुर्दशीं ब्रह्मचारी भवेत् नित्यम् अपि ऋतौ स्नातकः द्विजः ॥

यो० । अमावस्यां चपुनः अष्टमीं—पौर्णमासीं—चतुर्दशीं स्नातकः द्विजः ऋतौ अपि नित्यं ब्रह्मचारी भवेत् ॥

भा० । ता० । स्नातक द्विज अमावस्या अष्टमी पूर्णिमा और चतुर्दशी को ऋतु के समय में भी सदैव ब्रह्मचारी रहै अर्थात् स्त्रीका संगम न करे—यद्यपि—पर्ववर्जंव्रजेत्तां—इससेही निषेध इनतिथियोंमें भी सिद्धथा तथापि स्नातक के व्रत लोपहोने से प्रायश्चित्त के लिये फिर कथन कियाहै १२८ ॥

नस्नानमाचरेद्भुक्त्वानातुरोनमहानिशि।नवासोभिःसहाजस्रंनाविज्ञातेजलाशये १२९॥

प० । न स्नानं आचरेत् भुक्त्वा न आतुरः न महानिशि न वासोभिः सह अजस्रं न अविज्ञाते जलाशये ॥

यो० । भुक्त्वा—आतुरः—महानिशि—अजस्रं वासोभिःसह—अविज्ञाते जलाशये स्नानं न आचरेत् ॥

भा० । भोजन कियेपीछे—रोगी—अर्द्धरात्रि—और बहुधा वस्त्रोंसहित और विनाजाने जला-शय में स्नान न करै ॥

ता० । नित्यस्नान की विधि तो भोजन के अनन्तर होई नहींसक्ती किन्तु भोजन से पूर्वही होनीहै और चांडालआदि के स्पर्शसे जो स्नानकरना लिखाहै उसका निषेध इससे अयोग्य है कि आपस्तंबने यहकहाहै कि शक्तिभर एकमुहूर्तभी असावधान न हो इससे भोजनके अनन्तर

१ मुहूर्तमपिशक्तिविषयेनाप्रयतःस्यात् ॥

यदृच्छास्नान (इच्छानुसार जो कियाजाताहै) न करै और आतुर नैमित्तिक स्नानभी न करै किंतु सामर्थ्य के अनुसार इस जाबालऋषि के वचनानुसारकरै कि कर्मवाले मनुष्य स्नानकी अशक्ति में विनाशिरके भिगोये स्नानकरैं अथवा आर्द्र (गीले) वस्त्र से देहका मार्जन करलें— और महानिशा (अर्द्धरात्रि) में भी स्नान न करै और वह महानिशा इस देवलै ऋषि के वचनानुसार रात्रिके बीचके दोपहरहोते हैं उससमय काम्य और नैमित्तिकस्नानको छोड़कर अन्य स्नान न करै—और वस्त्रोंसहित नित्य (प्रतिदिन) स्नान न करै अर्थात् चांडालआदि का स्पर्श होनेपर तो अवश्यकरै—और विनाजाने जलाशयमें भी इससे स्नान न करै कि कदाचित् कोई ग्राहआदि उसमें न रहताहो १२६ ॥

देवतानांगुरोराज्ञःस्नातकाचार्ययोस्तथा ।
नाक्रामेत्कामतश्छायांबभ्रुणोदीक्षितस्यच १३० ॥

प० । देवतानां गुरोः राज्ञः स्नातकाचार्ययोः तथा न आक्रामेत् कामतः छायां बभ्रुणः दीक्षितस्य च ॥

यो० । देवतानां — गुरोः राज्ञः तथा स्नातकाचार्ययोः बभ्रुणः (कपिलस्य) चपुनः दीक्षितस्य — छायां कामतः न आक्रामेत् ॥

भा० । ता० । देवताओं की प्रतिमा—गुरु—राजा—स्नातक और आचार्य—बभ्रु (कपिल) और यज्ञमें दीक्षित—इनकी छाया को जानकर अवलंघन न करै अर्थात् अज्ञानसे अवलंघन करने में दोष नहींहै १३० ॥

मध्यंदिनेऽर्द्धरात्रेचश्राद्धंभुक्त्वाचसामिषम् । संध्ययोरुभयोश्चैवनसेवेतचतुष्पथम् १३१

प० । मध्यंदिने अर्द्धरात्रे च श्राद्धं भुक्त्वा च सामिषं संध्ययोः उभयोः च एव न सेवेत चतुष्पथम् ॥

यो० । मध्यंदिने चपुनः अर्द्धरात्रे चपुनः सामिषंश्राद्धं भुक्त्वा चपुनः उभयोः संध्ययोः चतुष्पथं न सेवेत ॥

भा० । ता० । मध्याह्न—अर्द्धरात्रिमें—और जिसमें मांस बनाहो ऐसे श्राद्धको खाकर और दोनों संध्याओं में—चतुष्पथ (चौराहा) में न बैठे १३१ ॥

उद्वर्तनमपस्नानंविण्मूत्रेरक्तमेवच । श्लेष्मनिष्ठ्यूतवान्तानिनाधितिष्ठेत्तुकामतः १३२॥

प० । उद्वर्तनं अपस्नानं विण्मूत्रे रक्तं एव च श्लेष्मनिष्ठ्यूतवान्तानि न अधितिष्ठेत् तु कामतः ॥

यो० । उद्वर्तनं — अपस्नानं — विण्मूत्रे चपुनः रक्तं — श्लेष्मनिष्ठ्यूतवान्तानि कामतः न अधितिष्ठेत् ॥

भा० । ता० । अभ्यंगका मल (पिष्टकाआदि) स्नान का जल—मूत्र—पुरीष (विष्ठा) रुधिर कफ— निष्ठ्यूत (थूक वा तांबूल आदिकी पीक) और वमन—इनके समीप जानकर न बैठे १३२ ॥

---

१ अशिरस्कंभवेत्स्नानं स्नानाशक्तौतुकर्मिणां — आर्द्रेणवाससावास्यान्मार्जनंदैहिकंविदुः ॥
२ महानिशात्वविज्ञेया मध्यस्थंप्रहरद्वयम् तस्मिनस्नानंनकुर्वीत् काम्यनैमित्तिकादृते ॥

वैरिणंनोपसेवेतसहायंचैववैरिणः । अधार्मिकंतस्करंचपरस्यैवचयोषितम् १३३ ॥

प० । वैरिणं न उपसेवेत सहायं च एव वैरिणः अधार्मिकं तस्करं च परस्य एव च योषितम् ॥

यो० । वैरिणं चपुनः वैरिणः सहायं — अधार्मिकं चपुनः तस्करं — चपुनः परस्य योषितं न उपसेवेत ॥

भा० । ता० । शत्रु और शत्रु का मित्र—और अधर्मी और चोर और अन्यकी स्त्री इनको न सेवे अर्थात् इनके संग मेल न रक्खे १३३ ॥

नहीदृशमनायुष्यंलोकेकिंचनविद्यते । यादृशंपुरुषस्येहपरदारोपसेवनम् १३४ ॥

प० । न हि ईदृशं अनायुष्यं लोके किंचन विद्यते यादृशं पुरुषस्य इह परदारोपसेवनम् ॥

यो० । पुरुषस्य इह लोके ईदृशं अनायुष्यं किंचन न विद्यते यादृशं अनायुष्यं परदारोपसेवनं अस्ति ॥

भा० । ता० । क्योंकि पुरुषकी अवस्था नष्ट करने वाला ऐसा अन्य कर्म नहीं है जैसा पराई स्त्री का गमनहै—तिससे यही कभी भी न करे १३४ ॥

क्षत्रियंचैवसर्पंचब्राह्मणंचबहुश्रुतम् । नावमन्येतवैभूष्णुःकृशानपिकदाचन १३५ ॥

प० । क्षत्रियं च एव सर्पं च ब्राह्मणं च बहुश्रुतम् न अवमन्येत वै भूष्णुः कृशान् अपि कदाचन ॥

यो० । क्षत्रियं — चपुनः सर्पं चपुनः बहुश्रुतं ब्राह्मणं कृशान् अपि भूष्णुः कदाचन न अवमन्येत — एतेषां अपमानं न कुर्यात् इतिभावः ॥

भा० । ता० । अपने प्रताप का अभिलाषी पुरुष—क्षत्रियका और सर्प और विद्यावान् ब्राह्मण और दीन मनुष्य—इनका कभी भी अपमान न करे १३५ ॥

एतत्त्रयंहिपुरुषंनिर्दहेदवमानितम् । तस्मादेतत्त्रयंनित्यंनावमन्येतबुद्धिमान् १३६ ॥

प० । एतत् त्रयं हि पुरुषं निर्दहेत् अवमानितम् तस्मात् एतत् त्रयं नित्यं न अवमन्येत बुद्धिमान् ॥

यो० । हि (यतः) अवमानितं एतत्त्रयं पुरुषं निर्दहेत् — तस्मात् बुद्धिमान् एतत्त्रयं नित्यं न अवमन्येत ॥

भा० । ता० । जिससे अपमान किये ये तीनों पुरुषको नष्ट करदेते हैं तिससे बुद्धिमान् पुरुष इनतीनों का अपमान न करे—और इनमें क्षत्रिय और सर्पकानष्ट करदेना प्रसिद्धहै और ब्राह्मण क्रोध में आकर अभिचार (मारणप्रयोग) से नष्ट करसक्ता है १३६ ॥

नात्मानमवमन्येतपूर्वाभिरसमृद्धिभिः । आमृत्योःश्रियमन्विच्छेन्नैनांमन्येतदुर्लभाम् १३७

प० । न आत्मानं अवमन्येत पूर्वाभिः असमृद्धिभिः आमृत्योः श्रियं अन्विच्छेत् न एनां मन्येत दुर्लभाम् ॥

यो० । पूर्वाभिः असमृद्धिभिः आत्मानं न अवमन्येत श्रियं आमृत्योः अन्विच्छेत एनां (श्रियं) दुर्लभां न मन्येत ॥

भा० । ता० । प्रथम धनके लिये उद्यम करने पर यदि संपत्ति न होय तो उन असमृद्धियों से अपने आत्माका अपमान न करे कि मैं मन्दभागीहूं—और इस लक्ष्मी को दुर्लभ भी न माने अर्थात् मेरे उद्यमसे मुझे प्राप्त न होगी यह संतोष न करे किन्तु मरण पर्यन्त उद्यमकरे १३७ ॥

सत्यंब्रूयात्प्रियंब्रूयान्नब्रूयात्सत्यमप्रियम् । प्रियंचनानृतंब्रूयादेषधर्मःसनातनः १३८॥

प० । सत्यं ब्रूयात् प्रियं ब्रूयात् न ब्रूयात् सत्यं अप्रियम् प्रियं च न अनृतं ब्रूयात् एषः धर्मः सनातनः ॥

यो० । सत्यं ब्रूयात् प्रियं ब्रूयात् — अप्रियं सत्यं न ब्रूयात् चपुनः प्रियं अनृतं न ब्रूयात् एषः धर्मः सनातनः अस्ति इति शेषः ॥

भा० । ता० । सत्य और प्रिय वचन को कहै जैसे तेरे पुत्र उत्पन्न हुआ—और जो प्रिय न हो ऐसे सत्य को भी न कहै जैसे तेरापुत्र मरगया—यह धर्म सनातन है और वेदोक्तहै १३८ ॥

भद्रंभद्रमितिब्रूयाद्भद्रमित्येववावदेत् । शुष्कवैरंविवादंचनकुर्यात्केनचित्सह १३९ ॥

प० । भद्रं भद्रं इति ब्रूयात् भद्रं इति एवं वा वदेत् शुष्कवैरं विवादं च न कुर्यात् केनचित् सह ॥

यो० । भद्रं (अभद्रं) भद्रं इतिब्रूयात् — वा भद्रं इत्येववदेत् — शुष्कवैरं चपुनः विवादं केनचित् सह न कुर्यात् ॥

भा० । किसीके बुरेकामको देखकर भी भला प्रशस्त अथवा भद्रही कहै, और किसीके संग सूका वैर और विवाद न करे ॥

ता० । इसश्लोक में पहिलाभद्रपद अकल्याण का बोधक है और दूसरा भद्रपद कल्याण के पर्यायों का वाचकहै अर्थात् अभद्रको भी कुशल प्रशस्तआदि शब्दोंसे कहै अर्थात् किसीके बुरे कामको भी प्रशस्त बतावे—क्योंकि आपस्तम्बऋषि ने यहकहाहै कि अभद्रको अभद्र न कहै किन्तु प्रशस्त और पुण्य शब्दों से कहै अथवा भद्र ऐसेहीकहै और शुष्क वैर और विवाद किसी के संग न करै—अर्थात् सबके संग मित्रता से रहै १३९ ॥

नातिकल्यंनातिसायंनातिमध्यंदिनेस्थिते । नाज्ञातेनसमंगच्छेन्नैकोनवृषलैःसह १४०॥

प० । न अतिकल्यं न अतिसायं न अतिमध्यंदिने स्थिते न अज्ञातेन समं गच्छेत् न एकः न वृषलैः सह ॥

यो० । अतिकल्यं अतिसायं — अतिमध्यं दिने स्थितेसति — अज्ञातेन पुरुषेण समं — एकः — वृषलैः सह न गच्छेत् ॥

भा० । ता० । अत्यन्त प्रभात और अत्यन्त सायंकालके समय और अति मध्याह्नके समय और अज्ञात पुरुष के और शूद्र के संग गमन न करै—यद्यपि—नैकःप्रपद्येताध्वानं—इस से अकेले का गमन निषेध कर आयेहैं तथापि स्नातक के व्रतलोप के प्रायश्चित्तकी अधिकताके लिये पुनः निषेध कहाहै १४० ॥

हीनांगानतिरिक्तांगान्विद्याहीनान्वयोधिकान् ।
रूपद्रव्यविहीनांश्चजातिहीनांश्चनाक्षिपेत् १४१ ॥

प० । हीनांगान् अतिरिक्तांगान् विद्याहीनान् वयोधिकान् रूपद्रव्यविहीनान् च जातिहीनान् च न आक्षिपेत् ॥

यो० । हीनांगान् — अतिरिक्तांगान् — विद्याहीनान् — वयोधिकान् — चपुनः रूपद्रव्यविहीनान् — चपुनः जातिहीनान् — पुरुषान् न आक्षिपेत् ॥

१ नाभद्रमभद्रं ब्रूयात् पुण्यंप्रशस्तमितिब्रूयात् ॥

भा० । ता० । जिनका अंग हीनहो वा अधिक हो—मूर्ख—अपनेसे वृद्ध—कुरूप और दरिद्री और जातिसे हीन (पतितआदि) इनकी निन्दा न करै अर्थात् काण आदि शब्दसे न बोले १४१ ॥

नस्पृशेत्पाणिनोच्छिष्टोविप्रोगोब्राह्मणानलान् ।
नचापिपश्येदशुचिःसुस्थोज्योतिर्गणान्दिवि १४२ ॥

प० । न स्पृशेत् पाणिना उच्छिष्टः विप्रः गोब्राह्मणानलान् न च अपि पश्येत् अशुचिः सुस्थः ज्योतिर्गणान् दिवि ॥

यो० । उच्छिष्टः अशुचिः—विप्रः पाणिना गोब्राह्मणानलान् न स्पृशेत् — चपुनः अशुचिः अपि विप्रः सुस्थः सन् दिविज्योतिर्गणान् न पश्येत् ॥

भा० । ता० । उच्छिष्ट और अशुद्ध ब्राह्मण गौ ब्राह्मण अग्नि इनका स्पर्श न करै और अशुद्ध हुआ तो स्वस्थ अवस्था में आकाशके विषे सूर्य चन्द्रआदि ग्रहों को न देखै १४२ ॥

स्पृष्ट्वैतानशुचिर्नित्यमद्भिःप्राणानुपस्पृशेत्
गात्राणिचैवसर्वाणिनाभिंपाणितलेनतु १४३ ॥

प० । स्पृष्ट्वा एतान् अशुचिः नित्यं अद्भिः प्राणान् उपस्पृशेत् गात्राणि च एव सर्वाणि नाभिं पाणितलेन तु ॥

यो० । अशुचिः सन् एतान् स्पृष्ट्वा नित्यं अद्भिः प्राणान् उपस्पृशेत् चपुनः सर्वाणि गात्राणि तुपुनः नाभिं पाणितले न गृहीताभिः अद्भिः स्पृशेत् ॥

भा० । ता० । अशुद्धब्राह्मण इन गौ आदि का स्पर्श करके प्राणायाम के अनन्तर प्राणों (चक्षुः) आदि इन्द्रियका नित्य स्पर्श करै और सम्पूर्णगात्र और नाभिका स्पर्श अपने हाथसे जल लेकर करै—यह श्लोक भिन्न प्रकरण में प्रायश्चित्तकी लघुताके लिये कहा है क्योंकि उसी प्रकरण में लिखते तो गौआदि भी पढ़ने पड़ते १४३ ॥

अनातुरःस्वानिखानिनस्पृशेदनिमित्ततः।रोमाणिचरहस्यानिसर्वाण्येवविवर्जयेत्१४४

प० । अनातुरः स्वानि खानि न स्पृशेत् अनिमित्ततः रोमाणि च रहस्यानि सर्वाणि एव विवर्जयेत् ॥

यो० । अनातुरः अनिमित्ततः स्वानि खानि (इन्द्रियाणि) न स्पृशेत् चपुनः रहस्यानि (गोप्यानि) सर्वाणि रोमाणि विवर्जयेत् (न स्पृशेत्)

भा० । ता० । आरोग्य के समय अपनी इन्द्रिय और गुप्तसम्पूर्ण रोम (लिंग और कुक्षि के) इनका विना प्रयोजन स्पर्श न करै १४४ ॥

मंगलाचारयुक्तःस्यात्प्रयतात्माजितेन्द्रियः।जपेच्चजुहुयाच्चैवनित्यमग्निमतन्द्रितः१४५

प० । मंगलाचारयुक्तः स्यात् प्रयतात्मा जितेन्द्रियः जपेत् च जुहुयात् च एव नित्यं अग्निं अतन्द्रितः ॥

यो० । प्रयतात्मा जितेन्द्रियः पुरुषः मंगलाचारयुक्तः स्यात् अतन्द्रितः सन् गायत्रीं जपेत् चपुनः अग्निं जुहुयात् ॥

भा० । ता० । अपने वांछित अर्थ की सिद्धिरूप मंगल और गुरुसेवा आदि आचार इनमें

नित्य उद्योगी रहै और वाह्य और अभ्यन्तर शौचयुक्तहोकर जितेन्द्रियरहै और आलस्यकोछोड़ कर प्रतिदिन गायत्रीका जपकरै और अग्नि में होमकरै इस श्लोकमें आचारादि युक्तोंकी भी सावधानी के लिये फिर यह कहाहै कि आलस्य को त्याग कर जप होमकरै १४५ ॥

मंगलाचारयुक्तानांनित्यंचप्रयतात्मनाम् । जपतांजुह्वतांचैवविनिपातोनविद्यते १४६॥

प० । मंगलाचारयुक्तानां नित्यं च प्रयतात्मनां जपतां जुह्वतां च एव विनिपातः न विद्यते ॥

यो० । मंगलाचारयुक्तानां – चपुनः नित्यं प्रयतात्मनां – चपुनः जपतां – जुह्वतां – पुरुषाणां विनिपातः न विद्यते ॥

भा० । ता० । जो मंगल और आचारयुक्त हैं और नित्य शुद्धहैं और जप और होममें जो तत्परहैं—उनको दैव वा मानुष उपद्रव नहींहोताहै १४६ ॥

वेदमेवाभ्यसेन्नित्यंयथाकालमतन्द्रितः । तंह्यस्याहुःपरंधर्ममुपधर्मोऽन्यउच्यते १४७॥

प० । वेदं एव अभ्यसेत् नित्यं यथाकालं अतन्द्रितः तं हि अस्य आहुः परं धर्मं उपधर्मः अन्यः उच्यते ॥

यो० । अतन्द्रितः सन् यथाकालं वेदंएव अभ्यसेत हि (यतः) तं (वेदाभ्यासं) अस्यपरं धर्म मन्वादयः आहुः अन्यः उपधर्मः उच्यते ॥

भा० । ता० । अपने नित्यकृत्यके समय आलस्यको छोड़कर ॐकार गायत्री आदि वेदकाही सदा अभ्यासकरै क्योंकि मनु आदिने वेदका अभ्यासही ब्राह्मणका परमधर्म कहाहै और वेदाभ्याससे अन्य उपधर्म (निकृष्टधर्म) मुनियोंने कहाहै यहांपर वेदाभ्यासका पुनःकथन इसलिये है कि पूर्वजातिके स्मरण द्वारा वेदाभ्यासही मोक्षकाहेतुहै १४७ ॥

वेदाभ्यासेनसततंशौचेनतपसैवच । अद्रोहेणचभूतानांजातिंस्मरतिपौर्विकीम् १४८॥

प० । वेदाभ्यासेन सततं शौचेन तपसा एव च अद्रोहेण च भूतानां जातिं स्मरति पौर्विकीम् ॥

यो० । सततं वेदाभ्यासेन – शौचेन – चपुनः तपसा – चपुनः भूतानां अद्रोहेण – पुरुषः पौर्विकीं जातिं स्मरति ॥

भा० । ता० । निरंतर वेदके अभ्यास—शौच—और तप—और भूतोंके अद्रोहसे पूर्वजन्म की जातिको मनुष्य स्मरण करताहै १४८ ॥

पौर्विकींसंस्मरञ्जातिंब्रह्मैवाभ्यसतेपुनः । ब्रह्माभ्यासेनचाजस्रमनन्तंसुखमश्नुते १४९॥

प० पौर्विकीं संस्मरन् जातिं ब्रह्म एव अभ्यसते पुनः ब्रह्माभ्यासेन च अजस्रं अनन्तं सुखं अश्नुते ॥

यो० । पौर्विकीं जातिं संस्मरन् सन् पुनः ब्रह्म (वेदं) एव अभ्यसते – चपुनः अजस्रं ब्रह्माभ्यासेन अनन्तं सुखं अश्नुते ॥

भा० । पूर्वजन्मकी जातिका स्मरणकरताहुआ फिर भी ब्रह्मकाही अभ्यासकरताहै और निरंतर ब्रह्मके अभ्याससे अनंत सुख (मोक्ष) को भोगताहै ॥

ता० । पिछले जन्मकी जाति (अनेक जन्म) को स्मरण करताहुआ ब्राह्मण फिरभी वेदकाही अभ्यासकरता है अर्थात् अनेक जन्म और उन जन्मों में गर्भ जन्म जरा मरण आदि दुःखोंका स्मरणकरताहुआ फिर भी निरंतर ब्रह्मकाही अभ्यासकरताहै अर्थात् श्रवण मनन और

ध्यान से ब्रह्मकोही साक्षात् देखता है और ब्रह्म साक्षात्कार से परमानन्द रूप मोक्षको प्राप्त होताहै १४९ ॥

सावित्राञ्छान्तिहोमांश्चकुर्यात्पर्वसुनित्यशः।पितॄंश्चैवाष्टकास्वर्चेन्नित्यमन्वष्टकासुच १५०

प० । सावित्रान् शांतिहोमान् च कुर्यात् पर्वसु नित्यशः पितॄन् च एव अष्टकासु अर्चेत् नित्यं अन्वष्टकासु च ॥

यो० । सावित्रान् चपुनः शांतिहोमान पर्वसु नित्यशः कुर्यात् चपुनः अष्टकासु चपुनः अन्वष्टकासु पितॄन् अर्चेत् — (पूजयेत्) ॥

भा० । ता० । जिनका गायत्री देवताहै ऐसे होम और अनिष्टकी शांतिकेलिये शान्ति होमोंको पर्वमें (पूर्णिमा अमावस्याको) सदैवकरे और अगहनकी पूर्णिमाके आगे कृष्णपक्षकी अष्टमी (अष्टका) और उससे अग्रिमतिथि (नवमी अन्वष्टका) ओंमें पितरोंका पूजनकरे १५० ॥

दूरादावसथान्मूत्रंदूरात्पादावसेचनम् । उच्छिष्टान्ननिषेकंचदूरादेवसमाचरेत् १५१ ॥

प० । दूरात् आवसथात् मूत्रं दूरात् पादावसेचनम् उच्छिष्टान्ननिषेकं च दूरात् एव समाचरेत् ॥

यो० । आवसथात् (गृहात्) दूरात् मूत्रं दूरात् पादावसेचनम् — चपुनः दूरात् उच्छिष्टान्ननिषेकं समाचरेत् — (कुर्यात्) ॥

भा० । ता० । नैर्ऋतादिशामें जितनीदूर बाण जासके उससे अधिक भूमिमें जाकर—विष्णु-पुराणके वचनानुसार मूत्र पुरीषका त्याग पैरोंका प्रक्षालन और उच्छिष्ट अन्नका त्याग और वीर्य इनका त्याग इतनी दूरपर करे १५१ ॥

मैत्रंप्रसाधनंस्नानंदन्तधावनमंजनम् । पूर्वाह्णएवकुर्वीतदेवतानांचपूजनम् १५२ ॥

प० । मैत्रं प्रसाधनं स्नानं दन्तधावनं अंजनं पूर्वाह्णे एव कुर्वीत देवतानां च पूजनम् ॥

यो० । मैत्रं — प्रसाधनं — स्नानं — दंतधावनं — अंजनं — चपुनः देवतानां पूजनं पूर्वाह्णे एव कुर्वीत — नपराह्णे ॥

भा० । ता० । मैत्र (मलकात्याग) देहका वस्त्र आदिसे प्रसाधन—स्नान—दंतधावन—अंजन और देवताओंका पूजन ये सब पूर्वाह्णमेंही करे यहां पूर्वाह्ण शब्दसे रात्रिका शेष और दिन का पूर्वभाग लेनेहैं और इस श्लोकमें अर्थ क्रमहै और पाठ क्रम नहींहै क्योंकि स्नानके पीछे दंतधावन नहींहोसक्ता १५२ ॥

दैवतान्यभिगच्छेत्तुधार्मिकांश्चद्विजोत्तमान् । ईश्वरंचैवरक्षार्थंगुरूनेवचपर्वसु १५३ ॥

प० । दैवतानि अभिगच्छेत् तु धार्मिकान् च द्विजोत्तमान् ईश्वरं च एव रक्षार्थं गुरून् एव च पर्वसु ॥

यो० । तुपुनः दैवतानि चपुनः धार्मिकान् द्विजोत्तमान् चपुनः रक्षार्थं ईश्वरं (राजानं) चपुनः पर्वसु गुरून् — अभिगच्छेत् ॥

---

१ नैर्ऋत्यामिषुविक्षेपमात्रमतीत्याभ्यधिकंभुवः ॥

भा० । ता० । देवताओंकी मूर्ति–और धार्मिक ब्राह्मण–और रक्षाके लिये राजा–और पर्व के दिनोंमें गुरु–इनके दर्शनके लिये सन्मुखजाय १५३ ॥

अभिवादयेद्वृद्धांश्च दद्याच्चैवासनंस्वकम् ।
कृतांजलिरुपासीतगच्छतःपृष्ठतोऽन्वियात् १५४ ॥

प० । अभिवादयेत् वृद्धान् च दद्यात् च एव आसनं स्वकं कृतांजलिः उपासीत गच्छतः पृष्ठतः अन्वियात् ॥

यो० । वृद्धान् अभिवादयेत् चपुनः स्वकं आसनं दद्यात् – कृतांजलिः सन् वृद्धान् उपासीत – गच्छतः (वृद्धान्) पृष्ठतः अन्वियात् ॥

भा० । ता० । वृद्धोंको नमस्कारकरे और अपना आसन बैठनेकेलिये दे और गुरुओं के समीप हाथजोड़कर बैठे और जातेहुये गुरुओं के पीछे गमनकरे–कहाहुआ भी यह आचार फल कहने के लिये पुनः कहाहै १५४ ॥

श्रुतिस्मृत्युदितंसम्यङ्निबद्धंस्वेषुकर्मसु । धर्ममूलंनिषेवेतसदाचारमतन्द्रितः १५५ ॥

प० । श्रुतिस्मृत्युदितं सम्यक् निबद्धं स्वेषु कर्मसु धर्ममूलं निषेवेत सदाचारं अतन्द्रितः ॥

यो० । ब्राह्मणः अतन्द्रितः सन् सम्यक् यथास्यात्तथा श्रुतिस्मृत्युदितं – स्वेषुकर्मसु निबद्धं – धर्ममूलं -सदाचारं निषेवेत – कुर्यात् ॥

भा० । ता० । श्रुति और स्मृति में भलीप्रकार कहा और अपने अध्ययन आदि कर्मों का सम्बन्धी (अंग) और धर्म का हेतु जो साधुओंका आचरण उसको करे १५५ ॥

आचाराल्लभतेह्यायुराचारादीप्सिताःप्रजाः ।
आचाराद्धनमक्षय्यमाचारोहन्त्यलक्षणम् १५६ ॥

प० । आचारात् लभते हि आयुः आचारात् ईप्सिताः प्रजाः आचारात् धनं अक्षय्यं आचारः हंति अलक्षणम् ॥

यो० । आचारात् पुरुषः आयुः आचारात् ईप्सिताः प्रजाः आचारात् अक्षय्यंधनं लभते – आचारः अलक्षणं हंति ॥

भा० । ता० । मनुष्य आचारसे पूर्णअवस्था और वांछित प्रजा–और बहुतसा धन इनको प्राप्तहोताहै और आचार अलक्षण (अशुभफलका दाता देहकाचिह्न) को नष्ट करताहै क्योंकि आचाररूप धर्म से अलक्षणसे सूचित अरिष्टका नाशहोताहै १५६ ॥

दुराचारोहिपुरुषोलोकेभवतिनिन्दितः । दुःखभागीचसततंव्याधितोऽल्पायुरेवच १५७

प० । दुराचारः हि पुरुषः लोके भवति निन्दितः दुःखभागी च सततं व्याधितः अल्पायुः एव च ॥

यो० । हि (यतः) दुराचारः पुरुषः लोके निंदितः चपुनः सततं दुःखभागी – व्याधितः चपुनः अल्पायुः एव (निश्चयेन) भवति – तस्मादाचारयुक्तः स्यात् ॥

भा० । ता० । जिससे दुराचारी पुरुष लोक (जगत्) में निंदितहोताहै–और निरन्तर दुःख

का भागी—और रोगी और अल्पायुः होता है—तिससे सदैव आचार से युक्तरहै १५७ ॥

सर्वलक्षणहीनोऽपियःसदाचारवान्नरः । श्रद्दधानोऽनसूयश्चशतंवर्षाणिजीवति १५८ ॥

प० । सर्वलक्षणहीनः अपि यः सदाचारवान् नरः श्रद्दधानः अनसूयः च शतं वर्षाणि जीवति ॥

यो० । सर्वलक्षणहीनः अपि यः नरः सदाचारवान् श्रद्दधानः चपुनः अनसूयः भवति सः शतं वर्षाणि जीवति ॥

भा० । ता० । शुभसूचक सम्पूर्ण लक्षणों से हीन भी जो मनुष्य सदाचारी और श्रद्धावान् और पराये दोषोंको न कहनेवाला होताहै वह सौ वर्षतक जीवताहै १५८ ॥

यद्यत्परवशंकर्मतत्तद्यत्नेनवर्जयेत् । यद्यदात्मवशंतुस्यात्तत्तत्सेवेतयत्नतः १५९ ॥

प० । यत् यत् परवशं कर्म तत् तत् यत्नेन वर्जयेत् यत् यत् आत्मवशं तु स्यात् तत् तत् सेवेत यत्नतः ॥

यो० । यत् यत् कर्म परवशं भवेत् तत् तत् यत्नेन वर्जयेत्—तुपुनः यत् यत् कर्म आत्मवशं स्यात् तत् तत् यत्नेन सेवेत ॥

भा० । ता० । जो २ कर्म पराधीन हैं उस २ को यत्नसे त्यागदे—और जो२ कर्म अपने आधीनहै उस २ को यत्नसे करै—अर्थात् स्वाधीन कर्म में ही तत्पररहै १५९ ॥

सर्वंपरवशंदुःखंसर्वमात्मवशंसुखम् । एतद्विद्यात्समासेनलक्षणंसुखदुःखयोः १६० ॥

प० । सर्वं परवशं दुःखं सर्वं आत्मवशं सुखं एतत् विद्यात् समासेन लक्षणं सुखदुःखयोः ॥

यो० । परवशं सर्वं दुःखं—आत्मवशं सर्वं सुखं—भवति एतत्समासेन सुखदुःखयोः लक्षणं (स्वरूपं) विद्यात् (जानीयात्) ॥

भा० । ता० । पराधीनहोकर किया सम्पूर्ण कर्म दुःखदायी और अपनी स्वाधीनतासे किया सम्पूर्ण कर्म सुखदायी होताहै यही संक्षेप से सुख और दुःखका लक्षण जानना १६० ॥

यत्कर्मकुर्वतोऽस्यस्यात्परितोषोऽन्तरात्मनः । तत्प्रयत्नेनकुर्वीतविपरीतंतुवर्जयेत् १६१ ॥

प० । यत् कर्म कुर्वतः अस्य स्यात् परितोषः अन्तरात्मनः तत् प्रयत्नेन कुर्वीत विपरीतं तु वर्जयेत् ॥

यो० । यत्कर्म कुर्वतः अस्य अन्तरात्मनः परितोषः स्यात् तत् (कर्म) प्रयत्नेन कुर्वीत—विपरीतं तु कर्म वर्जयेत् ॥

भा० । ता० । जिस कर्म के करनेसे इसके अन्तरात्मा को संतोष हो उस कर्मको बड़े यत्न से करै और विपरीत (जिससे संतोष न हो) कर्म को तो वर्जदे १६१ ॥

आचार्य्यंचप्रवक्तारंपितरंमातरंगुरुम् । नहिंस्याद्ब्राह्मणान्गाश्चसर्वांश्चैवतपस्विनः १६२

प० । आचार्य्यं च प्रवक्तारं पितरं मातरं गुरुं न हिंस्यात् ब्राह्मणान् गाः च सर्वान् च एव तपस्विनः ॥

यो० । आचार्य्यं प्रवक्तारं—पितरं—मातरं—गुरुं—ब्राह्मणान्—चपुनः गाः चपुनः सर्वान् तपस्विनः न हिंस्यात् ॥

भा० । ता० । आचार्य (जो यज्ञोपवीतकराकर वेदपढ़ावे) प्रवक्ता (जो वेदकीव्याख्याकरे) गुरु—ब्राह्मण—गौ—और सम्पूर्ण तपस्वी इनकी हिंसा न करै अर्थात् इनके प्रतिकूल आचरण न

करे यहां प्रतिकूल आचरणरूप हिंसाली है और गोविंदराज तो यहकहते हैं सामान्य से हिंसा कहीहै इससे आततायी भी चाहे ये हों परन्तु इनकी हिंसा न करे सो ठीकनहीं है—गुरु और बालक वृद्ध ये चाहे आततायी भी हों तोभी न मारे इससे संग विरोध होजायगा १६२ ॥

नास्तिक्यंवेदनिन्दांचदेवतानांचकुत्सनम्।द्वेषंदम्भंचमानंचक्रोधंतैक्ष्ण्यंचवर्जयेत् १६३

प० । नास्तिक्यं वेदनिन्दां चँ देवतानां चँ कुत्सनम् द्वेषं दम्भं चँ मानं चँ क्रोधं तैक्ष्ण्यं चँ वर्जयेत् ॥

यो० । नास्तिक्यं — चपुनः वेदनिन्दां — चपुनः देवतानां कुत्सनम् — द्वेषं — दम्भं — चपुनः मानं क्रोधं चपुनः तैक्ष्ण्यं वर्जयेत् ॥

भा० । ता० । नास्तिकता—वेदकी और देवताओंकी निंदा—द्वेष—दम्भ (धर्म में अनुत्साह—अभिमान—क्रोध—क्रूरता)—इनका त्यागदे १६३ ॥

परस्यदण्डंनोद्यच्छेत्क्रुद्धोनैवनिपातयेत्।अन्यत्रपुत्राच्छिष्याद्वाशिष्ट्यर्थंताडयेत्तुतौ१६४

प० । परस्य दण्डं नँ उद्यच्छेत् क्रुद्धः नँ एवं निपातयेत् अन्यत्र पुत्रात् शिष्यात् वाँ शिष्ट्यर्थं ताडयेत् तुँ तौ ॥

यो० । पुत्रात् वा शिष्यात् अन्यत्र परस्य दण्डं न उद्यच्छेत — क्रुद्धः मन् दण्डं न निपातयेत तौ तु (पुत्रशिष्यौ) शिष्ट्यर्थं ताडयेत् ॥

भा० । ता० । पुत्र और शिष्यसे अन्य परके मारने के लिये दण्डको न फेंके और न क्रोध होकर अन्य के गात में दण्डको मारे—और शिक्षा के लिये पुत्र और शिष्यको तो अवश्य ताडना करे १६४ ॥

ब्राह्मणायावगुर्यैवद्विजातिर्वधकाम्यया।शतंवर्षाणितामिस्रेनरकेपरिवर्तते १६५ ॥

प० । ब्राह्मणाय अवगुर्य एव द्विजातिः वधकाम्यया शतं वर्षाणि तामिस्रे नरके परिवर्तते ॥

यो० । द्विजातिः वधकाम्यया ब्राह्मणाय अवगुर्य एव तामिस्रे नरके शत वर्षाणि परिवर्तते — (परिभ्रमति) ॥

भा० । ता० । द्विजाति ब्राह्मणके मारने के लिये दण्डआदि को उठाकरके ही सौ वर्षतक तामिस्र नरकमें भ्रमता है १६५ ॥

ताडयित्वातृणेनापिसंरम्भान्मतिपूर्वकम्।एकविंशतिमाजातीःपापयोनिषुजायते १६६

प० । ताडयित्वा तृणेन अपि संरम्भात् मतिपूर्वकं एकविंशतिम् आः जातीः पापयोनिषु जायते ॥

यो० । संरम्भात् मतिपूर्वकं तृणेन अपि ब्राह्मणं ताडयित्वा पापयोनिषु (श्वादिषु) एक विंशतिमाः जातीः जायते ॥

भा० । ता० । क्रोध से जानबूझकर तृण से भी ब्राह्मणकी ताडना करके इक्कीस जन्मतक पापयोनि (कुत्ता आदि) योंमें जन्मता है १६६ ॥

अयुध्यमानस्योत्पाद्यब्राह्मणस्यासृगंगतः । दुःखंसुमहदाप्नोतिप्रेत्याप्राज्ञतयानरः १६७

प० । अयुध्यमानस्य उत्पाद्य ब्राह्मणस्य असृक् अंगतः दुःखं सुमहत् आप्नोति प्रेत्य अप्राज्ञतया नरः ॥

यो० । अयुध्यमानस्य ब्राह्मणस्य अंगतः असृक् (रुधिरं) उत्पाद्य—नरः प्रेत्य अप्राज्ञतया सुमहत् दुःखं आप्नोति ॥

भा० । ता० । युद्ध नहीं करतेहुये ब्राह्मणके अंग मेंसे रुधिरको निकासकर मनुष्य परलोक में शास्त्रके न जानने (मूर्खता) से अत्यंत दुःखको प्राप्तहोताहै १६७ ॥

शोणितंयावतःपांसून्संगृह्णातिमहीतलात् ।
तावतोऽब्दानमुत्रान्यैःशोणितोत्पादकोऽद्यते १६८ ॥

प० । शोणितं यावतः पांसून् संगृह्णाति महीतलात् तावतः अब्दान् अमुत्र अन्यैः शोणितोत्पादकः अद्यते ॥

यो० । शोणितं महीतलात् यावतः पांसून् संगृह्णाति—तावतः (पांसुपरिमितान्) अब्दान् अमुत्र (परलोके) अन्यैः (श्वाआदिभिः) शोणितोत्पादकः अद्यते ॥

भा० । ता० । रुधिर पृथ्वीके तलपरसे जितनी धूलके परमाणुओंको भिगोता है उतनेही वर्ष तक परलोकमें शोणित (रुधिर) के पैदाकरनेवालेको अन्य (कुत्ता गीदड़ आदि) भक्षणकरते हैं—इससे ब्राह्मणके ऊपर प्रहार न करे १६८ ॥

नकदाचिद्द्विजेतस्माद्विद्वानवगुरेदपि । नताडयेत्तृणेनापिनगात्रात्स्रावयेदसृक् १६९ ॥

प० । न कदाचित् द्विजे तस्मात् विद्वान् अवगुरेत् अपि न ताडयेत् तृणेन अपि न गात्रात् स्रावयेत् असृक् ॥

यो० । तस्मात्—विद्वान् पुरुषः कदाचित् अपि द्विजे न अवगुरेत्—तृणेन अपि न ताडयेत्—गात्रात् असृक् (रुधिरं) न स्रावयेत् ॥

भा० । ता० । जिससे विद्वान् पुरुष कदाचित् भी ब्राह्मणके ऊपर शस्त्र न उठावे और तृणसे भी ताडना न दे—और ब्राह्मणके देहमेंसे रुधिर भी न गिरावे—अर्थात् ये तीनों काम न करे १६९ ॥

अधार्मिकोनरोयोहियस्यचाप्यनृतंधनम् । हिंसारतश्चयोनित्यंनेहासौसुखमेधते १७०

प० । अधार्मिकः नरः यः हि यस्य च अपि अनृतं धनम् हिंसारतः च यः नित्यं न इह असौ सुखं एधते ॥

यो० । यः नरः अधार्मिकः अस्ति—यस्य अपि अनृतं धनं अस्ति—चपुनः यः नित्यं हिंसारतः अस्ति—असौ पुरुषः इहजगति सुखं न एधते—सुखयुक्तो न भवतीत्यर्थः ॥

भा० । ता० । जो मनुष्य अधार्मिकहै अर्थात् शास्त्र निषिद्ध अगम्यागमन आदिकर्मोंको करताहै—और जिसका साक्षी वा व्यवहार निर्णय आदिमें असत्यहीधनहै अर्थात् झूठबोलकर अपना पेट भरताहै और जो हिंसामें तत्परहै ऐसा मनुष्य इसलोक में सुखको नहीं भोगता—तिससे ये बात न करनी चाहिये १७० ॥

नसीदन्नपिधर्मेणमनोधर्मेनिवेशयेत् ।अधार्मिकाणांपापानामाशुपश्यन्विपर्ययम् १७१॥

प० । न सीदन् अपि धर्मेण मनः अधर्मे निवेशयेत् अधार्मिकाणां पापानां आशु पश्यन् विपर्ययम् ॥

यो० । अधार्मिकाणां पापानां आशु विपर्ययं पश्यन् सन् धर्मेण सीदन् अपि पुरुषः अधर्मे मनः न निवेशयेत् — न प्रवेशयेत् ॥

भा० । ता० । शास्त्रोक्तकर्मों के करनेसे दुःखितभी अधर्म करनेवालोंका शीघ्र विपर्यय (धन का नाश आदि) देखताहुआ मनुष्य अधर्म में मनको न लगावे अर्थात् अधर्मपूर्वक व्यवहार धन सम्पदा सुखकी प्राप्तिभी होतीहै तथापि चोरी अधर्मियोंकी वहसम्पदा शीघ्रही नष्टहोजाती है इससे अधर्ममें कदाचित् भी मनको न लगावे १७१ ॥

नाधर्मश्चरितोलोकेसद्यःफलतिगौरिव । शनैरावर्तमानस्तुकर्तुर्मूलानिकृन्तति १७२ ॥

प० । न अधर्मः चरितः लोके सद्यः फलति गौः इव शनैः आवर्तमानः तु कर्तुः मूलानि कृन्तति ॥

यो० । चरितः अधर्मः लोके गौः इव सद्यः न फलति — शनैः आवर्तमानः तु अधर्मः कर्तुः मूलानि कृन्तति (छिदति) ॥

भा० । जैसे भूमिबोने पर शीघ्र फल नहींदेती तिसीप्रकार कियाहुआ अधर्म शीघ्रही फलदायी नहींहोता किंतु कियाहुआ अधर्म क्रम २ से करनेवाले को जड़मूलसे नष्टकरदेताहै ॥

ता० । शुभ और अशुभ कर्मोंका परिपाक शास्त्रसे नियतसमयपर होताहै इससे कियाहुआ अधर्म का फल भूमि के समान तत्कालही नहींहोता—जैसे गौ (भूमि) बीजके बोतेही बहुतसे पकेहुये अन्नसे पूर्ण नहींहोती किंतु पाकके समयमेंही अन्नसे पूर्ण होतीहै—अथवा यह दृष्टान्त विधर्मसे है कि जैसे गौ (बैल वा गौ) बाहन और दोहनमें शीघ्रफलते हैं वैसे अधर्मनहींफलता किंतु क्रम २ से वर्तताहुआ अधर्म फलके संमुखहोताहुआ करनेवाले की जड़को नष्टकरदेता है अर्थात् धनआदि से संयुक्तहोकर भी शीघ्र नष्टहोजाता है १७२ ॥

यदिनात्मनिपुत्रेषुनचेत्पुत्रेषुनप्तृषु । नत्वेवतुकृतोऽधर्मःकर्तुर्भवतिनिष्फलः१७३ ॥

प०। यदि न आत्मनि पुत्रेषु न चेत् पुत्रेषु नप्तृषु न तु एव तु कृतः अधर्मः कर्तुः भवति निष्फलः॥

यो० । यदि आत्मनि अधर्मः न (फलति) तर्हि पुत्रेषु (फलति) पुत्रेषु नचेत् फलति तर्हि नप्तृषुफलति — तुपुनः कृतः अधर्मः कर्तुः निष्फलः न भवति ॥

भा० । ता० । जो करने के धनआदिके नाशको अधर्म नहींकरता है तो उसके पुत्रों के धन आदिको नष्टकरताहै और यदि पुत्रोंमें नहींफलताहै तो उसकेपौत्रोंमें फलताहै—अर्थात् पुत्रादि के धननाशसेही पिताको क्लेश कियाहुआ अधर्म देता है और यहबात शास्त्रोक्त होनेसे विश्वास करने योग्य है १७३ ॥

अधर्मेणैधतेतावत्ततोभद्राणिपश्यति । ततःसपत्नाञ्जयतिसमूलस्तुविनश्यति १७४॥

प० । अधर्मेण एधते तावत् ततः भद्राणि पश्यति ततः सपत्नान् जयति समूलः तु विनश्यति ॥

यो० । (अधर्मी मनुष्यः) तावत् अधर्मेण एधते — ततः भद्राणि पश्यति — ततः सपत्नान् जयति — तुपुनः समूलः विनश्यति ॥

भा० । ता० । अधर्मी मनुष्य पहिले अधर्मसे बढ़ताहै अर्थात् ग्राम धनआदिसे सम्पन्नहोता है और फिर अच्छी २ वस्तुओं को प्राप्तहोता है और फिर शत्रुओं को जीतताहै फिर कुछकाल में अधर्म के परिपाक से समूल (धनपुत्रादिसहित) नष्टहोजाताहै १७४ ॥

सत्यधर्मार्यवृत्तेषुशौचेचैवारमेत्सदा । शिष्यांश्चशिष्याद्धर्मेणवाग्बाहूदरसंयतः १७५ ॥

प० । सत्यधर्मार्यवृत्तेषु शौचे च एव आरमेत् सदा शिष्यान् च शिष्यात् धर्मेण वाग्बाहूदर-संयतः ॥

यो० । सत्यधर्मार्यवृत्तेषु चपुनः शौचे सदा आरमेत् चपुनः शिष्यान् धर्मेण सदा शिष्यात् (शिक्षांकुर्यात्) वाग्बाहूदरसंयतः स्यात् ॥

भा० । ता० । सत्य—धर्म—सदाचार—और शौच इनमें सदैव प्रीतिरक्खे और शिष्य (शिक्षा देनेयोग्य पुत्र भृत्य शिष्यआदि) को धर्मकीशिक्षादे और वाणी भुजा उदर इनका संयमरक्खे अर्थात् वाणी से सत्यभाषण—और भुजा से किसीको पीडा न देना—और उदरकासंयम अर्थात् अल्पभोजन करे १७५ ॥

परित्यजेदर्थकामौयौस्यातांधर्मवर्जितौ । धर्मंचाप्यसुखोदर्कंलोकविक्रुष्टमेवच १७६ ॥

प० । परित्यजेत् अर्थकामौ यौ स्यातां धर्मवर्जितौ धर्मं च अपि असुखोदर्कं लोकविक्रुष्टं एव च ॥

यो० । यौ धर्मवर्जितौ स्यातां तौ अर्थकामौ परित्यजेत् चपुनः असुखोदर्कं चपुनः लोकविक्रुष्टं कर्म — परित्यजेत् — न कुर्यात् ॥

भा० । ता० । जो धन और काम धर्म से वर्जितहो (जैसे चोरी से धनसंचय और दीक्षा के दिन पत्नीकासंगम) उनको—और जो धर्म भविष्यकालमें दुःखदायीहो उस धर्मको (जैसे अपने पुत्रआदि को सर्वस्वका दान—और जो कर्म जगत् में निंदितहो (जैसे अष्टकाआदि श्राद्धमें गौ का वध) उसको त्यागदे १७६ ॥

नपाणिपादचपलोननेत्रचपलोऽनृजुः । नस्याद्वाक्चपलश्चैवनपरद्रोहकर्मधीः १७७ ॥

प० । न पाणिपादचपलः न नेत्रचपलः अनृजुः न स्यात् वाक्चपलः च एव न परद्रोह-कर्मधीः ॥

यो० । पाणिपादचपलः — नेत्रचपलः — अनृजुः — चपुनः वाक्चपलः परद्रोहकर्मधीः — न स्यात् ॥

भा० । ता० । हाथ और पादोंसे चपलता न करे अर्थात् निष्प्रयोजन किसीवस्तु का ग्रहण हाथोंसे न करे और निरर्थक भ्रमण न करे—और नेत्रोंकी भी चपलता न करे जैसे अन्यकी स्त्री को देखना और कुटिलता न करे और कठोर और निंदितवाणी न कहे और अन्यकी जिस में हिंसा (दुःख) हो ऐसे कर्ममें बुद्धिको न रक्खे १७७ ॥

येनास्यपितरोयातायेनयाताःपितामहाः । तेनयायात्सतांमार्गंतेनगच्छन्नरिष्यते १७८ ॥

प० । येन अस्य पितरः याताः येन याताः पितामहाः तेन यायात् सतां मार्गं तेन गच्छन् न रिष्यते ॥

यो० । येन मार्गेण अस्य पितरः याताः येन पितामहाः याताः तेन सतां मार्गं यायात् —तेनगच्छन् सन् न रिष्यते (अधर्मेण न हिंस्यते) ॥

भा० । ता० । यदि शास्त्रोक्तमार्ग बहुत समझे तो जिसमार्गको इसके पिता—पितामह चले आयेहैं उसी सत्पुरुषोंके मार्गको यहभी चले (अर्थात् वहीकर्मकरै जो पिता आदिने किया हो) और मार्गको चलतेहुये को अधर्म भी हिंसानहींकरता अर्थात् अधर्मसे दुःखी नहींहोता १७८ ॥

ऋत्विक्पुरोहिताचार्यैर्मातुलातिथिसंश्रितैः। बालवृद्धातुरैर्वैद्यैर्ज्ञातिसंबन्धिबान्धवैः १७९

मातापितृभ्यांयामीभिर्भ्रात्रापुत्रेणभार्यया। दुहित्रादासवर्गेणविवादंनसमाचरेत् १८०॥

प० । ऋत्विक्पुरोहिताचार्यैः मातुलातिथिसंश्रितैः बालवृद्धातुरैः वैद्यैः ज्ञातिसंबंधिबान्धवैः ॥

प० । मातापितृभ्यां यामीभिः भ्रात्रा पुत्रेण भार्यया दुहित्रा दासवर्गेण विवादं न समाचरेत् ॥

यो० । ऋत्विक्पुरोहिताचार्यैः मातुलातिथिसंश्रितैः बालवृद्धातुरैः वैद्यैः ज्ञातिसंबंधिबांधवैः — मातापितृभ्यां — यामीभिः भ्रात्रा — पुत्रेण — भार्यया — दुहित्रा — दासवर्गेण सह — विवादं न समाचरेत् (न कुर्यात) ॥

भा० । ता० । ऋत्विक्—पुरोहित—आचार्य—मातुल—अतिथि—संश्रित (जो अपने आश्रयहो) बालक—वृद्ध—रोगी—वैद्य—ज्ञाति—सम्बन्धी (शालादि) बंधु (माताके पक्षी)+माता पिता—यामी (भगिनी और पुत्रवधु आदि) भ्राता—पुत्र—स्त्री—लड़की—दासों (सेवक) का समूह—इन ऋत्विक् आदिके संग विवाद न करै १७९ । १८० ॥

एतैर्विवादान्संत्यज्यसर्वपापैःप्रमुच्यते। एभिर्जितैश्चजयतिसर्वाँल्लोकानिमान्गृही १८१

प० । एतैः विवादान् संत्यज्य सर्वपापैः प्रमुच्यते एभिः जितैः च जयति सर्वान् लोकान् इमान् गृही ॥

यो० । गृही एतैः सह विवादान् संत्यज्य सर्वपापैः प्रमुच्यते — चपुनः एभिः जितैः इमान् सर्वान् लोकान् जयति ॥

भा० । ता० । इनके संग विवादोंको त्यागकर गृहस्थी संपूर्ण पापोंसे छुटताहै और इनको जीतकर अर्थात् इनके संग विवादकी उपेक्षाकरके इन संपूर्ण लोकों (जो आगे कहेंगे) को जीतताहै १८१ ॥

आचार्योब्रह्मलोकेशःप्राजापत्येपिताप्रभुः।
अतिथिस्त्विन्द्रलोकेशोदेवलोकस्यचर्त्विजः १८२॥

प० । आचार्यः ब्रह्मलोकेशः प्राजापत्ये पिता प्रभुः अतिथिः तु इन्द्रलोकेशः देवलोकस्य च ऋत्विजः ॥

यो० । आचार्यः ब्रह्मलोकेशः — पिता प्राजापत्ये प्रभुः तुपुनः अतिथिः इन्द्रलोकेशः — अस्ति — चपुनः ऋत्विजः देवलोकस्य (ईशाः सन्ति) एतैः विवादत्यागेन तत् तल्लोकप्राप्तिर्भवतीत्यर्थः ॥

भा० । ता० । ब्रह्मलोक का स्वामी आचार्य—प्राजापत्य लोकका प्रभु पिता—इन्द्रलोक का स्वामी अभ्यागत—है और देवलोक के स्वामी ऋत्विजहोतेहैं अर्थात् जो जिसलोक का स्वामी है उसीलोक की प्राप्ति उसके संग विवाद त्यागनेसे होतीहै १८२ ॥

यामयोऽप्सरसांलोकेवैश्वदेवस्यबान्धवाः ।
संबन्धिनअपांलोकेपृथिव्यांमातृमातुलौ १८३ ॥

प० । यामयः अप्सरसां लोके वैश्वदेवस्य बान्धवाः सम्बन्धिनः अपां लोके पृथिव्यां मातृमातुलौ ॥

यो० । अप्सरसां लोके यामयः—बांधवाः वैश्वदेवस्य—अपां लोके सम्बन्धिनः (ईशाः संति) पृथिव्यां मातृमातुलौ (ईशौस्तः) ॥

भा० । ता० । यामी (बहिन पुत्रवधुआदि) अप्सराओं के लोककी—बन्धु विश्वेदेवाओं के लोकके—और सम्बन्धी वरुणलोक के ईश्वरहैं और माता और मातुल (मामा) ये दोनों भूलोक के स्वामी हैं १८३ ॥

आकाशेशास्तुविज्ञेयाबालवृद्धकृशातुराः ।
भ्राताज्येष्ठःसमःपित्राभार्यापुत्रःस्वकातनुः १८४ ॥

प० । आकाशेशाः तु विज्ञेयाः बालवृद्धकृशातुराः भ्राता ज्येष्ठः समः पित्रा भार्या पुत्रः स्वका तनुः ॥

यो० । बालवृद्धकृशातुराः आकाशेशाः विज्ञेयाः ज्येष्ठः भ्राता पितासमः ज्ञेयः भार्या—पुत्रः स्वका तनुः (शरीरं) ज्ञेयः ॥

भा० । ता० । बालक वृद्ध—कृश—(अल्पधनी) और रोगी ये सब आकाशलोक के स्वामी जानने—और जेठाभाई पिताके समान और स्त्री और पुत्र ये दोनों अपनादेहही जानने इससे अपनी आत्मा के संग कैसे विवाद होसक्ताहै १८४ ॥

छायास्वोदासवर्गश्चदुहिताकृपणंपरम् । तस्मादेतैरधिक्षिप्तःसहेतासंज्वरःसदा १८५ ॥

प० । छाया स्वः दासवर्गः च दुहिता कृपणं परं तस्मात् एतैः अधिक्षिप्तः सहेत असंज्वरः सदा ॥

यो० । स्वः दासवर्गः छाया—दुहिता परं कृपणं—तस्मात् एतैः अधिक्षिप्तः पुरुषः असंज्वरः सन सदा सहेत—एतेषां निंदादि सहेत दुःखवतश्च न भवेदित्यर्थः ॥

भा० । ता० । अपने दासोंका समूह अपनीही छाया है अर्थात् जैसे अपनीछाया वहांकोही चलती है जहां आपजाता है इसीप्रकार अपने दास भी अपने अनुयायी होते हैं—और अपनी कन्या परमकृपा का पात्रहै—तिससे इनसे निंदाआदिको प्राप्तहुआ भी मनुष्य दुःखको न मान कर सदा सहतारहै—अर्थात् इनकी निंदाको भी सहै और क्रोध न करै १८५ ॥

प्रतिग्रहसमर्थोऽपिप्रसंगंतत्रवर्जयेत् । प्रतिग्रहेणह्यस्याशुब्राह्मंतेजःप्रशाम्यति १८६ ॥

प० । प्रतिग्रहसमर्थः अपि प्रसंगं तत्र वर्जयेत् प्रतिग्रहेण हि अस्य आशु ब्राह्मं तेजः प्रशाम्यति ॥

यो० । प्रतिग्रहसमर्थः अपि द्विजः तत्र (प्रतिग्रहे) प्रसंगं वर्जयेत् हि (यतः) प्रतिग्रहेण अस्य (ब्राह्मणस्य) ब्राह्मं तेजः प्रशाम्यति (नश्यति) ॥

भा० । ता० । प्रतिग्रहलेनेमें समर्थ (विद्या तप सदाचारसे युक्त) भी ब्राह्मण प्रतिग्रहमें वारं-बार प्रवृत्ति को त्यागदे—क्योंकि प्रतिग्रह से इस ब्राह्मण ब्राह्म (वेदाध्ययन आदि का प्रभाव) तेज नष्टहोजाता है—यद्यपि शरीरके निर्वाहमात्र प्रतिग्रहलेना कहाहै तो भी सामान्यसे अर्जन में दोष नहीं है और विशेषकर प्रतिग्रहलेनेसे ब्राह्मणका प्रभाव नष्टहोताहै यह दिखानेकेलिये यह वचन है १८६ ॥

नद्रव्याणामविज्ञायविधिंधर्म्यंप्रतिग्रहे । प्राज्ञःप्रतिग्रहंकुर्यादवसीदन्नपिक्षुधा १८७ ॥

प० । नँ द्रव्याणां अविज्ञाय विधिं धर्म्यं प्रतिग्रहे प्राज्ञः प्रतिग्रहं कुर्यात् अवसीदन् अँपि क्षुधा ॥

यो० । प्राज्ञः द्रव्याणां प्रतिग्रहे धर्म्यविधिं अविज्ञाय क्षुधा अवसीदन् अपि प्रतिग्रहं न कुर्यात् ॥

भा० । ता० । बुद्धिमान् मनुष्य द्रव्योंके प्रतिग्रह में धर्मके अनुकूल विधि (ग्रहण योग्य वस्तु देवता मंत्र आदि) के विनाजाने क्षुधासे दुःखीहोनेपर भी प्रतिग्रह न ले अर्थात् स्वस्थतामें तो कदाचित् भी नहीं लेसक्ता १८७ ॥

हिरण्यभूमिमश्वंगामन्नंवासस्तिलान्घृतम्।प्रतिगृह्णन्नविद्वांस्तुभस्मीभवतिदारुवत् १८८॥

प० । हिरण्यं भूमिं अश्वं गां अन्नं वासः तिलान घृतं प्रतिगृह्णन् अविद्वान् तुँ भस्मीभवति दारुवत् ॥

यो० । पुनः अविद्वान् ब्राह्मणः हिरण्य—भूमिं—अश्वं—गां—अन्नं—वासः—तिलान—घृतं—प्रतिगृह्णन् सन् दारुवत् भस्मीभवति ॥

भा० । ता० । मूर्ख ब्राह्मण अर्थात् (वेदाध्ययन शून्य) सोना—भूमि—घोड़ा—गौ—अन्न—वस्त्र—तिल—घी—इनका प्रतिग्रह लेनेसे इसप्रकार भस्महोताहै जैसे अग्निसे काठ १८८ ॥

हिरण्यमायुरन्नंचभूर्गौश्चाप्योषतस्तनुम् ।
अश्वश्चक्षुस्त्वचंवासोघृतंतेजस्तिलाःप्रजाः १८९ ॥

प० । हिरण्यं आयुः अन्नं चँ भूः गौः चँ अँपि ओषतः तनुं अश्वः चक्षुः त्वचं वासः घृतं तेजः तिलाः प्रजाः ॥

यो० । हिरण्यं चपुनः अन्नं आयुः ओषतः (दहतः) भूः चपुनः गौः तनुं (देहं) ओषतः अश्वः चक्षुः—वासः त्वचं—घृतं तेजः (ओषति) तिलाः प्रजाः (ओषन्ति) ॥

भा० । ता० । सोन और अन्नका प्रतिग्रह अवस्थाको और भूमि और गौ देहको दग्धकरते हैं—अश्व नेत्रोंको वस्त्र त्वचाको—घृत तेजको तिल प्रजा (संतान) को दग्धकरतेहैं अर्थात् जो अव-स्था आदि की अभिलाषा करे वह सुवर्ण आदि का प्रतिग्रह न ले १८९ ॥

अतपास्त्वनधीयानःप्रतिग्रहरुचिर्द्विजः । अंभस्यश्मप्लवेनेवसहतेनैवमज्जति १९० ॥

प० । अतपाः तुँ अनधीयानः प्रतिग्रहरुचिः द्विजः अंभसि अश्मप्लवेन एवँ सहँ तेनँ एवँ मज्जति ॥

यो० । यः द्विजः अतपाः अनधीयानः प्रतिग्रहरुचिः भवति सः अश्मप्लवेन अंभसि (जले) इव तेन (दात्रा) सह एव निमज्जति नरके इतिशेषः ॥

भा० । ता० । तप और विद्यासे हीन जो ब्राह्मण प्रतिग्रह लेनेकी इच्छाकरताहै वह ब्राह्मण उस देनेवाले सहित इसप्रकार नरक में डूबताहै—जैसे जलमें पत्थरकी नावसे तरताहुआ पत्थर की नावसहित डूबताहै १९० ॥

तस्मादविद्वान्विभियाद्यस्मात्तस्मात्प्रतिग्रहात् ।
स्वल्पकेनाप्यविद्वान्हिपंकेगौरिवसीदति १९१ ॥

प० । तस्मात् अविद्वान् विभियात् यस्मात् तस्मात् प्रतिग्रहात् स्वल्पकेन अपि अविद्वान् हि पंके गौः इव सीदति ॥

यो० । तस्मात् अविद्वान् यस्मात् तस्मात् प्रतिग्रहात् विभियात् — हि (यतः) अविद्वान् स्वल्पकेनअपि (प्रतिग्रहेण) गौः पङ्के इव सीदति ॥

भा० । ता० । तिससे अविद्वान (मूर्ख) ब्राह्मण जिसतिस (यद्वा तद्वा) प्रतिग्रह से डरै— क्योंकि अविद्वान् ब्राह्मण अल्पप्रतिग्रह से इसप्रकार नरक में दुःखी होता है जैसे पंक (कीच) में गौ—तिससे सीसेआदि अल्पप्रतिग्रह भी द्विज ग्रहण न करै १९१ ॥

नवार्यपिप्रयच्छेत्तुबैडालव्रतिकेद्विजे । नवकव्रतिकेविप्रेनावेदविदिधर्मवित् १९२ ॥

प० । न वारि अपि प्रयच्छेत् तु बैडालव्रतिके द्विजे न बकव्रतिके विप्रे न अवेदविदि धर्मवित् ॥

यो० । धर्मवित् बैडालव्रतिकेद्विजे — बकव्रतिकेविप्रे अवेदविदिविप्रे — वारि (जलं) अपि न प्रयच्छेत् (न दद्यात्)

भा० । धर्मकाज्ञाता पुरुष बैडालव्रतिक और बकव्रतिक और जो वेदको न जाने इनतीनों को जलभी न दे अर्थात् ये तीनों दानके अधिकारी नहींहैं ॥

ता० । अब प्रतिग्रह लेनेवालेके धर्मको कहकर देनेवालेके धर्मको कहतेहैं कि जो द्रव्य काक आदिको भी दियाजाता है वहभी धर्मज्ञपुरुष बैडालव्रतिक आदिकोंको न दे इस अधिककथन से द्रव्यांतर का दानभी निषिद्ध है केवल जलदानकाही निषेधनहीं—और पहिले—पाषंडिनोवि-कर्मस्थान्—इसमें अतिथि मानकर सत्कारपूर्वक बैडालव्रतिक को दानका निषेध कहा है—और यहांपर धनके दानका निषेधकहा है—इसीसे आगे कहेंगे कि विधि से संचितधनभी न दे—और बकव्रतिक और जो वेदको न जानताहो (अर्थात् जहांतक वेदपाठी मिले) इनसबको धर्म का ज्ञाता पुरुष जलभी नदे धनआदि तो कैसे देसक्ताहै १९२ ॥

त्रिष्वप्येतेषुदत्तंहिविधिनाप्यर्जितंधनम् । दातुर्भवत्यनर्थायपरत्रादातुरेवच १९३ ॥

प० । त्रिषु अपि एतेषु दत्तं हि विधिना अपि अर्जितं धनम् दातुः भवति अनर्थाय परत्र अदातुः एवं च ॥

यो० । एतेषु त्रिषु दत्तं विधिना अर्जितं अपि धनं दातुः चपुनः अदातुः प्रतिग्रहीतुः परत्र अनर्थाय भवति ॥

भा० । ता० । विधिसे संचित किया भी धन इनतीनों को विधिपूर्वक देनेसे भी दाता और प्रतिग्रह लेनेवाला इनदोनों के अनर्थ के लिये (नरक के लिये) होताहै १६३ ॥

यथाप्लवेनौपलेननिमज्जत्युदकेतरन्। तथानिमज्जतोऽधस्तादज्ञौदातृप्रतीच्छकौ१९४॥

प० । यथा प्लवेन औपलेन निमज्जति उदके तरन् तथा निमज्जतः अधस्तात् अज्ञौ दातृप्रतीच्छकौ ॥

यो० । यथा औपलेनप्लवेन उदकेतरन मनः निमज्जति तथा अज्ञौदातृप्रतीच्छकौ अधस्तात् निमज्जतः (नरकंगच्छतः) ॥

भा० । ता० । जैसे पाषाणकी नावसे जलमें तरताहुआ मनुष्य डूबताहै इसीप्रकार दान और प्रतिग्रहके शास्त्रको न जाननेवाले दाता और प्रतीच्छक (दानलेनेवाला) नीचे (नरकमें) डूबतेहैं—(अतपास्त्वनधीयानः) इसमें लेनेवालेकी प्रधानतासे और दाताकी प्रधानतासे निंदा कहीहै इससे पुनः उक्ति दोष नहींहै १९४ ॥

धर्मध्वजीसदालुब्धश्छाद्मिकोलोकदम्भकः। वैडालव्रतिकोज्ञेयोहिंस्रःसर्वाभिसंधकः१९५

प० । धर्मध्वजी सदा लुब्धः छाद्मिकः लोकदंभकः वैडालव्रतिकः ज्ञेयः हिंस्रः सर्वाभिसंधकः ॥

यो० । धर्मध्वजी- सदालुब्धः छाद्मिकः लोकदंभकः — हिंस्रः सर्वाभिसंधकः — द्विजः वैडालव्रतिकः ज्ञेयः विद्वद्भिरितिशेषः ॥

भा० । जो ब्राह्मण धर्मध्वजी—सदालोभी—छाद्मिक—लोकदंभक—हिंसक—और सबका निंदक है—उसे वैडालव्रतिक कहतेहैं ॥

ता० । जो मनुष्य धर्मध्वजीहो अर्थात् बहुतजनोंके आगे तो धर्मकरे और स्वयं और अन्यों के द्वारा विख्यातकरे और परोक्षमें धर्मको न करे उस मनुष्यका धर्मध्वजा (चिह्न) के समान है—और जो सदैव लोभी है—और जो छद्म (ठ्याज) से चले और जो पराईधरोहरके हरने आदिसे जगतका वंचकहो—और जो हिंसामें तत्परहो—और सर्वाभिसंधक (परायेगुणोंके न सहने से सबकी निंदाकरे—उसको वैडालव्रतिक जानना—अर्थात् जैसे विडाल मूषकोंके भक्षणार्थ ध्यानी सा प्रतीतहोताहै वैसाही वह ब्राह्मण भीहै १९५ ॥

अधोदृष्टिर्नैष्कृतिकःस्वार्थसाधनतत्परः। शठोमिथ्याविनीतश्चबकव्रतचरोद्विजः१९६॥

प० । अधोदृष्टिः नैष्कृतिकः स्वार्थसाधनतत्परः शठः मिथ्याविनीतः च बकव्रतचरः द्विजः ॥

यो० । यः द्विजः अधोदृष्टिः नैष्कृतिकः स्वार्थसाधनतत्परः शठः नपुनः मिथ्याविनीतः अस्ति सः बकव्रतचरः ज्ञेयः ॥

भा० । जो द्विज नीचेको दृष्टिरक्खे और निठुर और स्वार्थकी सिद्धिमें तत्परहो—और शठ और मिथ्या नम्रहो वह बकव्रतचर होताहै ॥

ता० । जो द्विज अपने विनयकी प्रसिद्धिके लिये नीचेकोही दृष्टिरक्खे और जो नैष्कृतिक (निठुरतासे रहै) हो और जो अपने प्रयोजनकी सिद्धिमें तत्परहो—और जो शठ (टेढ़ा) और जो मिथ्या विनीत (कपटसे विनयशील) हो वह बकव्रतचर होताहै अर्थात् जैसे बक मच्छियोंके पकड़नेके निमित्त अधोदृष्टि आदि रूपको बनाताहै ऐसेही वह भी होताहै १९६ ॥

येबकव्रतिनोविप्रायेचमार्जारलिङ्गिनः । तेपतन्त्यन्धतामिस्रेतेनपापेनकर्मणा १९७ ॥

प०। ये बकव्रतिनः विप्राः ये च मार्जारलिंगिनः ते पतंति अंधतामिस्रे तेन पापेन कर्मणा ॥

यो० । ये विप्राः बकव्रतिनः चपुनः ये मार्जारलिंगिनः (वैडाल व्रतिकाः) (संति) ते तेनपापेन कर्मणा अंधतामिस्रे नरके पतंति ॥

भा०। ता०। जो ब्राह्मण बगला और मार्जारके वृतका आचरण करतेहैं वे उसपाप (निंदित) कर्मसे अंधतामिस्र नरकमें पड़तेहैं १९७ ॥

नधर्मस्यापदेशेनपापंकृत्वाव्रतंचरेत् । वृतेनपापंप्रच्छाद्यकुर्वन्स्त्रीशूद्रदम्भनम् १९८॥

प० । न धर्मस्य अपदेशेन पापं कृत्वा वृतं चरेत् वृतेन पापं प्रच्छाद्य कुर्वन् स्त्रीशूद्रदंभनं ॥

यो० । पापं व्रतेन प्रच्छाद्य स्त्रीशूद्रदंभनं कुर्वन सन धर्मस्य अपदेशेन पापंकृत्वा व्रतं न चरेत् ॥

भा० । ता० । प्रायश्चित रूप प्राजापत्य आदि वृतसे पाप दूरहोसक्ताहै इस बुद्धिसे स्त्री और शूद्रों और मूर्खजनोंको मोहताहुआ पुरुष धर्मके मिषसे पापकरके वृत न करे १९८ ॥

प्रेत्येहचेदृशाविप्रागर्ह्यन्तेब्रह्मवादिभिः । छद्मनाचरितंयच्चव्रतंरक्षांसिगच्छति १९९ ॥

प० । प्रेत्य च इह च ईदृशाः विप्राः गर्ह्यंते ब्रह्मवादिभिः छद्मना चरितं यत् च वृतं रक्षांसि गच्छति ॥

यो० । प्रेत्य चपुनः इह ईदृशाः विप्राः ब्रह्मवादिभिः गर्ह्यंते — यत व्रतं छद्मना आचरितं तत् व्रतं रक्षांसि गच्छति ॥

भा० । ता० । परलोक और इसलोक में ऐसे ब्राह्मणों की ब्रह्मवादी निंदाकरते हैं और जो वृत छद्मसे कियाहो वह राक्षसों को पहुंचताहै अर्थात् निष्फलहोताहै १९९ ॥

अलिङ्गीलिङ्गिवेषेणयोवृत्तिमुपजीवति । सलिङ्गिनांहरत्येनस्तिर्यग्योनौचजायते२००॥

प० । अलिंगी लिंगिवेषेण यः वृत्तिं उपजीवति सः लिंगिनां हरति एनः तिर्यग्योनौ च जायते ॥

यो० । यः अलिंगी लिंगिवेषेण वृत्तिं उपजीवति सलिंगिनां एनः (पापं) हरति चपुनः तिर्यग्योनौ जायते — तस्मात् एतत न कर्तव्यम ॥

भा० । ता० । जो पुरुष ब्रह्मचारी वस्तुतः नहो और ब्रह्मचारीके वेष (मेखला मृगचर्म दंड) से भिक्षाआदि से जीविकाकरै वह ब्रह्मचारियों के पापकाभागी होता है और तिर्यक्योनि (सर्प आदि) में पैदाहोताहै—तिससे यह न करना चाहिये २०० ॥

परकीयनिपानेपुनस्नायाच्चकदाचन । निपानकर्तुःस्नात्वातुदुष्कृतांशेनलिप्यते २०१ ॥

प० । परकीयनिपानेषु न स्नायात् च कदाचन निपानकर्तुः स्नात्वा तु दुष्कृतांशेन लिप्यते ॥

यो० । परकीयनिपानेषु (पुष्करिण्यादिषु) कदाचन नस्नायात् स्नात्वातु निपानकर्तुः दुष्कृतांशेन (चतुर्थभागेन) लिप्यते (युक्तोभवति) ॥

भा० । पराये निपानों में कभी भी स्नान न करै यदि करै तो निपान बनानेवाले के चौथाई पाप का भागी होता है ॥

ता० । अन्य के बनाये निपानों (पुष्करिणी आदि) में कदाचित् भी स्नान न करै क्योंकि

उसमें स्नान करके निपान करने वालेके चौथाई पाप से लिपायमान होता है अर्थात् भोगता है और यदि किसीने जो बनाये नहीं ऐसे नदीआदि स्नानार्थ न मिलें तो अन्य के बनाये निपानों में इस याज्ञवल्क्य की कहीहुई विधि से स्नान आदि करै कि अन्यके जलोंमें विना पांच पिण्ड निकासे स्नान न करै किन्तु चार मिट्टी के पिण्ड (ढेले) निकासकर स्नानकरै और स्नानकरके देवता और पितरों के निमित्त तर्पण करै २०१ ॥

यानशय्यासनान्यस्यकूपोद्यानगृहाणिच।अदत्तान्युपभुञ्जानएनसःस्यात्तुरीयभाक् २०२

प० । यानशय्यासनानि अस्य कूपोद्यानगृहाणि च अदत्तानि उपभुंजानः एनसः स्यात् तुरीयभाक् ॥

यो० । अस्य (परस्य) अदत्तानि यानशय्यासनानि चपुनः कूपोद्यानगृहाणि उपभुंजानः पुरुषः एनसः (पापस्य) तुरीयभाक् स्यात् ॥

भा०।ता०। अन्य के विनादिये हुये—अर्थात् अनुमतिके विना यान शय्या आसन कूप उद्यान और गृह इनको भोगता (वर्त्तता)हुआ मनुष्य पापके चतुर्थांश का भागी होताहै—तिससे सबके उपकारार्थ बनाकर छोड़े हुये मठ कूप आदि के भोगने और स्नान आदि में कुछ दोष नहींहै २०२ ॥

नदीषुदेवखातेषुतडागेषुसरःसुच । स्नानंसमाचरेन्नित्यंगर्तप्रस्रवणेषुच २०३ ॥

प० । नदीषु देवखातेषु तडागेषु सरस्सु च स्नानं समाचरेत् नित्यं गर्तप्रस्रवणेषु च ॥

यो० । नदीषु देवखातेषु—तडागेषु चपुनः सरस्सु चपुनः गर्तप्रस्रवणेषु नित्यं स्नानं समाचरेत् ॥

भा० । नदी और देवताओं के खोदे तडाग—सर (छोटे तालाव) और गर्त और प्रस्रवण इनमें नित्यस्नान करै ॥

ता० । नदीऔर देवताओंके खोदेहुये तालाव और सर और गर्त और प्रस्रवण इनमें नित्य स्नान करै और गर्त वे होतेहैं जिनका वहाव आठहजार धनुषसे कमहो और चारहाथ का एक धनुषहोताहै क्योंकि छन्दोग परिशिष्टमें यह कहाहै कि आठहजार धनुषतक जिनकी गतिनहींहै वे नदीनहीं हैं किन्तु वेगर्त कहाते हैं—यद्यपि इसीसे परके निपानका भी निषेध सिद्धथा तथापि अपने निमित्त छोड़े हुये तडागोंमें स्नान आदि की अनुमति के लियेहै और वह अनुमति भी नदी आदिके असम्भव के समय ही है २०३ ॥

यमान्सेवेतसततंननित्यंनियमान्बुधः ।
यमान्पतत्यकुर्वाणोनियमान्केवलान्भजन् २०४ ॥

प० । यमान् सेवेत सततं न नित्यं नियमान् बुधः यमान् पतति अकुर्वाणः नियमान् केवलान् भजन् ॥

---

१ पंच पिण्डाननुद्धृत्य न स्नायात्परवारिषु उद्धृत्यचतुरःपिण्डान् पारक्येस्नानमाचरेत् स्नात्वा च तर्पयेद्देवान्—पितॄंश्चैवविशेषतः ॥

२ धनुः सहस्राण्यष्टौच गतिर्यासांनविद्यते नतानदीशब्दवहागर्तास्ताःपरिकीर्तिताः ॥

यो० । बुधः यमान् सततं सेवेत — नियमान् नित्यं न सेवेत — यमान् अकुर्वाणः — केवलान् नियमान् भजन् सन् पुरुषः पतति ॥

भा० । विद्वान् पुरुष यमों को नित्यकरै और नियमों को नित्य न करे क्योंकि केवल नियमों को करता हुआ और यमोंको न करता हुआ मनुष्य पतित होताहै ॥

ता० । नियमोंकी अपेक्षा यमोंकी अधिक(श्रेष्ठ)ता दिखानेकेलिये यह श्लोकहै कुछ नियमोंके निषेधार्थ नहींहै क्योंकि दोनोंशास्त्रोंकहैं—और याज्ञवल्क्यने येयम और नियमकेहेहैं कि ब्रह्मचर्य दया—क्षमा—ध्यान—सत्य—अकठोरता—अहिंसा—चोरीकात्याग—मधुरस्वभाव और इन्द्रियोंकादमन येदश यमकहेहैं—और स्नान—मौन—उपवास—यज्ञ—स्वाध्याय—लिंग इन्द्रियकारोकना—गुरुकी सेवा—शौच—अक्रोध—और अप्रमाद येदशनियमकहेहैंइन यम नियमोंके स्वरूपकाज्ञाता पुरुष सम्पूर्ण स्नान आदि नियमोंके त्यागने पर भी अहिंसा आदि यमों को करे और नियमों को करता हुआ और यमों को न करनेवाला पुरुष पतित होता है इस प्रकार यमोंकी स्तुति के लिये यह वचन है मेधातिथि गोविन्दराज तो यह कहते हैं कि हिंसाका त्याग आदि यमहैं और वेद का जप आदि नियमहैं अहिंसा—सत्यवचन—ब्रह्मचर्य—अदम्भ—और अस्तेय (चोरी का त्याग) ये पांच यम कहेहैं—और क्रोधका त्याग—गुरुकी सेवा—शौच—लघुभोजन—और अप्रमाद ये पांच नियम कहेहैं २०४ ॥

नाश्रोत्रियतते यज्ञे ग्रामयाजिकृते तथा । स्त्रिया क्लीवेन च हुते भुञ्जीत ब्राह्मणः क्वचित् २०५॥

प० । न अश्रोत्रियतते यज्ञे ग्रामयाजिकृते तथा स्त्रिया क्लीवेन च हुते भुंजीत ब्राह्मणः क्वचित् ॥

यो० । अश्रोत्रियतते—तथा ग्रामयाजिकृते यज्ञे — स्त्रिया च क्लीवेन हुते यज्ञे ब्राह्मणः क्वचित् न भुंजीत ॥

भा० । ता० । जिसने वेद न पढ़ाहो उसके प्रारम्भकिये यज्ञमें अग्नीषोमीय कर्म के पीछे भी ब्राह्मण कदाचित्भी भोजन न करे और ग्राम (अनेकों) को यज्ञकरानेवालेके यज्ञमें और जिस यज्ञ में स्त्री और नपुंसकआहुतिदें वहां—ब्राह्मण कदाचित् भी भोजन न करे २०५ ॥

अश्लीकमेतत्साधूनां यत्र जुह्वत्यमी हविः । प्रतीपमेतद्देवानां तस्मात्तत्परिवर्जयेत् २०६॥

प० । अश्लीकं एतत् साधूनां यत्र जुह्वति अमी हविः प्रतीपं एतत् देवानां तस्मात् तत् परिवर्जयेत् ॥

यो० । यत्र अमी (अश्रोत्रियादयः) हविः जुह्वति एतत् साधूनां अश्लीकं (श्रीनाशकं) एतत् देवानां प्रतीपं (प्रतिकूलं) तस्मात् तत् परिवर्जयेत — अश्लीकमितिपदे रेफस्यलः पाठः — श्रीघ्नमित्यर्थः ॥

भा० । ता० । जिसयज्ञ में ये पूर्वोक्त होम करते हैं वहकर्म साधुओंकी लक्ष्मीका नाशक है और देवताओं के भी प्रतिकूलहै तिससे इसका त्यागदे २०६ ॥

---

१ ब्रह्मचर्यं दयाक्षान्तिर्ध्यानं सत्यमकल्कता अहिंसास्तेयमाधुर्ये दमश्चेतियमाःस्मृताः स्नानंमौनोपवासेज्यास्वाध्यायोपस्थनिग्रहः नियमोगुरुशुश्रूषा शौचाक्रोधाप्रमादता ॥

२ अहिंसासत्यवचनं ब्रह्मचर्यमकल्कता—अस्तेयमितिपंचैतेयमाःपरिकीर्तिताः अक्रोधोगुरुशुश्रूषाशौचमाहारलाघवम् अप्रमादश्चसततं पंचैतेनियमाःस्मृताः ॥

मत्तक्रुद्धातुराणांचनभुञ्जीतकदाचन । केशकीटावपन्नंचपदास्पृष्टंचकामतः २०७ ॥

प० । मत्तक्रुद्धातुराणां च न भुंजीत कदाचन केशकीटावपन्नं च पदा स्पृष्टं च कामतः ॥

यो० । मत्तक्रुद्धातुराणां चपुनः केशकीटावपन्नं चपुनः कामतः पदास्पृष्टं अन्नं कदाचन न भुंजीत ॥

भा० । ता० । उन्मत्त क्रोधी–रोगी इनके अन्नको और जिसमें केश और कीट पड़ेहों उस अन्नको और जिसको जानकर पैरसे स्पर्शकियाहो उसअन्नको कदाचित् भी भोजन न करै २०७ ॥

भ्रूणघ्नावेक्षितंचैवसंस्पृष्टंचाप्युदक्यया । पतत्रिणावलीढंचशुनासंस्पृष्टमेवच २०८ ॥

प० । भ्रूणघ्नावेक्षितं च एव संस्पृष्टं च अपि उदक्यया पतत्रिणावलीढं च शुना संस्पृष्टं एवं च ॥

यो० । भ्रूणघ्नावेक्षितं – चपुनः उदक्ययासंस्पृष्टं – पतत्रिणावलीढं – चपुनः शुना संस्पृष्टं अन्नं – कदाचन न भुंजीत ॥

भा० । ता० । भ्रूणघ्न (गो आदिकाहननकरनेवाला) के देखे और रजस्वलाके स्पर्शकिये– और पक्षीके जूंठे और कुत्तेके स्पर्श किये अन्नको कभी भी न खाय २०८ ॥

गवाचान्नमुपघ्रातंघुष्टान्नंचविशेषतः । गणान्नंगणिकान्नंचविदुषांचजुगुप्सितम् २०९ ॥

प० । गवा च अन्नं उपघ्रातं घुष्टान्नं च विशेषतः गणान्नं गणिकान्नं च विदुषां च जुगुप्सितम् ॥

यो० । गवा उपघ्रातं अन्नं – चपुनः विशेषतः घुष्टान्नं -गणान्नं चपुनः गणिकान्नं चपुनः विदुषां जुगुप्सितं अन्नं न भुंजीत ॥

भा० । ता० । गौका सूंघाहुआअन्न और विशेष कर घुष्टान्न अर्थात् है कोई भोजन करने वाला इस वाणीको कहकर जो दियाजाय–शठ ब्राह्मणोंके समूहका अन्न–और वेश्याका अन्न और जिसकी बुद्धिमान् पुरुष निन्दाकरैं वह अन्न कदाचित् भी खाने योग्य नहीं है २०९ ॥

स्तेनगायनयोश्चान्नंतक्ष्णोवार्द्धुषिकस्यच । दीक्षितस्यकदर्यस्यबद्धस्यनिगडस्यच २१०

प० । स्तेनगायनयोः च अन्नं तक्ष्णः वार्द्धुषिकस्य च दीक्षितस्य कदर्यस्य बद्धस्य निगडस्य च ॥

यो० । स्तेनगायनयोः – तक्ष्णः चपुनः वार्द्धुषिकस्य – दीक्षितस्य – कदर्यस्य – बद्धस्य – चपुनः निगडस्य – अन्नं कदाचन न भुंजीत ॥

भा० । चोर–गानेवाला–बढ़ई–व्याजलेनेवाला–यज्ञ में दीक्षित–कृपण–और बद्ध(कैदी) इनके अन्नको भक्षण न करै ॥

ता० । चोर और गानेवाला–बढ़ई वार्द्धुषिक (व्याजलेनेवाला) और यज्ञमें जिसने दीक्षा लीहो–कृपण–और निगड (बेड़ी) से जो बँधाहो इनके अन्नको भी भक्षण न करै गोविंदराज तो यह कहतेहैं कि बद्ध वह जो लोहेसे अन्य (काष्ठ आदि) की बेड़ीसे बँधाहो और निगडित वह होताहै जो लोहेकी बेड़ियोंसे बँधाहो २१० ॥

अभिशस्तस्यषंढस्यपुंश्चल्यादाम्भिकस्यच। शुक्तंपर्युषितंचैवशूद्रस्योच्छिष्टमेवच२११

प० । अभिशस्तस्य षंढस्य पुंश्चल्याः दाम्भिकस्य च शुक्तं पर्युषितं च एवं शूद्रस्य उच्छिष्टं एवं च ॥

यो० । अभिशस्तस्य (महापातकित्वेन जातनिंदस्य) नपुंसकस्य – पुंश्चल्याः (व्यभिचारिण्याः)दाम्भिकस्य अन्नं – शुक्तं चपुनः पर्युषितं – चपुनः शूद्रस्य उच्छिष्टं न भुंजीत ॥

भा० । ता० । महापातक आदि करनेसे जिसकी लोकमें निंदाहुईहो उसका और नपुंसक का और व्यभिचारिणी स्त्रीका चाहे वह वेश्यासे भिन्न भी हो–दाम्भिक (डिंभधारी) का अन्न और शुक्त (जो स्वभावसे मधुरहो परन्तु किसी प्रकार खट्टाहोजाय) वासी और शूद्रका उच्छिष्ट अन्न (जो खायकर बनानेके पात्रमें शेषरहाहो) न खाय और गुरुका उच्छिष्ट तो भोज्यहै इससे उसके खानेमें कुछ दोष नहीं है २११ ॥

चिकित्सकस्यमृगयोःक्रूरस्योच्छिष्टभोजिनः।उग्रान्नंसूतिकान्नंचपर्याचान्तमनिर्दशम्२१२

प०। चिकित्सकस्य मृगयोः क्रूरस्य उच्छिष्टभोजिनः उग्रान्नं सूतिकान्नं च पर्याचान्तं अनिर्दशं ॥

यो० । चिकित्सकस्य – मृगयोः – क्रूरस्य – उच्छिष्टभोजिनः अन्नं – उग्रान्नं – पर्याचान्तं अन्नं चपुनः अनिर्दशं सूतिकान्नं – न भुंजीत ॥

भा० । वैद्य–व्याध–कठोरस्वभाव–निषिद्धके उच्छिष्टकाभोक्ता–दारुण (गोहत्याआदि) कर्मकाकर्ता–दशदिनके भीतरकी सूतिका इनका अन्न और पर्याचान्तके अन्नको भक्षण न करै ॥

ता० । वैद्य–मृगयु (जो मांसबेचनेके हेतु मृगोंको मारै) कठोरस्वभाव–निषिद्धका उच्छिष्ट खानेवाला–उग्र (दारुण कर्मका कर्ता) और दशदिनसे पहिले सूतिका का अन्न अर्थात् दसूठनका–और पर्याचांत अन्न पर्याचांत उसे कहतेहैं जहां एक पंक्तिमें बैठेहुये सब भोजनकरते हों और एक आचमनकरले वह सबके भोजनका अन्न पर्याचांत कहाताहै इतने अन्नोंका भोजन करना वर्जितहै–इस श्लोकमें गोविंदराजने–मंजरीग्रंथमें उग्रराजाको कहाहै और मनुवृत्तिमें क्षत्रियसे शूद्रामें उत्पन्नको कहाहै यह ठीक नहीं है क्योंकि कहीं कुछ और कहीं कुछ और याज्ञवल्क्यने उग्र राजा कहाहै यह एक आश्चर्यरूप गोविंदराजके हृदयकी शोभाहै २१२ ॥

अनर्चितंवृथामांसमवीरायाश्चयोषितः । द्विषदन्नंनगर्यन्नंपतितान्नमवक्षुतम् २१३ ॥

प० । अनर्चितं वृथामांसं अवीरायाः च योषितः द्विषदन्नं नगर्यन्नं पतितान्नं अवक्षुतम् ॥

यो० । अनर्चितं अन्नं – वृथामांसं – चपुनः अवीरायाः योषितः अन्नं – द्विषदन्नं – नगर्यन्नं – पतितान्नं – अवक्षुतं अन्नं – न भुंजीत ॥

भा० । ता० । पूजाके योग्यको जो अनादरसे दियाजाय वह अन्न–और देवताको अर्पणके निमित्त जो न बनायाजाय वह मांस–और पतित और पुत्रहीन स्त्रीका अन्न–और शत्रु–नगर पतित इनकाअन्न–और जिसके ऊपर छींकदियाहो वह अन्न–भक्षण नहीं करना २१३ ॥

---

१ गोविंदराजो मंजर्यामुग्रंराजानमुक्तवान् मनुवृत्तौच शूद्रायां क्षत्रियोत्पन्नमभ्यधात् भेदोक्तेर्याज्ञवल्कीयेनोग्रोराजेतिवावदन् आश्चर्यमिदमेतस्यस्वकीयहृदभूषणम् ॥

पिशुनानृतिनोश्चान्नंक्रतुविक्रयिणस्तथा । शैलूषतुन्नवायान्नंकृतघ्नस्यान्नमेवच २१४ ॥

प० । पिशुनानृतिनोः च अन्नं क्रतुविक्रयिणः तथा शैलूषतुन्नवायान्नं कृतघ्नस्य अन्नं एवं च ॥

यो० । चपुनः पिशुनानृतिनोः अन्नं – तथाक्रतुविक्रयिणः अन्नं – शैलूषतुन्नवायान्नं – चपुनः कृतघ्नस्य अन्नं – न भुंजीत ॥

भा० । ता० । पिशुन (जो परोक्षमेंपरकी निंदाकरै) और मिथ्यावादी– और यज्ञका बेचने वाला अर्थात् जो इसरीतिपर धनग्रहणकरैकि मेरी यज्ञकाफल तुझेहो– और नट– और तुन्नवाय (दरजी) और कृतघ्न (जो पराये उपकारको न माने)–इनके अन्नका भक्षण न करै २१४ ॥

कर्मारस्यनिपादस्यरंगावतारकस्यच । सुवर्णकर्तुर्वेणस्यशस्त्रविक्रयिणस्तथा २१५ ॥

प० । कर्मारस्य निपादस्य रंगावतारकस्य च सुवर्णकर्तुः वेणस्य शस्त्रविक्रयिणः तथा ॥

यो० । कर्मारस्य – निपादस्य – चपुनः रंगावतारकस्य – सुवर्णकर्तुः – वेणस्य – तथा शस्त्रविक्रयिणः – अन्नं न भुंजीत ॥

भा० । ता० । लुहार–निपाद–रंगावतारक–(जो नट और गानेवालेस भिन्न नाटक की आजीविकाकरैं) सुनार–बांसके बींधनेसे जो जीविकाकरै– और लोहेको जो बेचैं–इनके अन्नको भी भोजन न करै २१५ ॥

श्ववतांशौण्डिकानांचचैलनिर्णेजकस्यच । रंजकस्यनृशंसस्ययस्यचोपपतिर्गृहे २१६ ॥

प० । श्ववतां शौण्डिकानां च चैलनिर्णेजकस्य च रंजकस्य नृशंसस्य यस्य च उपपतिः गृहे ॥

यो० । श्ववतां – चपुनः शौण्डिकानां चपुनः चैलनिर्णेजकस्य – रंजकस्य – नृशंसस्य – अन्नं – चपुनः यस्य गृहे उपपतिः (जारः) अस्ति तस्य अन्नं न भुंजीत ॥

भा० । ता० । जो मृगयाके लिये कुत्तोंको पाले–और मदिराके बेचनेवाले–और धोबी–और रंजक (रंगरेज) और निर्दयी–और जिसके घरमें जार पुरुष बसताहो–इनके अन्नका भोजन न करै २१६ ॥

मृष्यंतियेचोपपतिंस्त्रीजितानांचसर्वशः । अनिर्दशंचप्रेतान्नमतुष्टिकरमेवच २१७ ॥

प० । मृष्यंति ये च उपपतिं स्त्रीजितानां च सर्वशः अनिर्दशं च प्रेतान्नं अतुष्टिकरं एवं च ॥

यो० । ये पुरुषाःउपपतिं (जारं) मृष्यंति (सहंते) तेषां – चपुनः सर्वशः स्त्रीजितानां – अन्नं – चपुनः अनिर्दशं प्रेतान्नं – चपुनः अतुष्टिकरं अन्नं – न भुंजीत ॥

भा० । ता० । जो मनुष्य घरमें रहतेहुये अपनी स्त्रीके जारको सहतेहैं और जो सब कामों में स्त्रीके वशीभूतहैं–उनका अन्न–और दशदिनके भीतर प्रेतका अन्न–और जिस अन्नसे मनकी प्रसन्नता न हो वह अन्न–भोजन न करना २१७ ॥

राजान्नंतेजआदत्तेशूद्रान्नंब्रह्मवर्चसम् । आयुःसुवर्णकारान्नंयशश्चर्मावकर्तिनः २१८ ॥

प० । राजान्नं तेजः आदत्ते शूद्रान्नं ब्रह्मवर्चसं आयुः सुवर्णकारान्नं यशः चर्मावकर्तिनः ॥

यो० । राजान्नं तेजः – शूद्रान्नं ब्रह्मवर्चसं – सुवर्णकारान्नं आयुः – चर्मावकर्तिनःअन्नंयशः – आदत्ते (नाशयति) ॥

भा० । ता० । राजाका अन्न तेजको–और शूद्रका अन्न वेदके अध्ययन आदिसे पैदाहुये तेज

को—और सुनारका अन्न अवस्थाको—और चमारका अन्न यशको—नष्टकरता है—अर्थात् इन दोषोंसे इनके अन्नको भक्षण न करै २१८ ॥

कारुकान्नंप्रजांहन्तिबलंनिर्णेजकस्यच । गणान्नंगणिकान्नंचलोकेभ्यःपरिकृन्तति २१९

प० । कारुकान्नं प्रजां हंति बलं निर्णेजकस्य च गणान्नं गणिकान्नं च लोकेभ्यः परिकृन्तति ॥

यो० । कारुकान्नं प्रजां — निर्णेजकस्य अन्नं बलं — हंति — गणान्नं चपुनः गणिकान्नं लोकेभ्यः परिकृन्तति ॥

भा० । ता० । कारुक (कारीगर रसोइया आदि) प्रजाको—धोबीका अन्न बलको—गण (अनेक मनुष्य) और वेश्याका अन्न लोकों (स्वर्ग आदि) से नष्टकरता है २१६ ॥

पूयंचिकित्सकस्यान्नंपुंश्चल्यास्त्वन्नमिन्द्रियम् ।
विष्टावार्द्धुषिकस्यान्नंशस्त्रविक्रयिणोमलम् २२० ॥

प० । पूयं चिकित्सकस्य अन्नं पुंश्चल्याः तु अन्नं इन्द्रियं विष्टा वार्द्धुषिकस्य अन्नं शस्त्रविक्रयिणः मलम् ॥

यो० । चिकित्सकस्य अन्नं पूयं — पुंश्चल्याः अन्नं इन्द्रियं (वीर्यं) वार्द्धुषिकस्य अन्नं विष्टा — शस्त्रविक्रयिणः अन्न मलं भवति ॥

भा० । ता० । वैद्यका अन्न पूय (राध) के—और व्यभिचारिणीका अन्न वीर्यके—व्याजलेने वालेका अन्न विष्टाके—और लोहेके वेचनेवालेका अन्न मल (कफ आदि) के—तुल्यहोताहै २२० ॥

यएतेऽन्येत्वभोज्यान्नाःक्रमशःपरिकीर्तिताःतेषांत्वगस्थिरोमाणिवदन्त्यन्नंमनीषिणः२२१

प० । ये एते अन्ये तु अभोज्यान्नाः क्रमशः परिकीर्तिताः तेषां त्वगस्थिरोमाणि वदन्ति अन्नं मनीषिणः ॥

यो० । ये एते क्रमशः अन्ये अभोज्यान्नाः परिकीर्तिताः तेषां अन्नंमनीषिणः त्वगस्थिरोमाणि वदंति ॥

भा० । ता० । जो ये अभोज्यान्न (जिनका भोजन न करना) क्रमसे कहे हैं उनके अन्नको बुद्धिमान् मनुष्य, त्वचा, अस्थि—रूपकहा है—अर्थात् त्वचाआदि के भोजनका जो दोषहै वही दोष उनके अन्नका भी है २२१ ॥

भुक्त्वातोऽन्यतमस्यान्नममत्याक्षपणंत्र्यहम्।मत्याभुक्त्वाचरेत्कृच्छ्रंरेतोविण्मूत्रमेवच २२२

प० । भुक्त्वा अतः अन्यतमस्य अन्नं अमत्या क्षपणं त्र्यहम् मत्या भुक्त्वा चरेत् कृच्छ्रं रेतः विण्मूत्रं एव च ॥

यो० । अतः (अस्माद्धेतोः) अन्यतमस्य अन्नं अमत्या भुक्त्वा त्र्यहं क्षपणं (उपवासः) कर्तव्यं — मत्या (बुद्धिपूर्वं) भुक्त्वा चपुनः रेतः विट् — मूत्रं भुक्त्वा — कृच्छ्रं चरेत् ॥

भा० । इसहेतु—पूर्वोक्तोंमेंसे किसीके अन्नको खाकर और वीर्य—विष्टा—मुत्र इनको विनाजाने खाकर तीनदिन उपवासकरै और जानकर खाय तो कृच्छ्रकरै ॥

ता० । इससे इनपूर्वोक्तोंमें अन्यतम (कोईसे) के अन्नको विनाजानेखाकर तीनदिन उपवास और जानकर जो भक्षणकरै तो कृच्छ्रव्रतकरै इसीप्रकार वीर्य—विष्टा मूत्रके भक्षणकरने में भी जानकर तीनदिन उपवास और जानकर कृच्छ्रकरै—और यह उन्मत्तआदि के सम्बन्धसे जो

दुष्टअन्न उसका प्रायश्चित्तहै और जिसमें केशकीटपड़ेहों अथवा जो अन्न बासी वा घुष्टहो उस का नहींहै क्योंकि अन्यतमस्य यह सम्बन्ध में षष्ठीकही है—और स्नातक के वृतके निमित्त ये एकप्रकरण में पढ़ेहैं—और इसका प्रायश्चित्त ग्यारहमें अध्याय में कहैंगे—यदि पूर्वोक्त सबमें प्रायश्चित्तहोता तो यह कहते कि (भुक्त्वातोन्यतमस्यान्नंदुष्टं) और अन्यतमस्यतुअन्नं—यह न कहते—तिससे जो मेधातिथि ने कहाहै एकप्रकरणहोनेसे शुक्तआदि अन्नके भक्षण में भी यही प्रायश्चित्त है सो ठीकनहीं है और अप्रकरण में जो प्रायश्चित्त कहा है वह लाघव के लिये है क्योंकि प्रकरण में कहते तो मत्तआदि वहांपर भी पढ़नेपड़ते २२२ ॥

नाद्याच्छूद्रस्यपक्वान्नंविद्वानश्राद्धिनोद्विजः।आददीताममेवास्मादवृत्तावेकरात्रिकम् २२३॥

प० । न अद्यात् शूद्रस्य पक्वान्नं विद्वान् अश्राद्धिनः द्विजः आददीत आमं एव अस्मात् अवृत्तौ एकरात्रिकं ॥

यो० । विद्वान्द्विजः अश्राद्धिनः शूद्रस्य पक्वान्नं न अद्यात् किंतु अस्मात् (शूद्रात्) अवृत्तौ एकरात्रिकं आमं एव आददीत (गृह्णीत) ॥

भा० । ता० । विद्वानद्विज (ब्राह्मण) श्राद्ध के अनधिकारी शूद्र के पक्वान्नको भी भक्षण न करे किंतु अन्यका अन्न न मिले तो शूद्रसे एकरात्रि के निर्वाहार्थ आम (कच्चा) ही अन्नको ग्रहण करले २२३ ॥

श्रोत्रियस्यकदर्यस्यवदान्यस्यचवार्द्धुषेः।मीमांसित्वोभयंदेवाःसममन्नमकल्पयन् २२४॥

प० । श्रोत्रियस्य कदर्यस्य वदान्यस्य च वार्द्धुषेः मीमांसित्वा उभयं देवाः समं अन्नं अकल्पयन् ॥

यो० । कदर्यस्य श्रोत्रियस्य अन्नं—चपुनः वार्द्धुषेः वदान्यस्य अन्नं—एतत् उभयं अन्नं देवाःमीमांसित्वा समं अकल्पयन् अकुर्वन् ॥

भा० । ता० । जो वेदपाठीहोकर कृपणहो और जो दाताहोकर व्याजलेनेवालाहो—इनदोनों के अन्नको विचारकर देवताओंने तुल्यकियाहै—क्योंकि दोनों के गुण और दोष तुल्यहैं २२४ ॥

तान्प्रजापतिराहैत्यमाकृध्वंविषमंसमम् । श्रद्धापूतंवदान्यस्यहतमश्रद्धयेतरत् २२५ ॥

प० । तान् प्रजापतिः आह एत्य मा कृध्वं विषमं समम् श्रद्धापूतं वदान्यस्य हतं अश्रद्धया इतरत् ॥

यो० । प्रजापतिः तान् (देवान्) एत्य आह—यूयं—विषमं समं माकृध्वं (मा कुरुत) वदान्यस्य अन्नं श्रद्धापूतं भवति—इतरत् (कृपणस्यान्नं) अश्रद्धया हतम् (दूषितम्) ॥

भा० । ता० । उनदेवताओं के समीप आनकर ब्रह्मा बोले कि विषम अन्नको सम मतकरो किंतु श्रद्धा से दियाहुआ दाताका अन्न पवित्रहोताहै और अश्रद्धासे दियाहुआ कृपण वेदपाठी का अन्न दूषित होताहै—यद्यपि दोनों का अन्न निषिद्ध कहआये हैं तथापि श्रद्धा से दिया दोनों का अन्नशुद्ध है यह जनाने के लिये यह वचन पुनः कहाहै २२५ ॥

श्रद्धयेष्टंचपूर्तंचनित्यंकुर्यादतन्द्रितः । श्रद्धाकृतेह्यक्षयेतेभवतःस्वागतैर्धनैः २२६ ॥

प० । श्रद्धया इष्टं च पूर्तं च नित्यं कुर्यात् अतन्द्रितः श्रद्धाकृते हि अक्षये ते भवतः स्वागतैः धनैः ॥

यो० । अतन्द्रितः सन् इष्टं चपुनः पूर्तं श्रद्धयानित्यं कुर्यात् – हि (यतः) स्वागतैः धनैः श्रद्धाकृते ते अक्षये भवतः ॥

भा० । ता० । आलस्यकोछोड़कर श्रद्धासे इष्ट (यज्ञआदि) और पूर्त (कूप आरामआदि) को नित्यकरे क्योंकि श्रद्धासे न्यायसे संचितधनसेकियेहुये इष्ट और पूर्त अक्षय स्वर्गआदि फल के देनेवाले होतेहैं २२६ ॥

दानधर्मंनिषेवेतनित्यमैष्टिकपौर्तिकम् । परितुष्टेनभावेनपात्रमासाद्यशक्तितः २२७ ॥

प० । दानधर्मं निषेवेत नित्यं ऐष्टिकपौर्तिकं परितुष्टेन भावेन पात्रं आसाद्य शक्तितः ॥

यो० । ऐष्टिकपौर्तिकं दानधर्मं पात्रं – आसाद्य शक्तितः परितुष्टेन भावेन नित्यं निषेवेत ॥

भा० । ता० । दानदेनेयोग्य सुपात्रब्राह्मणको प्राप्तहोकर प्रसन्न अन्तःकरणसे इष्ट और पूर्त सम्बन्धी दानधर्म को नित्यकरे अर्थात् यज्ञ और पूर्तमें सुपात्रको प्रसन्नहोकर दानदे २२७ ॥

यत्किंचिदपिदातव्यंयाचितेनानसूयया । उत्पत्स्यतेहितत्पात्रंयत्तारयतिसर्वतः २२८ ॥

प० । यत् किंचित् अपि दातव्यं याचितेन अनसूयया उत्पत्स्यते हि तत् पात्रं यत् तारयति सर्वतः ॥

यो० । याचितेन पुरुषेण अनसूयया यत् किंचित् अपि दातव्यं – यत् (यतः) सर्वदादातुः) तत्पात्रं उत्पत्स्यते यः सर्वतः नरकात् तारयति – (मोचयति) ॥

भा० । ता० । मांगने से मनुष्य ईर्षा को त्यागकर यत्किंचित् भीदे क्योंकि सदैव देनेवाले को कोई न कोई ऐसापात्र मिलजाताहै जो सब नरकों से रक्षाकरलेता है २२८ ॥

वारिदस्तृप्तिमाप्नोतिसुखमक्षय्यमन्नदः । तिलप्रदःप्रजामिष्टांदीपदश्चक्षुरुत्तमम् २२९

प० । वारिदः तृप्तिं आप्नोति सुखं अक्षय्यं अन्नदः तिलप्रदः प्रजां इष्टां दीपदः चक्षुः उत्तमं ॥

यो० । वारिदः तृप्तिं – अन्नदः अक्षय्यं सुखं – तिलप्रदः इष्टांप्रजां – दीपदः उत्तमं चक्षुः – आप्नोति ॥

भा० । ता० । जलका दाता तृप्तिको—अन्नका दाता अक्षय सुखको—तिलका दाता वांछित प्रजाको—और दीपकका दाता उत्तम नेत्रों को प्राप्तहोताहै २२९ ॥

भूमिदोभूमिमाप्नोतिदीर्घमायुर्हिरण्यदः ।
गृहदोऽग्र्याणिवेश्मानिरूप्यदोरूपमुत्तमम् २३० ॥

प० । भूमिदः भूमिं आप्नोति दीर्घं आयुः हिरण्यदः गृहदः अग्र्याणि वेश्मानि रूप्यदः रूपं उत्तमं ॥

यो० । भूमिदः भूमिं – हिरण्यदः दीर्घं आयुः – गृहदः अग्र्याणि वेश्मानि – रूप्यदः उत्तमं रूपं आप्नोति ॥

भा० । ता० । भूमिकादाता भूमिको—और सुवर्ण का दाता अधिक अवस्थाको—घरकादाता उत्तम २ घरोंको—और चांदीका दाता उत्तम रूपको प्राप्तहोता है २३० ॥

वासोदश्चन्द्रसालोक्यमश्विसालोक्यमश्वदः ।
अनडुहःश्रियंपुष्टांगोदोब्रध्नस्यविष्टपम् २३१ ॥

प० । वासोदः चन्द्रसालोक्यं अश्विसालोक्यं अश्वदः अनडुहः श्रियं पुष्टां गोदः ब्रध्नस्य विष्टपं ॥

यो० । वासोदः चन्द्रसालोक्यं—अश्वदः अश्विसालोक्यं—अनडुहः पुष्टां श्रियं—गोदः ब्रध्नस्य विष्टपं—आप्नोति ॥

भा० । ता० । वस्त्रों का दाता चन्द्रसमानलोक को प्राप्तहोता है अर्थात् चन्द्रमा के समान विभूति को पाकर चन्द्रलोकमें वसताहै और इसीप्रकार घोड़ेकादाता अश्विनीकुमारोंके लोक में वसता है और बैलका दाता अत्यन्त लक्ष्मी को और गौका दाता सूर्य लोकको प्राप्त होता है २३१ ॥

यानशय्याप्रदोभार्यामैश्वर्यमभयप्रदः ।
धान्यदःशाश्वतंसौख्यंब्रह्मदोब्रह्मसार्ष्टिताम् २३२ ॥

प० । यानशय्याप्रदः भार्यां ऐश्वर्यं अभयप्रदः धान्यदः शाश्वतं सौख्यं ब्रह्मदः ब्रह्मसार्ष्टिताम् ॥

यो० । यानशय्याप्रदः भार्यां—अभयप्रदः ऐश्वर्यं—धान्यदः शाश्वतं सौख्यं—ब्रह्मदः ब्रह्मसार्ष्टिताम्—आप्नोति ॥

भा० । ता० । यान (सवारी) और शय्या का दाता भार्या को—और अभय का दाता ऐश्वर्य को—और अन्नका दाता निरन्तर सुखको—और ब्रह्म (वेद) का दाता ब्रह्मा के समान ऐश्वर्य को प्राप्तहोता है २३२ ॥

सर्वेषामेवदानानांब्रह्मदानंविशिष्यते । वार्यन्नगोमहीवासस्तिलकांचनसर्पिषाम् २३३ ॥

प० । सर्वेषां एव दानानां ब्रह्मदानं विशिष्यते वार्यन्नगोमहीवासस्तिलकांचनसर्पिषाम् ॥

यो० । वार्यन्नगोमहीवासस्तिलकांचनसर्पिषां सर्वेषां एव दानानां मध्ये ब्रह्मदानं विशिष्यते—सकृष्टफलदं भवति ॥

भा० । ता० । जल—अन्न—गौ—भूमि—वस्त्र—तिल—सुवर्ण—घी—इन सम्पूर्ण दानों से वेद का दान अधिक फलका देनेवालाहोता है २३३ ॥

येनयेनतुभावेनयद्यद्दानंप्रयच्छति । तत्तत्तेनैवभावेनप्राप्नोतिप्रतिपूजितः २३४ ॥

प० । येन येन तु भावेन यत् यत् दानं प्रयच्छति तत् तत् तेन एव भावेन प्राप्नोति प्रतिपूजितः ॥

यो० । पुरुषः येन येन भावेन यत् यत् दानं प्रयच्छति तत् तत् तेन एव भावेन प्रतिपूजितः प्राप्नोति ॥

भा० । ता० । जिस२ अभिप्राय से अर्थात् जिस २ फलकी आकांक्षासे कि स्वर्ग मुझे मिले

इत्यादि अभिप्राय से मनुष्य जिस २ दानको देताहै उसी २ अभिप्राय से फलके द्वारा पूजाको प्राप्तहुआ मनुष्य उसी २ फलको प्राप्तहोता है अर्थात् प्रतिष्ठाके देनेवाले उसी २ फल को प्राप्त होता है २३४ ॥

योऽर्चितंप्रतिगृह्णातिददात्यर्चितमेवच । तावुभौगच्छतःस्वर्गंनरकंतुविपर्यये २३५ ॥

प० । यः अर्चितं प्रतिगृह्णाति ददाति अर्चितं एव च तौ उभौ गच्छतः स्वर्गं नरकं तु विपर्यये ॥

यो० । यः अर्चितं प्रतिगृह्णाति – चपुनः अर्चितं एव ददाति – तौ उभौ स्वर्गं गच्छतः – तुपुनः विपर्यये नरकं गच्छतः ॥

भा० । ता० । जो देनेवाला पुरुष सत्कारपूर्वक देता है और सत्कारपूर्वक दियेहुये द्रव्य को जो लेताहै वे दोनों स्वर्ग में जातेहैं और विपर्यय में अर्थात् निरादरसे देने और लेने वाले नरक में जातेहैं २३५ ॥

नविस्मयेततपसावदेदिष्ट्वाचनानृतम् । नार्तोऽप्यपवदेद्विप्रान्नदत्वापरिकीर्तयेत् २३६ ॥

प० । न विस्मयेत तपसा वदेत् इष्ट्वा च न अनृतं न आर्तः अपि अपवदेत् विप्रान् न दत्वा परिकीर्तयेत् ॥

यो० । तपसा न विस्मयेत – चपुनः इष्ट्वा अनृतं न वदेत् – आर्तः अपि विप्रान न अपवदेत् – दत्वा न परिकीर्तयेत ॥

भा० । ता० । चान्द्रायण आदि तपकोकरके विस्मय न करै कि यह तप मैं कैसे किया और यज्ञको करके झूठ न बोले–और ब्राह्मणों से पीडितहुआ भी मनुष्य ब्राह्मणोंकी निंदा न करै और गौ आदिको देकर किसीको न कहे २३६ ॥

यज्ञोऽनृतेनक्षरतितपःक्षरतिविस्मयात् । आयुर्विप्रापवादेनदानंचपरिकीर्तनात् २३७ ॥

प० । यज्ञः अनृतेन क्षरति तपः क्षरति विस्मयात् आयुः विप्रापवादेन दानं च परिकीर्तनात् ॥

यो० । अनृतेन यज्ञः – विस्मयात तपः – विप्रापवादेन आयुः चपुनः दानं परिकीर्तनात् क्षरति (निष्फलंभवति) ॥

भा० । ता० । झूठसे यज्ञनष्ट होताहै अर्थात् सत्यसे सफलहोता है और विस्मय (गर्व) से तप ब्राह्मणों की निंदा से अवस्था और जहांतहां कीर्तन करनेसे दान नष्टहोता है २३७ ॥

धर्मंशनैःसंचिनुयाद्वल्मीकमिवपुत्तिकाः । परलोकसहायार्थंसर्वभूतान्यपीडयन् २३८ ॥

प० । धर्मं शनैः संचिनुयात् वल्मीकं इव पुत्तिकाः परलोकसहायार्थं सर्वभूतानि अपीडयन् ॥

यो० । सर्वभूतानि अपीडयन सन् पुत्तिकाः वल्मीकं इव परलोकसहायार्थं सदाधर्मंशनैः संचिनुयात् ॥

भा० । ता० । सबभूतोंको पीडित नहीं करताहुआ मनुष्य परलोकमें सहायता के लिये धर्म का संचय इसप्रकार शनैः शनैः करै जैसे पुत्तिका (दीम) वामीको संचय करतीहै अर्थात् अल्प अल्प भी धर्म बहुत फलदायी होजाता है २३८ ॥

नामुत्रहिसहायार्थंपितामाताचतिष्ठतः । नपुत्रदारानज्ञातिर्धर्मस्तिष्ठतिकेवलः २३९ ॥

प० । न अमुत्र हि सहायार्थं पिता माता च तिष्ठतः न पुत्रदाराः न ज्ञातिः धर्मः तिष्ठति केवलः ॥

यो० । हि (यतः) अमुत्रसहायार्थं पिता चपुनः माता न तिष्ठतः पुत्रदाराः न तिष्ठंति — ज्ञातिः न तिष्ठति किन्तु केवलः धर्मः तिष्ठति ॥

भा० । ता० । परलोकमें सहायता के लिये पिता—माता—पुत्र—दारा (स्त्री) , और जाति ये नहीं टिकते किंतु केवल धर्मही टिकता है—इससे पुत्रआदि से भी अधिक उपकारी धर्मको कभी न छोड़े २३९ ॥

एकःप्रजायतेजन्तुरेकएवप्रलीयते । एकोऽनुभुंक्तेसुकृतमेकएवचदुष्कृतम् २४० ॥

प० । एकः प्रजायते जंतुः एकः एव प्रलीयते एकः अनुभुंक्ते सुकृतं एकः एव च दुष्कृतम् ॥

यो० । जंतुः एकः एव प्रजायते — एकःएव प्रलीयते — एकः सुकृतं अनुभुंक्ते चपुनः एकःएव दुष्कृतं अनुभुंक्ते ॥

भा० । ता० । प्राणी एकही पैदाहोता है बान्धवों सहित नहीं और एकही प्राणी मरता है और एकही पुण्य और पापके फलको भोगताहै माताआदि के सहित नहीं तिससे माताआदि की अपेक्षा भी धर्म त्यागने योग्य नहीं है २४० ॥

मृतंशरीरमुत्सृज्यकाष्ठलोष्ठसमंक्षितौ । विमुखाबान्धवायांतिधर्मस्तमनुगच्छति २४१ ॥

प० । मृतं शरीरं उत्सृज्य काष्ठलोष्ठसमं क्षितौ विमुखाः बान्धवाः यांति धर्मः तं अनुगच्छति ॥

यो० । काष्ठलोष्ठसमं मृतं शरीरं क्षितौ उत्सृज्य बान्धवाः विमुखाः यांति धर्मः तं अनुगच्छति ॥

भा० । ता० । काठ और लोष्ठके समान (अचेतन) मरेहुये शरीरको भूमिपर त्यागकर—बान्धव विमुख होजातेहैं अर्थात् मृतक जीवके पीछे नहींजाते और धर्मही जीवके संग जाता है—इससे संगजानेवाले धर्मको अवश्य संचितकरै २४१ ॥

तस्माद्धर्मंसहायार्थंनित्यंसंचिनुयाच्छनैः । धर्मेणहिसहायेनतमस्तरतिदुस्तरम् २४२॥

प० । तस्मात् धर्मं सहायार्थं नित्यं संचिनुयात् शनैः धर्मेण हि सहायेन तमः तरति दुस्तरम् ॥

यो० । हि (यतः) सहायेन धर्मेण दुस्तरं तमः तरति तस्मात् सहायार्थं नित्यं शनैः संचिनुयात् ॥

भा० । ता० । जिससे धर्मरूप सहायके बलसे दुस्तर तम (नरकादि) को तरता है तिससे सहायताके लिये प्रतिदिन शनैः शनैः धर्मका संचयकरै २४२ ॥

धर्मप्रधानंपुरुषंतपसाहतकिल्बिषम् । परलोकंनयत्याशुभास्वंतंखशरीरिणम् २४३ ॥

प० । धर्मप्रधानं पुरुषं तपसा हतकिल्बिषम् परलोकं नयति आशु भास्वंतं खशरीरिणम् ॥

यो० । तपसाहतकिल्बिषं धर्मप्रधानं — भास्वंतं खशरीरिणं पुरुषं (धर्मः) आशु परलोकं नयति ॥

भा० । धर्ममें तत्पर तपसा नष्टहुआ है पाप जिसका—और देदीप्यमान—और ब्रह्मरूप पुरुषको धर्महीं परलोक (स्वर्गादि) में लेजाता है ॥

ता० । धर्ममें तत्पर और दैवसे पाप के होनेपर भी प्राजापत्य आदि तपसे हताहै पाप जिसका—और प्रकाशमान और ब्रह्महै शरीर जिसका ऐसे पुरुषको धर्महीं परलोकमें लेजाता है अर्थात् धार्मिक पुरुष ब्रह्मरूप होकर परलोकमें जाताहै क्योंकि खंब्रह्म—इत्यादि उपनिषदमें ख शब्द से ब्रह्महीलिया है—यद्यपि लिंगशरीर संयुक्त जीवही परलोकमें जाता है तथापि जीवभी ब्रह्मका अंशहोनेसे धर्मके प्रतापसे ब्रह्मरूप होजाता है इससे धर्मको अवश्यकरै—क्योंकि भली प्रकार अध्ययनाकिये वेद और अनेकशास्त्र वहां संगनहीं जाते जहां इस मनुष्यका कियाहुआ एकधर्म जाताहै २४३ ॥

उत्तमैरुत्तमैर्नित्यंसम्बन्धानाचरेत्सह । निनीषुःकुलमुत्कर्षमधमानधमांस्त्यजेत् २४४॥

प० । उत्तमैः उत्तमैः नित्यं सम्बन्धान् आचरेत् सह निनीषुः कुलं उत्कर्षं अधमान् अधमान् त्यजेत् ॥

यो० । कुलं उत्कर्षं निनीषुः पुरुषः नित्यं उत्तमैः उत्तमैः सहसम्बन्धान् आचरेत् अधमान् अधमान् (सम्बन्धे) त्यजेत् ॥

भा० । ता० । अपने कुलकी बडाई चाहताहुआ मनुष्य उत्तम २ मनुष्योंके संगही प्रतिदिन सम्बन्धों को करै और अधम (नीच) अधमों के संग सम्बन्धों को त्यागदे अर्थात् विद्या आचार आदि से कुलकी वृद्धि चाहताहुआ मनुष्य सत्संगही करै और कुसंगको सर्वथा त्यागदे—यद्यपि उत्तमों के संग की विधिसेही अधमों का त्याग सिद्ध होजाता तथापि उत्तमों के न मिलने पर अपने समानोंका संगकरै इसकेलिये अधमोंका त्याग कहाहै २४४ ॥

उत्तमानुत्तमान्गच्छन्हीनान्हीनांश्चवर्जयन्।ब्राह्मणःश्रेष्ठतामेतिप्रत्यवायेनशूद्रताम् २४५

प० । उत्तमान् उत्तमान् गच्छन् हीनान् हीनान् च वर्जयन् ब्राह्मणः श्रेष्ठतां एति प्रत्यवायेन शूद्रताम् ॥

यो० । उत्तमान् उत्तमान् गच्छन् -चपुनः हीनान् हीनान् वर्जयन् सन् ब्राह्मणः श्रेष्ठतां एति--प्रत्यवायेन (विपरीताचरणेन) शूद्रतां--एति ॥

भा० । ता० । उत्तम २ पुरुषों के संग सम्बन्ध करताहुआ और अधम अधमोंको त्यागता हुआ ब्राह्मण श्रेष्ठताको प्राप्तहोताहै और विपरीत आचरण से शूद्रताको प्राप्तहोता है अर्थात निन्दित आचरण से शूद्रहोताहै २४५ ॥

दृढकारीमृदुर्दान्तःक्रूराचारैरसंवसन् । अहिंस्रोदमदानाभ्यांजयेत्स्वर्गंतथाव्रतः२४६॥

प० । दृढकारी मृदुः दान्तः क्रूराचारैः असंवसन् अहिंस्रः दमदानाभ्यां जयेत् स्वर्गं तथाव्रतः ॥

यो० । दृढकारी--मृदुः--दान्तः क्रूराचारैः असंवसन्--अहिंस्रः तथाव्रतः- ब्राह्मणः -दमदानाभ्यां स्वर्गं जयेत् ॥

भा० । ता० । दृढकारी—मृदु (कोमलस्वभाव) दांत अर्थात् शीत आतप आदि द्वंद्वोंको सहने

(१) नहिवेदास्त्वधीतास्तु शास्त्राणिविविधानिच तत्रगच्छंतियत्रास्यधर्मस्त्वेकोनुगच्छति ॥

वाला—और क्रूर आचरण करनेवाले पुरुषों के संगका त्यागी—परकी हिंसारहित—और तथावृत अर्थात् नियम संयम और दानसे ब्राह्मण स्वर्गको प्राप्तहोताहै २४६ ॥

एधोदकंमूलफलमन्नमभ्युदितंचयत् । सर्वतःप्रतिगृह्णीयान्मध्वथाभयदक्षिणाम् २४७॥

प०। एधोदकं मूलफलं अन्नं अभ्युदितं च यत् सर्वतः प्रतिगृह्णीयात् मधु अथ अभयदक्षिणाम् ॥

यो० । एधोदकं — मूलफलं — चपुनः यत् अभ्युदितं (अयाचितं) अन्नं — मधु — अथ अभय दक्षिणाम् सर्वतः (सर्वस्मात्)प्रतिगृह्णीयात् ॥

भा० । ता० । काष्ठ— जल— मूल— फल—और अयाचित अन्न—मधु—और अभयदान— इनको सबसे ग्रहणकरे परन्तु इस याज्ञवल्क्य के वचन से कुलटा नपुंसक — पतितों को वर्जदे २४७॥

आहृताभ्युद्यतांभिक्षांपुरस्तादप्रचोदिताम्।मेनेप्रजापतिर्ग्राह्यामपिदुष्कृतकर्मणः २४८

प० । आहृताभ्युद्यतां भिक्षां पुरस्तात् अप्रचोदिताम् मेने प्रजापतिः ग्राह्यां अपि दुष्कृत-कर्मणः ॥

यो० । आहृताभ्युद्यतां -पुरस्तात् अप्रचोदिताम् —दुष्कृतकर्मणः अपि भिक्षां प्रजापतिः ग्राह्यांमेने (अमन्यत) ॥

भा०। ता० । जो भिक्षा भिक्षुकके समीप स्वतःही आईहो और आगेरक्खीहुईहो और जो अप्रचोदित अर्थात् लेनेवालेने स्वयं वा अन्यकेद्वारा मांगी न हो और न दाताने जिस भिक्षाकी यह प्रतिज्ञा कीहो कि तुझैयहदूंगा—ऐसीभिक्षा चाहे पापकर्माकीभी क्यों न हो तोभी ब्रह्माने ग्रहण करने योग्य मानीहै—परन्तु वहसुवर्णआदि द्रव्यरूपहो और पतितकी न हो यदि सिद्धान्न रूप होयतो पापी की पूर्वोक्त भिक्षा अग्राह्यहीहै २४८ ॥

नाश्नंतिपितरस्तस्यदशवर्षाणिपञ्च च । नचहव्यंवहत्यग्निर्यस्तामभ्यवमन्यते २४९ ॥

प०। न अश्नंति पितरः तस्य दश वर्षाणि पंच च न च हव्यं वहति अग्निः यः तां अभ्यवमन्यते॥

यो० । यः तां (भिक्षां) न अभ्यवमन्यते (नस्वीकरोति) पितरः तस्य दशपंचवर्षाणि कव्यं न अश्नंति -चपुनः अग्निः हव्यं न वहति — देवान् न प्रापयति ॥

भा० । ता० । जो ब्राह्मण उसपूर्वोक्त भिक्षाको स्वीकार नहींकरता उसकेघरमें पन्द्रहवर्षतक पितरकव्यको नहींखाते —और अग्निभी हव्यको देवताओंके समीप नहींपहुंचाती—इससे उक्त भिक्षाको नाहीं न करै २४९ ॥

शय्यांगृहान्कुशान्गन्धानपःपुष्पंमणीन्दधि ।
धानामत्स्यान्पयोमांसंशाकंचैवननिर्नुदेत् २५० ॥

प० । शय्यां गृहान् कुशान् गंधान् अपः पुष्पं मणीन् दधि धानाः मत्स्यान् पयः मांसं शाकं च एव न निर्नुदेत् ॥

यो० । शय्यां — गृहान् — कुशान — गंधान् — अपः पुष्पं — मणीन् — दधि — धानाः — मत्स्यान् — पयः — मांसं — चपुनः शाकं — न निर्नुदेत् (नमसाचक्षीत) ॥

---

१ अन्यत्रकुलटापंढपतितेभ्यस्तथाद्विषः ॥

भा० । ता० । शय्या–घर–कुशा–गंध (कपूरआदि) जल–पुष्प–मणि–दधि–धान (भुने चावल) मत्स्य–दूध–मांस–और शाक–अनायास से प्राप्तहुये इनका प्रत्याख्यान (नाहीं) न करे–पहिले लाने के उपायके आग्रहसे गौआदि का अप्रत्याख्यान (ग्रहण) कहा और शय्या आदि तो अयाचित (विनामांगे) और अकस्मात् प्राप्तहों अथवा दाताने अपनेघरमें रखदिये हों तो इनको स्वीकारकरले २५० ॥

गुरून्भृत्यांश्चोज्जिहीर्षन्नर्चिष्यन्देवतातिथीन् ।सर्वतःप्रतिगृह्णीयान्नतुतृप्येत्स्वयंततः॥२५१

प० । गुरून् भृत्यान् च उज्जिहीर्षन् अर्चिष्यन् देवतातिथीन सर्वतः प्रतिगृह्णीयात् न तु तृप्येत् स्वयं ततः ॥

यो० । गुरून चपुनः भृत्यान उज्जिहीर्षन – देवतातिथीन अर्चिष्यन् सन पुरुषः सर्वतः प्रतिगृहणीयात् ततः (भिक्षाधनेन) स्वयं तु न तृप्येत् (स्वभोगे तं धनं न युंजीत) ॥

भा० । ता० । गुरु (माता पिता आदि) और भृत्यभार्यादि जो क्षुधाआदि से दुःखितहैं उनके उद्धार को चाहताहुआ और देवता अतिथियों को पूजताहुआ ब्राह्मण, पतित आदिको छोड़कर सबसे प्रतिग्रहले–और उस धनसे आप न वर्त्ते २५१ ॥

गुरुषुत्वभ्यतीतेषुविनावातैर्गृहेवसन् ।आत्मनोवृत्तिमन्विच्छन्गृह्णीयात्साधुतःसदा॥२५२॥

प० । गुरुषु तु अभ्यतीतेषु विना वा तैः गृहे वसन् आत्मनः वृत्तिं अन्विच्छन् गृह्णीयात् साधुतः सदा ॥

यो० । गुरुषु अभ्यतीतेषु (मृतेषु) सत्सु – वा तैः (गुरुभिः) विना गृहे वसन – आत्मनः वृत्तिं अन्विच्छन सन् ब्राह्मणः सदा साधुतः प्रति गृहणीयात् ॥

भा० । ता० । माता पिताके मरेपीछे अथवा उनके विना अन्य गृहमें (जुदा) वसता हुआ और अपना निर्वाह चाहताहुआ ब्राह्मण सदैव–साधुओंसे प्रतिग्रह ले ले २५२ ॥

आर्द्धिकःकुलमित्रंचगोपालोदासनापितौ । एतेशूद्रेषुभोज्यान्नायश्चात्मानंनिवेदयेत्॥२५३

प० । आर्द्धिकः कुलमित्रं च गोपालः दासनापितौ एते शूद्रेषु भोज्यान्नाः यः च आत्मानं निवेदयेत् ॥

यो० । आर्द्धिकः चपुनः कुलमित्रं – गोपालः – दासनापितौ चपुनः यः आत्मानं निवेदयेत् एते शूद्रेषु भोज्यान्नाः – भवन्तीतिशेषः ॥

भा० । ता० । किसान–कुलकामित्र–गोपाल–दास–नापित–और जो अपने आत्मा को इस प्रकार निवेदन करे कि मैं दुर्गतिहूं आपकी सेवा करूंगा और आपके समीप रहूंगा–इतने शूद्र भोज्यान्नहैं अर्थात् इनके अन्नखाने में दोषनहीं है –और किसान आदि शूद्र जिसकी कृषि आदि करतेहों उसकोही इनकाअन्न भोज्यहै इतरको नहीं २५३ ॥

यादृशोऽस्यभवेदात्मायादृशंचचिकीर्षितम् । यथाचोपचरेदेनंतथात्मानंनिवेदयेत् २५४

प० । यादृशः अस्य भवेत् आत्मा यादृशं च चिकीर्षितं यथा च उपचरेत् एनं तथा आत्मानं निवेदयेत् ॥

यो० । अस्य (शूद्रस्य) यादृशः आत्मा चपुनः यादृशं चिकीर्षितं भवेत् चपुनः यथा एनं (ब्राह्मणं) उपचरेत् तथा आत्मानं निवेदयेत् ॥

भा० । ता० । इस शूद्रकाकुल शील आदिसे जैसी अवस्थाहो और जो कियाचाहताहो और जिसप्रकार इसब्राह्मण की सेवाको करसकेगा इनसब बातोंसे अपने आत्माको निवेदन करे अर्थात् प्रथम ये सब बातें कहदे २५४ ॥

योऽन्यथासन्तमात्मानमन्यथासत्सुभाषते।सपापकृत्तमोलोकेस्तेनआत्मापहारकः२५५

प० । यः अन्यथा सन्तं आत्मानं अन्यथा सत्सु भाषते सः पापकृत्तमः लोके स्तेनः आत्मापहारकः ॥

यो० । यः अन्यथा सन्तं आत्मानं सत्सु अन्यथा भाषते स्तेनः आत्मापहारकः सः लोके पापकृत्तमः (भवति) ॥

भा० । ता० । जो अन्यथा विद्यमान अपने आत्माको सत्पुरुषों में अन्यथा कहता है अर्थात् हो कुछ और बतावे कुछ—अपनी आत्मा के हरनेवाला वह चोर जगत् में अत्यन्त पापी होता है २५५ ॥

वाच्यर्थानियताःसर्वेवाङ्मूलावाग्विनिःसृताः।तांस्तुयःस्तेनयेद्वाचंससर्वस्तेयकृन्नरः२५६

प० । वाचि अर्थाः नियताः सर्वे वाङ्मूलाः वाग्विनिःसृताः तां तु यः स्तेनयेत् वाचं सः सर्वस्तेयकृत् नरः ॥

यो० । सर्वे अर्थाः वाचि नियताः वाङ्मूलाः वाग्विनिःसृताः (भवन्ति) तां वाचं यः नरः स्तेनयेत् सः नरः सर्वस्तेयकृत् (ज्ञेयः) ॥

भा० । ता० । सम्पूर्ण अर्थ (पदार्थ) जिस वाणीमें नियत हैं और जिस वाणीही से उनका मूल (जड़) है और जिस वाणीसेही निकसे हैं—उसवाणी की जो चोरी करताहै वह मनुष्य सब पदार्थों की चोरीका करनेवाला होताहै और ब्रह्माकी सृष्टि भी वेद मूल कहीहै २५६ ॥

महर्षिपितृदेवानांगत्वानृण्यंयथाविधि । पुत्रेसर्वंसमासज्यवसेन्माध्यस्थमाश्रितः २५७

प० । महर्षिपितृदेवानां गत्वा आनृण्यं यथाविधि पुत्रे सर्वं समासज्य वसेत् माध्यस्थं आश्रितः ॥

यो० । महर्षिपितृदेवानां आनृण्यं यथाविधि गत्वा — पुत्रे सर्वं (कुटुम्बचिन्ताभारं) आसज्य माध्यस्थं आश्रितः सन् वसेत् गृहे इति शेषः ॥

भा० । ता० । वेद पाठ से महर्षियों के और पुत्रकी उत्पत्ति से पितरों के—और यज्ञकरने से देवताओं के ऋण से दूरहोकर और कुटुम्ब की चिन्ताके भारको पुत्रके आधीन करके—मध्यस्थ हुआ ब्राह्मण अर्थात् पुत्र स्त्री धन आदिमें ममताको छोड़कर घरमेंही वसै २५७ ॥

एकाकीचिन्तयेन्नित्यंविविक्तेहितमात्मनः ।
एकाकीचिन्तयानोहिपरंश्रेयोऽधिगच्छति २५८ ॥

प० । एकाकी चिन्तयेत् नित्यं विविक्ते हितं आत्मनः एकाकी चिन्तयानः हि परं श्रेयः अधिगच्छति ॥

यो० । हि (यतः) एकाकी चिन्तयानः पुरुषः परं श्रेयः अधिगच्छति — अतः विविक्ते (एकान्ते) आत्मनः हितं नित्यं चिन्तयेत् ॥

भा० । ता० । एकाकी होकर एकान्तमें अपने हितकी अर्थात् ब्रह्मभावकी चिन्ताकरे क्योंकि एकाकी चिन्ता करताहुआ मनुष्य परमश्रेय (मोक्ष) को प्राप्तहोता है २५८ ॥

एषोदितागृहस्थस्यवृत्तिर्विप्रस्यशाश्वती । स्नातकव्रतकल्पश्चसत्त्ववृद्धिकरःशुभः २५९ ॥

प० । एषा उदिता गृहस्थस्य वृत्तिः विप्रस्य शाश्वती स्नातकव्रतकल्पः च सत्त्ववृद्धिकरः शुभः ॥

यो० । गृहस्थस्य विप्रस्य एषा शाश्वती वृत्तिः उदिता — च पुनः सत्त्ववृद्धिकरः — शुभः स्नातकव्रतकल्पः उक्तः ॥

भा० । ता० । यह गृहस्थी ब्राह्मणकी ऋत आदि नित्यकी वृत्ति कही और सत्त्वगुणकी वृद्धि करनेवाला और श्रेष्ठ स्नातक के व्रतका विधान कहा २५९ ॥

अनेनविप्रोवृत्तेनवर्तयन्वेदशास्त्रवित् । व्यपेतकल्मषोनित्यंब्रह्मलोकेमहीयते २६० ॥

इतिमानवेधर्मशास्त्रेभृगुप्रोक्तायांसंहितायांचतुर्थोऽध्यायः ४ ॥

प० । अनेन विप्रः वृत्तेन वर्त्तयन् वेदशास्त्रवित् व्यपेतकल्मषः नित्यं ब्रह्मलोके महीयते ॥

यो० । वेदशास्त्रवित् विप्रः अनेन वृत्तेन नित्यं वर्तयन् सन् व्यपेतकल्मषो भूत्वा ब्रह्मलोके महीयते — (ब्रह्मलीनो) भवति ॥

भा० । ता० । इस शास्त्रोक्त आचरण को नित्य करताहुआ वेदका ज्ञाता ब्राह्मण पापों से रहित होकर ब्रह्मरूप लोक में पूजा को प्राप्तहोता है अर्थात् ब्रह्म में लीन होताहै २६० ॥

इति मन्वर्थभास्करे चतुर्थोऽध्यायः ४ ॥

अथपंचमोऽध्यायः ॥

श्रुत्वैतानृषयोधर्मान्स्नातकस्ययथोदितान् । इदमूचुर्महात्मानमनलप्रभवंभृगुम् १ ॥

प० । श्रुत्वा एतान् ऋषयः धर्मान् स्नातकस्य यथोदितान् इदं ऊचुः महात्मानं अनलप्रभवं भृगुं ॥

यो० । ऋषयः स्नातकस्य यथोदितान् एतान् धर्मान् श्रुत्वा — महात्मानं अनलप्रभवं भृगुं इदं ऊचुः ॥

भा० । क्रमसे कहेहुये स्नातक के इन धर्मोंको सुनकर संपूर्ण ऋषि अग्निके पुत्र और महात्मा भृगुको यह वचन बोले कि ॥

ता० । यथा क्रमसे कहेहुये स्नातकके इन धर्मोंको सुनकर महात्मा और अग्निसे उत्पन्न भृगुको यह वचन बोले—यद्यपि प्रथम अध्यायमें दश प्रजापतियोंमें (भृगुंनारदमेवच) भृगुकी

उत्पत्ति भी मनुसेही कहीहै तथापि कल्पभेदसे अग्निसे भी भृगुकी उत्पत्तिहै क्योंकि इसमें श्रुति में यह लिखाहै कि अग्निका वीर्य जो प्रथम प्रकाशित(भ्रष्ट)हुआ उससे सूर्य—और दूसरे वीर्यके प्रकाशसे भृगु उत्पन्नहुआ—और इस भ्रष्ट तेजसे उत्पन्न होनेसे ही भृगु कहतेहैं १ ॥

एवंयथोक्तंविप्राणांस्वधर्ममनुतिष्ठताम् । कथंमृत्युःप्रभवतिवेदशास्त्रविदांप्रभो २॥

प० । एवं यथोक्तं विप्राणां स्वधर्मं अनुतिष्ठतां कथं मृत्युः प्रभवति वेदशास्त्रविदां प्रभो ॥

यो० । यथोक्तं स्वधर्मं एवं अनुतिष्ठतां—वेदशास्त्रविदां विप्राणां हे प्रभो मृत्युः कथं प्रभवति ॥

भा० । ता० । शास्त्रोक्त अपने धर्मको इसप्रकार करतेहुये और वेद और शास्त्रके जाननेवाले ब्राह्मणों को वेदोक्त १०० वर्षकी अवस्थासे प्रथम हे प्रभो मृत्युके से समर्थ होतीहै अर्थात् १०० वर्षसे पहिले क्यों मरजातेहैं क्योंकि अल्प अवस्थाका कारण अधर्मका तो उनमें अभावहै—यहां हे प्रभो यह संबोधन इस निमित्त दियाहै कि तुम सब संदेहोंके दूरकरने में समर्थहो २ ॥

सतानुवाचधर्मात्मामहर्षीन्मानवोभृगुः । श्रूयतांयेनदोषेणमृत्युर्विप्राञ्जिघांसति ३ ॥

प० । सः तान् उवाच धर्मात्मा महर्षीन् मानवः भृगुः श्रूयतां येन दोषेण मृत्युः विप्रान् जिघांसति ॥

यो० । सः धर्मात्मा मानवः भृगुः तान् महर्षीन् उवाच—येन दोषेण मृत्युः विप्रान् जिघांसति—सः दोषः भवद्भिः श्रूयताम् ॥

भा० । ता० । धर्मात्मा और मनुका पुत्र वह भृगु उनकेप्रति यहबोला कि जिसदोष (पाप) से ब्राह्मणोंको नष्टकरना चाहतीहै उस दोषको तुम सुनो ३ ॥

अनभ्यासेनवेदानामाचारस्यचवर्जनात् । आलस्यादन्नदोषाच्चमृत्युर्विप्राञ्जिघांसति४॥

प० । अनभ्यासेन वेदानां आचारस्य च वर्जनात् आलस्यात् अन्नदोषात् च मृत्युः विप्रान् जिघांसति ॥

यो० । वेदानां अनभ्यासेन—चपुनः आचारस्यवर्जनात्—आलस्यात् चपुनः अन्नदोषात्—मृत्युः विप्रान् जिघांसति॥

भा० । ता० । वेदोंके अनभ्याससे अर्थात् अपने आचारणके त्यागनेसे और आलस्यसे अर्थात् आवश्यक कर्म के करनेमें शिथिलतासे और अभक्ष्य अन्नके दोषसे—मृत्यु ब्राह्मणों को हता (मारा) चाहतीहै अर्थात् ये सब अधर्मके हेतुहैं इसीसे अवस्थाके नाशकहैं ४ ॥

लशुनंगृञ्जनंचैवपलाण्डुंकवकानिच । अभक्ष्याणिद्विजातीनाममेध्यप्रभवानिच ५॥

प० । लशुनं गृंजनं च एव पलांडुं कवकानि च अभक्ष्याणि द्विजातीनां अमेध्यप्रभवाणि च ॥

यो० । लशुनं—चपुनः गृंजनं—पलांडुं—चपुनः कवकानि चपुनः अमेध्यप्रभवाणि (शाकादीनि) द्विजातीनां अभक्ष्याणि—भवन्तीति शेषः ॥

भा० । ता० । लशुन—गृंजन (गाजर) पलांडु (सलजम) कवक (छत्राक) और अशुद्ध

१ तस्ययद्रेतसःप्रथममुददीप्यततदसावादित्योऽभवद्यद्द्वितीयमासीत्तद्भृगुरिति ॥

भूमि में पैदाहुये अन्नआदि ये सब द्विजातियों को अभक्ष्य होतेहैं अर्थात् इनके भक्षणसे भी अवस्था नष्टहोतीहै और द्विजातियों के अभक्ष्य कहनेसे शूद्रोंके भक्ष्यहैं ५ ॥

लोहितान्वृक्षनिर्यासान्वृश्चनप्रभवांस्तथा । शेलुंगव्यंचपेयूषंप्रयत्नेनविवर्जयेत् ६ ॥

प० । लोहितान् वृक्षनिर्यासान् वृश्चनप्रभवान् तथा शेलुं गव्यं च पेयूषं प्रयत्नेन विवर्जयेत् ॥

यो० । लोहितान् तथा वृश्चनप्रभवान्–वृक्षनिर्यासान्–शेलुं (बहुवारकफलं) चपुनः गव्यं पेयूषं–प्रयत्नेन विवर्जयेत् ॥

भा० । वृक्षका लालगोंद और काटने से पैदाहुआ लाल वा सपेदगोंद–और बहुवारक का फल और गौकी पेवची–इनको बड़े यत्नसे वर्जदे ॥

ता० । लालगोंद और काटने से पैदाहुये गोंद चाहे ये सपेदभीहों–क्योंकि इसे[1] तैत्तिरीय श्रुतिमें लिखाहै कि जो निश्चयसे लालहो वा काटनेसे निकसा चाहै जैसाहो–और शेलु (बहुवारक का फल) नईप्रसूत गौकीपेवची इनको यत्नसे वर्जदे यद्यपि दशदिनतक गौके दूधका निषेध (अनिर्दशायाःगोःक्षीरं) इसवचनसे कहआये हैं उससेही पेवचीकाभी निषेध होसक्ता था तथापि अधिकदोष और अधिक प्रायश्चित्तकेलिये यहांपर पृथक्कहाहै और इसीसे इसका त्याग बड़े यत्नसे कहाहै ६ ॥

वृथाकृसरसंयावंपायसापूपमेवच । अनुपाकृतमांसानिदेवान्नानिहवींषिच ७ ॥

प० । वृथाकृसरसंयावं पायसापूपं एवं च अनुपाकृतमांसानि देवान्नानि हवींषि च ॥

यो० । वृथाकृसरसंयावं चपुनः पायसापूपं–अनुपाकृतमांसानि देवान्नानि–चपुनः हवींषि यत्नतः वर्जयेत् ॥

भा० । वृथा कृसर–मोहनभोग–खीर–पूवे–और अनुपाकृतमांस और वे देवताओं के अन्न और हवि जो देवताको निवेदन कियेहों–इनको वर्जदे ॥

ता० । वृथाकृसर अर्थात् देवताके विना उद्देश जो अपनेलियेही तिलमिलाकर चावल पकाये जाँय उसे वृथाकृसर कहतेहैं क्योंकि इसे[2] छन्दोगपरिशिष्टमें यही लिखाहै और संयाव पकेहुये दूधमें गुड़ और गेहूंकाचून मिलाकर जो बनताहै मोहनभोग वाकरिका जिसको कहते हैं और दूध और चावलोंसे बने वहपायस–औ अपूप (पूवे) इन वृथापकोंको वर्जदे और अनुपाकृतमांस पशु यज्ञआदि में पशुका जो मंत्रोंसे स्पर्शहै उसे उपाकरणकहतेहैं वह जिसका न हुआहो उस पशुके मांसको अनुपाकृतमांस कहतेहैं–और देवताके निवेदनसे पहिले अन्न और हवि (पुरोडाशआदि) इनको यत्नसे वर्जदे–अनुपाकृतमांसानि इसविशेष निषेध के दर्शन से–अनर्चितं वृथामांसं यह सामान्यनिषेध–गोबलीवर्द न्यायके अनुसार अनुपाकृतमांससे इतर श्राद्धआदि का अनुद्देश्य जो मांस उसके भक्षणके निषेधको बोधनकरताहै ७ ॥

अनिर्दशायागोःक्षीरमौष्ट्रमैकशफंतथा । आविकंसंधिनीक्षीरंविवत्सायाश्चगोःपयः ८ ॥

प० । अनिर्दशायाः गोः क्षीरं औष्ट्रं ऐकशफं तथा आविकं संधिनीक्षीरं विवत्सायाः च गोः पयः ॥

---

१ अथोखल्वाहुर्यएवलोहितो योवाव्रश्चनान्निर्येषावित्तस्यनाऽऽश्यकाममन्यस्येति ॥

२ तिलतंडुलसंपकः कृसरः सोभिधीयते ॥

यो० । अनिर्दशायाः गोः क्षीरं — औष्ट्रं — तथा एकशफं — आविकं — क्षीरं — संधिनीक्षीरं — चपुनः विवत्सायाः गोः पयः — इमान् यत्नतः वर्जयेत् ॥

भा० । ब्याने से दशदिन के भीतर गौ आदि का और उंटनी—घोड़ी—भेड़—इनका और सन्धिनी और जिसका वत्स (बछड़ा) न हो ऐसी गौ का दूध—यत्न से वर्जदे ॥

ता० । प्रसूत गौ बकरी भैंस का दशदिनसे भीतर का दूध क्योंकि यहां गौ पद से इस यम वचन से वे पशु लिये हैं जिनका दूधपीने योग्य है कि गौ बकरी भैंस इनका दूध ब्यानेसे दश दिनके भीतर न पीवे—और उंटनीका दूध और जिनकेएकशफ(खुर)है उनकादूध अर्थात् घोड़ीका दूध और भेड़का दूध और संधिनी जो ऋतुमती दूध देती हो और गर्भवती हुआ चाहती हो उसका—क्योंकि इसे वचन से हारीतने यही कहा है—और जिस गौका वत्स मरगयाहो वा पास न हो उसका दूध न पीवे—यहां पर विवत्सा कहने से ही गौ आजाती फिर भी ग्रहण किया गौ पद यह जताने के लिये है कि वत्सहीन गौ केही दूधका निषेध है बकरी और भैंस के दूध का निषेध नहीं है ८ ॥

आरण्यानांचसर्वेषांमृगाणांमाहिषंविना । स्त्रीक्षीरंचैववर्ज्यानिसर्वशुक्तानिचैवहि ९ ॥

प० । आरण्यानां च सर्वेषां मृगाणां माहिषं विना स्त्रीक्षीरं च एव वर्ज्यानि सर्वशुक्तानि च एव हि ॥

यो० । माहिषं विना सर्वेषां आरण्यानां मृगाणां (पशूनां) चपुनः स्त्रीक्षीरं इमानि चपुनः सर्वशुक्तानि — वर्ज्यानि विदुरिति शेषः ॥

भा० । भैंस को छोड़कर सम्पूर्ण वनके हाथी आदि पशुओं का—और स्त्री का दूध और सब शुक्त—ये वर्जित हैं अर्थात् भक्षणके योग्य नहीं हैं ॥

ता० । भैंस के दूधको छोड़कर वनमें रहने वाले सम्पूर्ण मृगों (हस्ति आदि पशुओं) का दूध क्योंकि महिषके निषेध से यहां मृगशब्द पशुमात्र का बोधक है—और स्त्री का दूध ये सब और सम्पूर्ण शुक्त (जो मधुर हो और किसी प्रकार खट्टा होजाय)—यद्यपि शुक्तंपर्युषितंचैव इससे शुक्तका निषेध सिद्धथा परन्तु फिर इसलिये कहाहै कि शुक्तोंमें दधिकानिषेध नहीं है ९ ॥

दधिभक्ष्यंचशुक्तेषुसर्वंचदधिसंभवम् । यानिचैवाभिषूयन्तेपुष्पमूलफलैःशुभैः १० ॥

प० । दधि भक्ष्यं च शुक्तेषु सर्वं च दधिसम्भवं यानि च एव अभिषूयन्ते पुष्पमूलफलैः शुभैः ॥

यो० । शुक्तेषु दधि चपुनः सर्वं दधिसम्भवं भक्ष्यं — चपुनः यानि शुक्तानि शुभैः पुष्पमूलफलैः अभिषूयन्ते (सन्धीयन्ते) तानि अपि भक्ष्याणि ॥

भा० । ता० । शुक्तों में दही और दही से उत्पन्न सम्पूर्ण तक्र आदि भक्ष्य है और जिनके शुभ पुष्प मूल वा फल जलसे मिलसकें वे सब भक्षणके योग्य हैं और शुभ इसपद से जो मोह

---

१ अनिर्दशाहंगोःक्षीरमाजंमाहिषमेवच ॥

२ संधिनी वृषस्यंती तस्याः पयोनपिबेत् ऋतुमती भवति ॥

आदि विकारों को पैदाकरै उनका निषेध समझना क्योंकि बृहस्पति ने यह कहा है कि उत्तम कन्द मूल फल पुष्पोंसे बनेहुये शुक्तोंको वर्जित न करै उनमें भी जो विकारी न हो वह भक्ष्य है और विकारी अभक्ष्य है १० ॥

क्रव्यादाञ्छकुनान्सर्वांस्तथाग्रामनिवासिनः ।
अनिर्दिष्टांश्चैकशफांष्टिट्टिभंचविवर्जयेत् ११ ॥

प० । क्रव्यादान् शकुनान् सर्वान् तथा ग्रामनिवासिनः अनिर्दिष्टान् च एकशफान् टिट्टिभं च विवर्जयेत् ॥

यो० । सर्वान् क्रव्यादान् तथा ग्रामनिवासिनः शकुनान् — चपुनः अनिर्दिष्टान् एकशफान चपुनः टिट्टिभं — विवर्जयेत् ॥

भा० । ता० । जो कच्चेमांस के खाने वाले (गृध्रआदि) और ग्राम में रहनेवाले (कबूतर आदि) पक्षियों को और कोई एकशफ वेद में भक्ष्य कहे हैं कि घोड़ी से उत्पन्न घोड़े का आलभन (बध) करै और उसके मांसका भक्षणकरै—और कोई रासभ (गधा) आदि एकशफ वर्जित कहेहैं उनको भी वर्जदे—और टिट्टिभ (टटीरी) कोभी वर्जदे ११ ॥

कलविंकंप्लवंहंसंचक्रांगंग्रामकुक्कुटम् । सारसंरज्जुवालंचदात्यूहंशुकसारिके १२ ॥

प० । कलविंकं प्लवं हंसं चक्रांगं ग्रामकुक्कुटं सारसं रज्जुवालं च दात्यूहं शुकसारिके ॥

यो० । कलविंकं — प्लवं हंसं चक्रांगं — ग्रामकुक्कुटं — सारसं — चपुनः रज्जुवालं — दात्यूहं — शुकसारिके — इमान् अपि वर्जयेत् ॥

भा० । चिड़िया—प्लव— हंस—चकवा—गांवका मुरगा—सारस—रज्जुवाल—दात्यूह—तोता— और मैना—ये भी अभक्ष्यहैं ॥

ता० । कलविंक (चिड़िया) प्लव—हंस—चक्रांग (चक्रवाक) ग्राम का मुरगा—सारस— रज्जुवाल—दात्यूह—तोता—सारिका (मैना) इन पक्षियों को भी वर्जदे—आगे जालपाद का निषेधकहेंगे उसीसे हंस और चक्रवाक का भी निषेधहोजाता यहां पृथक् निषेध इसलियेहै कि हंस और चक्रवाक से भिन्न जालपाद आपत्तिके समय भक्ष्य हैं और अनापद में अभक्ष्य हैं— इसीसे ग्रामका मुरगा सर्वथा अभक्ष्यहै और वनका आपत्तिमें भक्ष्यहै और अनापदमें अभक्ष्य है इसीलिये ग्रामपद दियाहै १२ ॥

प्रतुदाञ्जालपादांश्चकोयष्टिनखविष्किरान् ।
निमज्जतश्चमत्स्यादान्शौनंवल्लूरमेवच १३ ॥

प० । प्रतुदान् जालपादान् च कोयष्टिनखविष्किरान् निमज्जतः च मत्स्यादान् शौनं वल्लूरं एव च ॥

---

१ कन्दमूलफलैःपुष्पैः शस्तैः शुक्तान्नवर्जयेत् अविकारिभवेद्भक्ष्यमभक्ष्यंतद्विकारिकृत् ॥
२ तथाचाश्वं वाडवमालभेत तस्यच मांसं अश्नीयात् ॥

यो० । प्रतुदान् — चपुनः जालपादान् — कोयष्टिनखविष्किरान् — चपुनः निमज्जतः मत्स्यादान् — शौनं — चपुनः वल्लूरं — एतानि विवर्जयेत् ॥

भा० । ता० । जो प्रतुदहैं अर्थात् चोंचसे खातेहैं (दार्वाघाट खुटबढ़इया) और जिनके पादजालके समानहों (जैसा शरारि) कोयष्टि—और नखोंसे फेंक २ करखाते हैं (श्येनआदि) और जो जलमें डूबकर मत्स्योंको खाते हैं—और शुना (पशुजहांमारेजायँ) के स्थानका मांस और वल्लूर (सूकामांस) इनको भी वर्जदे १३ ॥

बकंचैवबलाकांचकाकोलंखंजरीटकम् । मत्स्यादान्विड्वराहांश्चमत्स्यानेवचसर्वशः १४॥

प० । बकं चैं एवं बलाकां चं काकोलं खंजरीटकं मत्स्यादान् विड्वराहान् चं मत्स्यान् एवं चैं सर्वशः ॥

यो० । बकं — चपुनः बलाकां — काकोलं (द्रोणकाकं) खंजरीटकं — मत्स्यादान् चपुनः विड्वराहान् चपुनः सर्वशः मत्स्यान् — वर्जयेत् ॥

भा० । ता० । बगुला—लत्तक—द्रोणकाक—खंजन—और मत्स्योंको खानेवाले नक्र आदि—और विष्ठाके खानेवाले सूकर और संपूर्ण मत्स्य इनको भी वर्जदे १४ ॥

योयस्यमांसमश्नातिसतन्मांसादउच्यते ।
मत्स्यादःसर्वमांसादस्तस्मान्मत्स्यान्विवर्जयेत् १५ ॥

प० । यः यस्य मांसं अश्नाति सः तन्मांसादः उच्यते मत्स्यादः सर्वमांसादः तस्मात् मत्स्यान् विवर्जयेत् ॥

यो० । यः यस्य मांसं अश्नाति सः तन्मांसादः उच्यते यस्मात् मत्स्यादः सर्वमांसादोभवति तस्मात् मत्स्यान् विवर्जयेत् ॥

भा० । ता० । जो जिसके मांसको खाताहै वह उसके मांस खानेवाला कहाजाताहै जैसे मूसेका बिलाव—और मत्स्योंके खानेवालोंको सब प्रकारके मांसका खानेवाला कहतेहैं तिससे मत्स्योंको वर्जदे १५ ॥

पाठीनरोहितावाद्यौनियुक्तौहव्यकव्ययोः ।
राजीवान्सिंहतुण्डांश्चसशल्कांश्चैवसर्वशः १६ ॥

प० । पाठीनरोहितौ आद्यौ नियुक्तौ हव्यकव्ययोः राजीवान् सिंहतुंडान् च सशल्कान् चैं एवं सर्वशः ॥

यो० । आद्यौ हव्यकव्ययोः नियुक्तौ पाठीनरोहितौ राजीवान् चपुनः सिंहतुंडान् चपुनः सर्वशः (सर्वान्) सशल्कान् — भक्षयेत् ॥

भा० । हव्य और कव्यमें नियुक्त (निवेदित) पाठीन और रोहित—और राजीव—सिंहतुंड—और शल्कवाले मत्स्य—भक्षणकरने योग्यहैं—इतर नहीं ॥

ता० । अब भक्ष्य मत्स्योंको कहतेहैं—कि हव्य और कव्यमें नियुक्त जो पाठीन और रोहित

नामके मत्स्य भक्ष्यहैं–और राजीव और जिनका सिंहके समान तुंडहो और जो शल्क सहित हों वे सब–इनको भी भक्षणकरै–यहांपर मेधातिथि और गोविंदराज तो यह कहतेहैं कि हव्य कव्यमें नियुक्त (क्रियमाण) ही पाठीन रोहित भक्षणकरने अन्य नहीं–और राजीव आदि मत्स्य तो सर्वदा भक्ष्यहैं–सो ठीक नहींहै–क्योंकि श्राद्धमें नियुक्त पाठीनरोहित श्राद्धके भोक्ता कोही खाने और करनेवालेको नहींखाने–और राजीव आदि श्राद्धसे अन्य समयमें भी खाने इसमें कोई प्रमाण नहींहै और अन्य मुनियोंने पाठीन रोहित राजीव आदि सब मत्स्योंको तुल्य कहाहै क्योंकि शंख का कथन यहहैकि राजीव सिंहतुंड–सशल्क–पाठीन–रोहित ये मत्स्यों में भक्ष्यहैं–और याज्ञवल्क्य ने भी यह कहाहै कि–ये पंच नख भक्ष्य हैं श्वावित् (बसह) गोधा (गोह) कछुआ–शल्यक–सेह–शशा– और मत्स्योंमें सिंह तुंडक–रोहित–पाठीन–राजीव–और सशल्क ये द्विजातियोंको भक्ष्यहैं और हारीत का यह कथनहै कि–न्यायसे प्राप्तहुये शल्क सहित मत्स्य–भक्ष्य हैं–इससे श्राद्धमें भोक्ताकोही खाने यजमानको नहीं–और राजीव आदि ऐसे नहींहैं यह मेधातिथि गोविंदराजकी व्याख्या मुनियोंको संमत नहींहै १६ ॥

नभक्षयेदेकचरानज्ञातांश्चमृगद्विजान् । भक्ष्येष्वपिसमुद्दिष्टान्सर्वान्पञ्चनखांस्तथा १७

प० । नँ भक्षयेत्ँ एकचरान्ँ अज्ञातान्ँ चँ मृगद्विजान्ँ भक्ष्येषुँ अँपि समुद्दिष्टान्ँ सर्वान्ँ पंचनखान्ँ तथाँ ॥

यो० । एकचरान चपुनः भक्ष्येषु समुद्दिष्टान अपि अज्ञातान मृगद्विजान् तथा सर्वान पंचनखान –न भक्षयेत् ॥

भा० । ता० । जो प्रायः एकाकी विचरतेहैं (सर्प आदि) और जो मृग वा पक्षि ऐसेहैं जिनको नाम वा जातिका निश्चय नहींहै भक्ष्योंमें कहेहुये भी उनको भक्षण न करै और वानर आदि संपूर्ण जो पंचनख उनको भी भक्षण न करै १७ ॥

श्वाविधंशल्यकंगोधांखड्गकूर्मशशांस्तथा । भक्ष्यान्पञ्चनखेष्वाहुरनुष्ट्रांश्चैकतोदतः १८॥

प० । श्वाविधं शल्यकं गोधां खड्गकूर्मशशान् तथा भक्ष्यान् पंचनखेषु आहुः अनुष्ट्रान् चँ एकतोदतः ॥

यो० । श्वाविध – शल्यकं – गोधां – तथा खड्गकूर्मशशान इमान पंचनखेषु चपुनः अनुष्ट्रान (उष्ट्रभिन्नान) एकतोदतः – भक्ष्यान् मन्वादयः आहुः ॥

भा० । ता० । श्वाविध (सेह) शल्य (सेहकीतुल्यबड़ेबड़ेरोमवाला) गोधा–गेंडा–कच्छप–और शशा पंचनखोंमें ये पांच और ऊंटको छोड़कर एकओर दांतवाले जीव– भक्षण के योग्य मनुआदिने कहेहैं १८ ॥

---

१ राजीवाः सिंहतुंडाश्च सशल्काश्च तथैवच पाठीनरोहितौ चापि भक्ष्यामत्स्येषु कीर्तिताः ॥

२ भक्ष्याः पंचनखाः श्वावित् गोधा कच्छपशल्यकाः शशश्चमत्स्येष्वपितु सिंहतुंडकरोहिताः तथा पाठीनराजीवसशल्काश्च द्विजातिभिः ॥

३ सशल्कान् मत्स्यान् न्यायोपपन्नान्भक्षयेत् ॥

४ भोक्तैवाश्नीयान्नकर्त्तापि श्राद्धे पाठीनरोहितौ—राजीवाद्यास्तथानेति व्याख्यानमुनिसंमता ॥

छत्राकंविड्वराहंचलशुनंग्रामकुक्कुटम् । पलांडुंगृञ्जनंचैवमत्याजग्ध्वापतेद्द्विजः १९ ॥

प० । छत्राकं विड्वराहं च लशुनं ग्रामकुक्कुटं पलांडुं गृंजनं च एव मत्या जग्ध्वा पतेत् द्विजः ॥

यो० । छत्राकं—चपुनः विड्वराहं—लशुनं—ग्रामकुक्कुटं—पलांडुं—चपुनः—गृंजनं—द्विजः मत्या (ज्ञात्वा) एतान् जग्ध्वा (भक्षयित्वा) पतेत् ॥

भा० । ता० । छत्राक—और विष्टाखानेवाला वराह—लशुन—ग्रामकामुरगा—पलांडु (सलजम) और गाजर—इनको जानकर वारम्वार खाकर द्विज पतितहोता है अर्थात् इनको खाकर पतितका प्रायश्चित्तकरै—क्योंकि निषिद्ध छत्राकआदि छओंका खाना सुरापान के तुल्यहै १६ ॥

अमत्यैतानिषट्जग्ध्वाकृच्छ्रंसांतपनंचरेत् । यतिचान्द्रायणंवापिशेषेषूपवसेदहः २० ॥

प० । अमत्या एतानि षट् जग्ध्वा कृच्छ्रं सांतपनं चरेत् यतिचांद्रायणं वा अपि शेषेषु उपवसेत् अहः ॥

यो० । द्विजः एतानि षट् अमत्या जग्ध्वा सांतपनं कृच्छ्रं—वा यतिचांद्रायणं चरेत्—शेषेषु (लोहितवृक्षनिर्यासादिषुभक्षितेषुसत्सु) अहः उपवसेत् एकमुपवासंकुर्यात् ॥

भा० । ता० । अज्ञानसे इन छत्राकआदि छओंको खाकर सांतपन कृच्छ्र अथवा सातदिन में करनेयोग्य सांतपनरूप यतिचांद्रायणको करै और इतर वृक्ष के लाल गोंदआदिको खाकर एकदिनका उपवासकरै—यहां छत्राकआदिका अधिक प्रायश्चित्त सर्वथा त्यागकेलिये है इसी प्रशेषोंके भक्षणकरनेसे उपवास लाघवकेलियेहै २० ॥

संवत्सरस्यैकमपिचरेत्कृच्छ्रंद्विजोत्तमः । अज्ञातभुक्तशुद्ध्यर्थंज्ञानस्यतुविशेषतः २१ ॥

प० । संवत्सरस्य एकं अपि चरेत् कृच्छ्रं द्विजोत्तमः अज्ञातभुक्तशुद्ध्यर्थं ज्ञातस्य तु विशेषतः ॥

यो० । द्विजोत्तमः (ब्राह्मणादि) अज्ञातभुक्तशुद्ध्यर्थं संवत्सरस्य एकमपि कृच्छ्रं ज्ञातस्य भुक्तस्य शुद्ध्यर्थं तु विशेषतः चरेत्—(कुर्यात्) ॥

भा० । ता० । द्विजाति—वर्षदिनमें अज्ञात भोजनकी शुद्धिके लिये प्राजापत्यआदि एक भी कृच्छ्रको करै और जानकर भोजनकी शुद्धिकेलिये तो विशेषकर वही प्रायश्चित्तकरै जो उसके भक्षणका कहाहै और जो यहवचन है कि ब्राह्मणोंकेलिये देवताओंने ये तीन पवित्रकहे हैं जिस की अशुद्धि न देखीहो—जिसपर जलकी शुद्धिहुईहो—और जो वाणी से शुद्धहो—यह उस द्रव्य की शुद्धिके विषयमेंहै जिसका प्रायश्चित्त द्रव्यशुद्धि प्रकरणमें नहींकहाहै २१ ॥

यज्ञार्थंब्राह्मणैर्वध्याःप्रशस्तामृगपक्षिणः । भृत्यानांचैववृत्त्यर्थमगस्त्योह्यचरत्पुरा २२ ॥

प० । यज्ञार्थं ब्राह्मणैः वध्याः प्रशस्ताः मृगपक्षिणः भृत्यानां च एव वृत्त्यर्थं अगस्त्यः हि अचरत् पुरा ॥

यो० । ब्राह्मणैः यज्ञार्थं चपुनः भृत्यानां वृत्त्यर्थं प्रशस्ताः मृगपक्षिणः वध्याः हि (यतः) अगस्त्यः पुरा अचरत् ॥

भा० । ता० । ब्राह्मणोंको यज्ञकेलिये और पालना करनेयोग्य माता पिताआदिकी पालना

---

१ गर्हितानांतथाजग्धिः सुरापानसमानिषट् ॥

२ त्रीणिदेवाःपवित्राणिब्राह्मणानामकल्पयन् — अदृष्टमद्भिर्निर्णिक्तंयच्चवाचाप्रशस्यते ॥

करनेकेलिये प्रशस्त (शास्त्रोक्त) मृग और पक्षि मारनेयोग्य हैं क्योंकि अगस्त्यमुनिने पहिले ऐसेही कियाहै २२ ॥

बभूवुर्हिपुरोडाशाभक्ष्याणांमृगपक्षिणाम् । पुराणेष्वपियज्ञेषुब्रह्मक्षत्रसवेषुच २३ ॥

प० । बभूवुः हि पुरोडाशाः भक्ष्याणां मृगपक्षिणां पुराणेषु अपि यज्ञेषु ब्रह्मक्षत्रसवेषु च ॥

यो० । पुराणेषु यज्ञेषु अपि हि (यतः) चपुनः ब्रह्मक्षत्रसवेषु भक्ष्याणां मृगपक्षिणां पुरोडाशाः बभूवुः अतः आधुनिकैः अपि वध्याः ॥

भा० । ता० । पहिले भी ऋषियोंके किये यज्ञोंमें और ब्राह्मण और क्षत्रियों के यज्ञोंमें शास्त्रोक्त मृग और पक्षियोंके जिससे पुरोडाशहुयेहैं इससे आधुनिक मनुष्य भी यज्ञकेलिये प्रशस्त मृग और पक्षियोंको मारें २३ ॥

यत्किंचित्स्नेहसंयुक्तंभक्ष्यंभोज्यमगर्हितम् । तत्पर्युषितमप्याद्यंहविःशेषंचयद्भवेत् २४

प० । यत् किंचित् स्नेहसंयुक्तं भक्ष्यं भोज्यं अगर्हितं तत् पर्युषितं अपि आद्यं हविःशेषं च यत् भवेत् ॥

यो० । यत् किंचित् भक्ष्यं – भोज्यं – स्नेहसंयुक्तं अगर्हितं भवेत् तत् – चपुनः हविःशेषं यत् भवेत् तत्पर्युषितं अपि आद्यं (भक्षणीयम्) ॥

भा० । अगर्हित बासी भी भक्ष्य और भोज्यको भोजन के समय घृतआदि स्नेह मिलाकर भोजनकरले और बासीहविके शेषको तो घृतआदिके विनामिलायेभी भोजनकरै ॥

ता० । जो भक्ष्य (चणकादि) वा भोज्य (ओदनादि) पदार्थ अगर्हित (शुद्ध) हो–वह घृत आदि मिलाकर भक्षणकरने योग्यहै और जो पहिलेसेही घृत आदि संयुक्तहो वह भक्ष्यहै यह अर्थ नहीं करना क्योंकि हविःशेषका पृथक् ग्रहण व्यर्थहोजायगा क्योंकि हविः में घृतका संयोग आवश्यकहोनेसे स्नेहसंयुक्त सेही आजाता फिर पृथक् हविःशेषका लिखना व्यर्थहोजाता–और अन्य स्मृतियोंमें भी खानेके समयमेंही घृतका मिलाना लिखाहै क्योंकि यम का यह कथनहै कि मसूर–उड़द–जिसमें मिलेहों उसका बासी होनेपर भी घी मिलाकर भक्षणकरै–और बासी हविःशेषको तो भोजनके समय घीके मिलाये विना भी भोजनकरले २४ ॥

चिरस्थितमपित्वाद्यमस्नेहाक्तंद्विजातिभिः । यवगोधूमजंसर्वंपयसश्चैवविक्रिया २५ ॥

प० । चिरस्थितं अपि तु आद्यं अस्नेहाक्तं द्विजातिभिः यवगोधूमजं सर्वं पयसः च एव विक्रिया ॥

यो० । सर्वं यवगोधूमजं अस्नेहाक्तं चिरस्थितं अपि चपुनः पयसः विक्रिया द्विजातिभिः आद्यं (भक्षणीयम्)

भा० । ता० । स्नेह (घी आदि) से रहित जौ–गेहूं और दूध के सम्पूर्णपदार्थ चिरकाल के रक्खेहुये भी द्विजातियों को भक्षणकरने योग्यहैं २५ ॥

एतदुक्तंद्विजातीनांभक्ष्याभक्ष्यमशेषतः । मांसस्यातःप्रवक्ष्यामिविधिंभक्षणवर्जने २६ ॥

प० । एतत् उक्तं द्विजातीनां भक्ष्याभक्ष्यं अशेषतः मांसस्य अतः प्रवक्ष्यामि विधिं भक्षणवर्जने ॥

यो० । एतत् द्विजातीनां अशेषतः भक्ष्याभक्ष्यं उक्तम् – अतः मांसस्य भक्षणवर्जने विधिं प्रवक्ष्यामि ॥

१ मसूरमाषसंयुक्तं तथा पर्युषितंचयत – तत्तुभक्ष्यालिनंकृत्वा भुंजीतह्यभिघारितम् ॥

भा० । ता० । यह सम्पूर्ण द्विजातियोंका भक्ष्य और अभक्ष्य मैंनेकहा—इससे आगे मांसके भक्षण और त्यागमें विधिको कहूंगा २६ ॥

प्रोक्षितंभक्षयेन्मांसंब्राह्मणानांचकाम्यया । यथाविधिनियुक्तस्तुप्राणानामेवचात्यये २७

प० । प्रोक्षितं भक्षयेत् मांसं ब्राह्मणानां च काम्यया यथाविधिनियुक्तः तु प्राणानां एव च अत्यये ॥

यो० । प्रोक्षितंमांसं चपुनः ब्राह्मणानां काम्यया — तुपुनः यथाविधिनियुक्तः — चपुनः प्राणानां एव अत्यये — मांसं भक्षयेत् ॥

भा० । यज्ञमें मंत्रोंसे प्रोक्षित—और ब्राह्मणों की कामना से—और शास्त्रोक्तविधिके अनुसार और नियुक्त गुरुआदिकी आज्ञासे—और प्राणोंके नाशहोने की संभावनामें—मांसकोभक्षणकरै ॥

ता० । प्रोक्षित मांसको भक्षणकरै यह परिसंख्याविधि नहीं है क्योंकि परिसंख्याहोती तो प्रोक्षितसे अन्यमांस भक्षण नहींकरना यह वाक्यका अर्थहोता—और वह अप्रोक्षितका निषेध-अनुपाकृतमांसानि—इससेही सिद्धहै—जिससे मंत्रोंकेद्वारा प्रोक्षित संस्कार जिसकाकियाहो और यज्ञमें होमसे शेष जो यज्ञांगमांस उसके भक्षणका यह विधान है इसी से (असंस्कृतान् पशून्मंत्रैः) यह इसका अनुवाद कहेंगे—और ब्राह्मणों की जब कामनाहो तबभी एकहीबार मांस को भक्षणकरै क्योंकि यम ने इस[1] वचनसे एकहीबार भक्षणकरना कहा है—और श्राद्ध और मधुपर्क में मांसको भक्षणकरै क्योंकि गृह्यसूत्रमें[2] मधुपर्क भी मांससहित कहा है और नियुक्त भी अवश्य मांसको भक्षणकरै—और इतर आहारों से यदि प्राणोंका नष्टहोताहो और मांससे वचें तो मांसको भक्षणकरै २७ ॥

प्राणस्यान्नमिदंसर्वंप्रजापतिरकल्पयत् । स्थावरंजङ्गमंचैवसर्वंप्राणस्यभोजनम् २८ ॥

प० । प्राणस्य अन्नं इदं सर्वं प्रजापतिः अकल्पयत् स्थावरं जंगमं च एव सर्वं प्राणस्य भोजनम् ॥

यो० । प्रजापतिः इदं सर्वं प्राणस्य अन्नं अकल्पयत् — चपुनः सर्वं स्थावरं जंगमं प्राणस्य भोजनं भवति — अतः मांसं प्राणरक्षार्थं भक्षयेत् ॥

भा० । ता० । ब्रह्माने यह सम्पूर्ण प्राण (जीव) का अन्न रचाहै कि स्थावर व्रीहि आदि और जंगम (पशु आदि) संपूर्ण प्राणकाही भोजन है अर्थात् प्राणकी रक्षाके निमित्तही भक्षण करै सर्वदा नहीं २८ ॥

चराणामन्नमचरादंष्ट्रिणामप्यदंष्ट्रिणः । अहस्ताश्चसहस्तानांशूराणांचैवभीरवः २९ ॥

प० । चराणां अन्नं अचराः दंष्ट्रिणां अपि अदंष्ट्रिणः अहस्ताः च सहस्तानां शूराणां च एव भीरवः ॥

यो० । चराणां (मृगादीनां) अचराः (तृणादयः) अन्नं — दंष्ट्रिणां (व्याघ्रादीनां) अदंष्ट्रिणः (हरिणादयः)

---

१ सकृद्ब्राह्मणकाम्यया ॥
२ समांसोमधुपर्कः ॥

सहस्तानां (मनुष्यादीनां) अहस्ताः (मत्स्यादयः) शूराणां (सिंहादीनां) भीरवः (हस्त्यादयः) अन्नं — भवतीति शेषः ॥

भा० । ता० । चरों (मृगादिकों) का अन्न अचर (तृणादि) है और दंष्ट्रावाले व्याघ्रादिकों का अन्न विना दंष्ट्रावाले मृगादिक हैं—और हाथवाले मनुष्यादिकों का अन्न विना हाथवाले मत्स्यादिक हैं—और शूरवीर (पराक्रमी) सिंहादिकों के अन्न भीरु हाथी आदि हैं अर्थात् एक का एक भक्ष्य है २९ ॥

नात्तादुष्यत्यदन्नाद्यान्प्राणिनोऽहन्यहन्यपि ।
धात्रैवसृष्टाह्याद्याश्चप्राणिनोऽत्तारएवच ३० ॥

प० । न अत्ता दुष्यति अदन् आद्यान् प्राणिनः अहनि अहनि अपि धात्रा एव सृष्टाः हि आद्याः च प्राणिनः अत्तारः एव च ॥

यो० । अत्ता आद्यान प्राणिनः अदन् सन न दुष्यति—हि (यतः) आद्याः चपुनः अत्तारः प्राणिनः धात्रा(ब्रह्मणा) एव सृष्टाः (रचिताः) त्रिभिः श्लोकैः प्राणात्यय मांसभक्षणस्तुतिरियम् नतु यथेच्छमांसभक्षणे आज्ञा ॥

भा० । ता० । खानेवाला मनुष्य खानेयोग्य प्राणियों को खाता हुआ दूषित नहीं होता क्योंकि खानेके योग्य और खानेवाले सब प्राणी ब्रह्माने ही रचे हैं—यह तीन श्लोकों से प्राणों के नाश की सम्भावना में मांसभक्षण की स्तुति है और सब काल आज्ञा नहीं है इससे विना यज्ञ मांसका भक्षण कभी न करे ३० ॥

यज्ञायजग्धिर्मांसस्येत्येषदैवोविधिःस्मृतः।अतोऽन्यथाप्रवृत्तिस्तुराक्षसोविधिरुच्यते३१

प० । यज्ञाय जग्धिः मांसस्य इति एषः दैवः विधिः स्मृतः अतः अन्यथाप्रवृत्तिः तु राक्षसः विधिः उच्यते ॥

यो० । यज्ञाय मांसस्य जग्धिः इति एषः विधिः दैवः स्मृतः अतः अन्यथाप्रवृत्तिस्तु राक्षसः विधिः उच्यते—मन्वादिभिरितिशेषः ॥

भा० । ता० । यज्ञकी सिद्धिकेलिये जो यज्ञके अंग रूप मांसका जो भक्षण है सो तो दैव विधि कहीहै और इससे अन्यथा जो प्रवृत्ति अर्थात् यज्ञके विना मांसका भक्षण सो विधि मनु आदिने राक्षस विधि कहीहै ३१ ॥

क्रीत्वास्वयंवाप्युत्पाद्यपरोपकृतमेववा । देवान्पितॄंश्चार्चयित्वाखादन्मांसंनदुष्यति ३२

प० । क्रीत्वा स्वयं वा अपि उत्पाद्य परोपकृतं एव वा देवान् पितॄन् च अर्चयित्वा खादन् मांसं न दुष्यति ॥

यो० । क्रीत्वा — वा स्वयं उत्पाद्य वा परोपकृतं — चपुनः देवान् पितॄन् अर्चयित्वा पुरुषः मांसं खादन् सन् न दुष्यति — दोषभाक् न भवति ॥

भा० । ता० । मांसको मोललेकर वा स्वयं पैदाकरके—अथवा किसीने आनकर दियाहो—अथवा देवता और पितर इनको पूजनकरके मांसको खाताहुआ मनुष्य दोषका भागी नहीं होता—इसीसे यह भी प्रोक्षित आदि चारप्रकार के मांस भक्षण के समान नियत नहीं है—और

वर्ष २ में अश्वमेध यज्ञकरै इत्यादि जो मांसके त्यागकीविधिहै उसका भी यही तात्पर्यहै अर्थात् मोललेकर विधिसे हीन मांसका भक्षण कभी भी न करै ३२ ॥

नाद्यादविधिनामांसंविधिज्ञोऽनापदिद्विजः।जग्ध्वाह्यविधिनामांसंप्रेत्यतैरद्यतेऽवशः३३

प० । न अद्यात् अविधिना मांसं विधिज्ञः अनापदि द्विजः जग्ध्वा हि अविधिना मांसं प्रेत्य तैः अद्यते अवशः ॥

यो० । विधिज्ञः द्विजः अविधिना मांसं न अद्यात् — हि (यतः) अविधिना मांसं जग्ध्वा प्रेत्य तैः अवशः सन् पुरुषः अद्यते (भक्ष्यते) ॥

भा० । ता० । मांस भक्षणके दोष की विधि को जानताहुआ द्विज विना आपत्ति के अविधि से मांस को भक्षण न करै क्योंकि जो विना विधि विधान से मांस को खाता है परवशहुये उस पुरुष को मरे पीछे वे ही जीव खातेहैं जो उसने खाये हैं ३३ ॥

नतादृशंभवत्येनोमृगहंतुर्धनार्थिनः । यादृशंभवतिप्रेत्यवृथामांसानिखादतः ३४॥

प० । न तादृशं भवति एनः मृगहंतुः धनार्थिनः यादृशं भवति प्रेत्य वृथा मांसानि खादतः ॥

यो० । धनार्थिनः मृगहन्तुः तादृशं एनः न भवति — यादृशं प्रेत्य वृथामांसानि खादतः पुरुषस्य भवति ॥

भा० । ता० । धनकेलिये मृगों को मारने वाले व्याधको उतना दोष नहींहोता जितना वृथा मांसके खानेवाले को मरण के अनन्तर होताहै अर्थात् देवता आदिके अर्पण किये विना मांस को कभी भी भक्षण न करै ३४ ॥

नियुक्तस्तुयथान्यायंयोमांसंनात्तिमानवः । सप्रेत्यपशुतांयातिसंभवानेकविंशतिम्३५॥

प० । नियुक्तः तु यथान्यायं यः मांसं न अत्ति मानवः सः प्रेत्य पशुतां याति सम्भवान् एकविंशतिम् ॥

यो० । यथान्यायं (श्राद्धमधुपर्केच) नियुक्तः यः पुरुषः मांसं न अत्ति — सः मानवः प्रेत्य एकविंशतिं सम्भवान् पशुतां याति ॥

भा० । ता० । श्राद्ध और मधुपर्क में नियुक्त हुआ जो मनुष्य मांस को नहीं खाता वह मरने के अनन्तर इक्कीस जन्मतक पशुहोता है—अर्थात् यथाविधि नियुक्त हुआ मांस भोजन करै इसको यह जो नहीं करै उसको यह दोषहोताहै ३५ ॥

असंस्कृतान्पशून्मन्त्रैर्नाद्याद्विप्रःकदाचन ।
मन्त्रैस्तुसंस्कृतानद्याच्छाश्वतंविधिमास्थितः ३६ ॥

प० । असंस्कृतान् पशून् मंत्रैः न अद्यात् विप्रः कदाचन मंत्रैः तु संस्कृतान् अद्यात् शाश्वतं विधिं आस्थितः ॥

यो० । विप्रः मंत्रैः असंस्कृतान् पशून् कदाचन न अद्यात् — तुपुनः शाश्वतं विधिं आस्थितः सन् मंत्रैः संस्कृतान् अद्यात् ॥

भा० । ता० । वेदोक्त मंत्रों से जिनका प्रोक्षण आदि संस्कार नहीं हुआ ऐसे पशुओं को

ब्राह्मण कभी नहींखाय–और अनादि विधि (पशुयज्ञ आदि)में टिकाहुआ ब्राह्मण मंत्रों से जिनका संस्कार हुआहै ऐसे पशुओं को भक्षणकरै ३६ ॥

कुर्याद्घृतपशुंसंगेकुर्यात्पिष्टपशुंतथा । नत्वेवतुवृथाहन्तुंपशुमिच्छेत्कदाचन ३७ ॥

प० । कुर्यात् घृतपशुं संगे कुर्यात् पिष्टपशुं तथा न तु एवं तु वृथा हंतुं पशुं इच्छेत् कदाचन ॥

यो० । संग (आसक्तौ) घृतपशुं तथा पिष्टपशुं कुर्यात् – पशुं वृथा हंतुं तु कदाचन नतु इच्छेत् ॥

भा० । ता० । यदि आसक्ति होयतो घी की अथवा चूनकी पशु की प्रतिमा बनाकर भक्षण करै परन्तु देवताके निवेदन कियेविना पशुके मारनेकी कदाचित् भी इच्छा न करै ३७ ॥

यावंतिपशुरोमाणितावत्कृत्वोहमारणम् । वृथापशुघ्नःप्राप्नोतिप्रेत्यजन्मनिजन्मनि३८॥

प० । यावंति पशुरोमाणि तावत्कृत्वः ह मारणं वृथापशुघ्नः प्राप्नोति प्रेत्य जन्मनि जन्मनि ॥

यो० । वृथा पशुघ्नः यावंति पशुरोमाणि तावत्कृत्वः प्रेत्य जन्मनि जन्मनि मारणं प्राप्नोति ह इति प्रसिद्धौ ॥

भा० । ता० । देवता के उद्देश के विना जो वृथेव पशुओं को मारता है वह जितने पशु के देहमें रोम हैं उतनेही जन्मों में मरने को प्राप्तहोता है अर्थात जैसे वह मारताहै ऐसेही उसको भी इतर मारते हैं इससे यज्ञके विना कभी भी पशु की हिंसा न करै ३८ ॥

यज्ञार्थंपशवःसृष्टाःस्वयमेवस्वयंभुवा । यज्ञस्यभूत्यैसर्वस्यतस्माद्यज्ञेवधोऽवधः ३९ ॥

प० । यज्ञार्थं पशवः सृष्टाः स्वयं एव स्वयंभुवा यज्ञस्य भूत्यै सर्वस्य तस्मात् यज्ञे वधः अवधः ॥

यो० । स्वयंभुवा यज्ञार्थं सर्वस्य यज्ञस्य भूत्यै स्वयं एव पशवः सृष्टाः तस्मात् यज्ञे वधः अवधः भवति ॥

भा० । ता० । अब यह कहते हैं कि यज्ञकेलिये पशुकीहिंसा में दोषनहीं है–ब्रह्माने स्वयंही यज्ञकेलिये और सम्पूर्ण यज्ञोंकी सिद्धिके निमित्त पशुरचे हैं तिससे यज्ञके विषे जो वध है वह वध (हिंसा) नहींहै ३९ ॥

ओषध्यःपशवोवृक्षास्तिर्यंचःपक्षिणस्तथा।यज्ञार्थंनिधनंप्राप्ताःप्राप्नुवंत्युत्सृतीःपुनः ४०

प० । ओषध्यः पशवः वृक्षाः तिर्यंचः पक्षिणः तथा यज्ञार्थं निधनं प्राप्ताः प्राप्नुवंति उत्सृतीः पुनः ॥

यो० । ओषध्यः पशवः वृक्षाः तिर्यंचः – तथापक्षिणः – यज्ञार्थं निधनंप्राप्ताः संतः पुनः उत्तमांजातिं प्राप्नुवंति – यज्ञमरणेन पशोः उत्तमजन्मभवतीत्यर्थः ॥

भा० । ता० । यज्ञकेलिये नाशकोप्राप्तहुई व्रीहिआदि ओषधि–पशु–वृक्ष–कूर्मआदि तिर्यक् जीव और कपिंजलआदि पक्षी–फिर भी जन्म में उत्तमजन्मको प्राप्तहोतेहैं ४० ॥

मधुपर्केचयज्ञेचपितृदैवतकर्मणि । अत्रैवपशवोहिंस्यानान्यत्रेत्यब्रवीन्मनुः ४१ ॥

प० । मधुपर्के च यज्ञे च पितृदैवतकर्मणि अत्र एव पशवः हिंस्याः न अन्यत्र इति अब्रवीत् मनुः ॥

यो० । मधुपर्के चपुनः यज्ञे—चपुनः पितृदैवतकर्मणि अत्र (एषु) एव पशवः हिंस्याः अन्यत्र न हिंस्याः इति मनुः अब्रवीत् ॥

भा० । ता० । मधुपर्क—ज्योतिष्टोमआदि यज्ञ—और पितर और देवताओंके श्राद्धआदि कर्म इनमेंही पशुओंकी हिंसाकरनी अन्यत्र नहीं करनी यह मनुने कहाहै ४१ ॥

एष्वर्थेषुपशूंहिंसन्वेदतत्त्वार्थविद्द्विजः । आत्मानंचपशुंचैवगमयत्युत्तमांगतिम् ४२ ॥

प० । एषु अर्थेषु पशुं हिंसन् वेदतत्त्वार्थवित् द्विजः आत्मानं च पशुं च एव गमयति उत्तमां गतिं ॥

यो० । वेदतत्त्वार्थवित् द्विजः एषु अर्थेषु (मधुपर्कादिषु) पशुंहिंसन सन् आत्मानं चपुनः पशुं उत्तमां गतिं गमयति ॥

भा० । वेदके तत्त्वको जानताहुआ द्विज इनमधुपर्क आदि में पशुओंकी हिंसा करताहुआ अपने आत्मा और पशुको उत्तमगतिको पहुंचाताहै ॥

ता० । इन मधुपर्कआदि कर्मों में पशुओंकी हिंसाकरताहुआ वेदके यथार्थतत्त्व को जानता हुआ द्विज अपने आत्माको और पशुको उत्तमगतिको पहुंचाता है—कदाचित् कोई यह कहै कि अन्य (मनुष्य) के किये कर्मसे पशुकी उत्तमगति कैसेहोगी—सोठीकनहीं क्योंकि शास्त्रोक्त यह बातहै कि जैसे पिताके किये जातकर्म से पुत्रको फलहोता है इसीप्रकार यजमान की करुणासे पशुकोभी अधिकफलहोताहै और अपनेको और पशुको उत्तमगतिको पहुंचाताहै यह कहतेहुये मनुने इसीश्लोकसे यहबात सूचित की है ४२ ॥

गृहेगुरावरण्येवानिवसन्नात्मवान्द्विजः । नावेदविहितांहिंसामापद्यपिसमाचरेत् ४३ ॥

प० । गृहे गुरौ अरण्ये वा निवसन् आत्मवान् द्विजः न अवेदविहितां हिंसां आपदि अपि समाचरेत् ॥

यो० । आत्मवान् द्विजः गृहे—गुरौ—वा अरण्ये—निवसन सन् आपदि अपि—अवेदविहितां हिंसां न समाचरेत् ॥

भा० । ता । आत्मा के विचारवाला द्विज घरमें अथवा गुरुके यहां अथवा वनमें वसताहुआ शास्त्रोक्त हिंसासे भिन्नहिंसाको आपत्ति के समय में भी न करे ४३ ॥

यावेदविहिताहिंसानियतास्मिश्चराचरे । अहिंसामेवतांविद्याद्वेदाद्धर्मोहिनिर्बभौ ४४ ॥

प० । या वेदविहिता हिंसा नियता अस्मिन् चराचरे अहिंसां एव तां विद्यात् वेदात् धर्मः हि निर्बभौ ॥

यो० । अस्मिन् चराचरे जगति या हिंसा वेदविहिता नियता (अस्ति) तां अहिंसां एव विद्यात् हि (यतः) धर्मः वेदात् निर्बभौ (प्रकाशतांगतः) ॥

भा० । जो वेदोक्त हिंसा नियत है उसको इस चराचर जगत् में अहिंसाही जाने क्योंकि धर्म्म का प्रकाश वेदसेही हुआ है ॥

ता० । तो किसप्रकार हिंसा करे—वेदोक्त यज्ञ दीक्षा में पशु की हिंसा अधर्म के लिये नहीं है—जो हिंसा वेदसे विहितहै और देशकाल से नियतहै इस स्थावर जंगमरूप संसार में उसको हिंसासे उत्पन्न अधर्मके अभावसे अहिंसाहीजाने कदाचित् कोई यह कहै कि दीक्षाके समय पशुका हनन अधर्महै प्राणिका हनन होनेसे ब्राह्मणके हनन की तुल्य—यह अनुमान भी शास्त्रसे

बाधितहोनेसे प्रवृत्तनहीं होता क्योंकि अनुमानभी वही प्रमाण होताहै जिसमें शास्त्रमूलहै और पूर्वोक्त अनुमानमें दृष्टांतदिया ब्राह्मण हनन अधर्महै इसमें भी शास्त्रही मूलहै–क्योंकि जिसमें वेदसे इतर कोई प्रमाण नहीं ऐसाधर्म वेदसेही प्रकाशहुआहै ४४ ॥

योऽहिंसकानिभूतानिहिनस्त्यात्मसुखेच्छया । सजीवंश्चमृतश्चैवनक्कचित्सुखमेधते ४५

प० । यः अहिंसकानि भूतानि हिनस्ति आत्मसुखेच्छया सः जीवन् च मृतः च एव न क्वचित् सुखं एधते ॥

यो० । यः पुरुषः आत्मसुखेच्छया अहिंसकानि भूतानि हिनस्ति सः जीवन् चपुनः मृतःसन् क्वचित् सुखं न एधते ॥

भा० । ता० । जो पुरुष अपने सुखकी इच्छासे हिंसा न करनेवाले प्राणियोंकी हिंसाकरताहै जीता और माराहुआ वह मनुष्य कभी भी सुखसे नहीं बढ़ता ४५ ॥

योबन्धनवधक्लेशान्प्राणिनांनचिकीर्षति । ससर्वस्यहितप्रेप्सुःसुखमत्यन्तमश्नुते ४६ ॥

प० । यः बंधनवधक्लेशान् प्राणिनां न चिकीर्षति सः सर्वस्य हितप्रेप्सुः सुखं अत्यंतं अश्नुते ॥

यो० । यः पुरुषः प्राणिनां बंधनवधक्लेशान् न चिकीर्षति सर्वस्य हितप्रेप्सुः सः पुरुषः अत्यंतं सुखं अश्नुते (भुंक्ते) ॥

भा० । ता० । जो प्राणियोंका बंधन–और वध इनके क्लेशोंके करनेकी इच्छा नहीं करता–सबके हितका अभिलाषी वह पुरुष अत्यंत सुखको भोगताहै ४६ ॥

यद्ध्यायतियत्कुरुतेधृतिंबध्नातियत्रच । तदवाप्नोत्ययत्नेनयोहिनस्तिनकिंचन ४७ ॥

प० । यत् ध्यायति यत् कुरुते धृतिं बध्नाति यत्र च तत् अवाप्नोति अयत्नेन यः हिनस्ति न किंचन ॥

यो० । यः पुरुषः किंचन न हिनस्ति – सः यत् ध्यायति – यत्कुरुते – चपुनः यत्र धृतिं बध्नाति – तत् (वस्तु) अयत्नेन अवाप्नोति ॥

भा० । ता० । जो पुरुष किसी जीवकी हिंसा नहींकरता वह जिस धर्म आदि वस्तुका ध्यान करताहै अथवा जिस धर्म आदि व उत्तम कर्मको करताहै अथवा जिस परमात्म आदि वस्तु में धीरता करताहै उसी २ वस्तुके फलको विना परिश्रम प्राप्तहोताहै ४७ ॥

नाकृत्वाप्राणिनांहिंसांमांसमुत्पद्यतेक्वचित् ।
नचप्राणिवधःस्वर्ग्यस्तस्मान्मांसंविवर्जयेत् ४८ ॥

प० । न अकृत्वा प्राणिनां हिंसां मांसं उत्पद्यते क्वचित् न च प्राणिवधः स्वर्ग्यः तस्मात् मांसं विवर्जयेत् ॥

यो० । प्राणिनां हिंसां अकृत्वा क्वचित् अपि मांसं न उत्पद्यते चपुनः प्राणिवधः स्वर्ग्यः न भवति – तस्मात् मांसं विवर्जयेत् ॥

भा० । ता० । मांस भक्षणके प्रसंगसे हिंसाके गुण और दोषोंको कहकर मांसके अभक्षण को कहतेहैं कि प्राणियों की हिंसा किये विना कहीं भी मांस उत्पन्न नहीं होसक्ता और प्राणी का मारना स्वर्गका हेतु भी नहींहै तिससे मांसको सर्वथा वर्जदे ४८ ॥

समुत्पत्तिंचमांसस्यवधबन्धौचदेहिनाम् । प्रसमीक्ष्यनिवर्त्तेतसर्वमांसस्यभक्षणात् ४९॥

प० । समुत्पत्तिं च मांसस्य वधबंधौ च देहिनां प्रसमीक्ष्य निवर्त्तेत सर्वमांसस्य भक्षणात् ॥

यो० । मांसस्य समुत्पत्तिं चपुनः देहिनां वधबंधौ प्रसमीक्ष्य सर्वमांसस्य भक्षणात् निवर्त्तेत् ॥

भा० । ता० । शुक्र शोणितके मेलसे घृणाकरनेवाली प्राणियोंकी उत्पत्ति और क्रूरकर्मरूपवध (मारना) और बन्धनरूप दुःख प्राणियों के देखकर सब प्रकारके मांस भक्षणसे मनुष्य निवृत्त (हट) जाय ४९ ॥

नभक्षयतियोमांसंविधिंहित्वापिशाचवत्।सलोकेप्रियतांयातिव्याधिभिश्चनपीड्यते ५०

प० । न भक्षयति यः मांसं विधिं हित्वा पिशाचवत् सः लोके प्रियतां याति व्याधिभिः च न पीड्यते ॥

यो० । यः विधिं हित्वा पिशाचवत् मांसं न भक्षयति सः लोके प्रियतां याति चपुनः व्याधिभिः न पीड्यते (व्याधिपीडां न भुंक्ते) ॥

भा० । ता० । जो विधिको छोड़कर पिशाचके समान मांसकोनहींखाता वह जगत्का प्यारा होताहै और रोगोंसे भी पीडित नहींहोता—तिससे जगत्की प्रीति और स्वस्थता के हेतु विधिहीन मांसको भक्षण न करै ५० ॥

अनुमन्ताविशसितानिहन्ताक्रयविक्रयी।संस्कर्ताचोपहर्ताचखादकश्चेतिघातकाः ५१॥

प० । अनुमंता विशसिता निहंता क्रयविक्रयी संस्कर्ता च उपहर्ता च खादकः च इति घातकाः ॥

यो० । अनुमंता — विशसिता — निहन्ता — क्रयविक्रयी — चपुनः संस्कर्ता — चपुनः उपहर्ता चपुनः खादकः इति (इमे) घातकाः (भवंति) ॥

भा० । अनुमति का दाता—अंगोंको पृथक् पृथक् करनेवाला—मोललेने और बेचनेवाला—और पाचक—और भक्षणकरनेवाला—ये घातकहोतेहैं ५१ ॥

ता० । अनुमन्ता अर्थात् जिसकी अनुमति के विना हिंसा न करसके—और जो विशसिता अर्थात् मृतपशुके अंगोंको जो कर्तरि (छुरी) आदिसे अंगोंको पृथक् २ करै—और मांसका क्रेता (जोमोलले) और विक्रेता (जोवेचे) और संस्कर्ता (पाचक) औरखादक (जो भक्षणकरै) ये घातक (हिंसाकरनेवाले) हैं—यहांपर गोविंदराज ने तो क्रय विक्रय एक वही लिया है जो मोललेकर बेचे सो ठीकनहींहै क्योंकि इस वचनसे यमऋषि ने पृथक् २ ही कहेहैं कि मारनेसे मारनेवाला—धनसे मोललेनेवाला—और धनके ग्रहणकरनेसे बेचनेवाला और उसकी प्रवृत्तिसे पाचक—घातक—होते हैं—और इनको इससे घातककहा है कि शास्त्रोक्त विधि को छोड़कर पशु धेनु आदिकी हत्याभी न करनी और इन खादक आदिकोंको हत्याका प्रायश्चित्त भी पृथक् २ हीकहा है ५१ ॥

---

१ हननेनतथाहंता धनेनैक्रयकस्तथा । विक्रयीतुधनादानात्संस्कर्तातत्प्रवर्तनात् ॥

स्वमांसंपरमांसेनयोवर्द्धयितुमिच्छति ।
अनभ्यर्च्यपितॄन्देवांस्ततोऽन्योनास्त्यपुण्यकृत् ५२॥

प० । स्वमांसं परमांसेन यः वर्द्धयितुं इच्छति अनभ्यर्च्य पितॄन् देवान् ततः अन्यः न अस्ति अपुण्यकृत् ॥

यो० । यः पुरुषः पितॄन् देवान् अनभ्यर्च्य — परमांसेन स्वमांसं वर्द्धयितुं इच्छति ततः अन्यः अपुण्यकृत् (पापकर्ता) नास्ति ॥

भा० । ता० । जो पुरुष देवता और पितरों की पूजा (श्राद्धआदि) के विना परायेमांस से अपने मांसको बढ़ाया चाहताहै उससे अन्य पापकर्मा कोई नहीं है ५२ ॥

वर्षेवर्षेऽश्वमेधेनयोयजेतशतंसमाः । मांसानिचनखादेद्यस्तयोःपुण्यफलंसमम् ५३ ॥

प० । वर्षे वर्षे अश्वमेधेन यः यजेत शतं समाः मांसानि च न खादेत् यः तयोः पुण्यफलं समं ॥

यो० । यः वर्षे वर्षे शतंसमाः अश्वमेधेन यजेत चपुनः यः मांसानि शतंसमाः न खादेत् तयोः पुण्यफलं समं भवति ॥

भा० । ता० । अब यह कहते हैं कि मांसभक्षण की निवृत्ति धर्म के अर्थहै जो मनुष्य सौवर्ष तक वर्ष २ में अश्वमेधयज्ञकरै—और जो मनुष्य सौवर्षतक मांस भक्षण न करै उनदोनों को पुण्य का फल (स्वर्गादि) तुल्य होताहै ५३ ॥

फलमूलाशनैर्मेध्यैर्मुन्यन्नानांचभोजनैः । नतत्फलमवाप्नोतियन्मांसपरिवर्जनात् ५४ ॥

प० । फलमूलाशनैः मेध्यैः मुन्यन्नानां च भोजनैः न तत्फलं अवाप्नोति यत् मांसपरिवर्जनात् ॥

यो० । यत्फलं मांसपरिवर्जनात् अवाप्नोति तत्फलं मेध्यैः फलमूलाशनैः चपुनः मुन्यन्नानां भोजनैः न अवाप्नोति ॥

भा० । ता० । जिसफलको मांस के त्यागसे प्राप्तहै उसफलको पवित्र फल और मूल के भक्षण और मुनियों के नीवारआदि अन्नोंके भोजनसे नहींहोता—इससे मांस भक्षण को सर्वथा त्यागदे ५४ ॥

मांसभक्षयितामुत्रयस्यमांसमिहाद्म्यहम् । एतन्मांसस्यमांसत्वंप्रवदन्तिमनीषिणः ५५॥

प० । मां सः भक्षयिता अमुत्र यस्य मांसं इह अद्मि अहं एतत् मांसस्य मांसत्वं प्रवदंति मनीषिणः ॥

यो० । यस्य मांसं इह अहं अद्मि सः अमुत्र मां भक्षयिता एतत् मनीषिणः मांसस्य मांसत्वं प्रवदंति ॥

भा० । ता० । इसलोक में जिसके मांसको मैं खाताहूं वह परलोक में मुझे भक्षणकरैगा यही मांस का (मांसपदका) मांसत्व (तात्पर्यार्थ) पंडितजन कहते हैं अर्थात् मांसपद का यही अर्थहै ५५ ॥

नमांसभक्षणेदोषोनमद्येनचमैथुने । प्रवृत्तिरेषाभूतानांनिवृत्तिस्तुमहाफला ५६ ॥

प० । न मांसभक्षणे दोषः न मद्ये न च मैथुने प्रवृत्तिः एषा भूतानां निवृत्तिः तु महाफला ॥

यो० । मांसभक्षणे—मद्ये—मैथुने दोषः न अस्ति यतः एषा भूतानां प्रवृत्तिः भवति निवृत्तिः तु महाफला भवति ॥

भा० । ता० । ब्राह्मण आदि वर्णोंको शास्त्रविहित और अनिषिद्ध मांसभक्षण और मद्यपान और मैथुन में दोष नहीं है क्योंकि यह भक्षण पान मैथुन आदि में प्रवृत्ति मनुष्यों के स्वभाव सेहै किन्तु मांस भक्षण मद्यपान मैथुन की निवृत्तिका तो अत्यन्त फल है सिद्धान्त यह है कि प्रथम तो मांसको सर्वथा त्यागदे यदि रागही होयतो यज्ञ और श्राद्ध आदिमेंही इसके भक्षण को करे क्योंकि यज्ञ आदि में पुण्य के समूहमें कूप खनन न्याय से वह हत्या शास्त्र ने हत्या नहीं कही ५६ ॥

प्रेतशुद्धिंप्रवक्ष्यामिद्रव्यशुद्धिंतथैवच । चतुर्णामपिवर्णानांयथावदनुपूर्वशः ५७॥

प० । प्रेतशुद्धिं प्रवक्ष्यामि द्रव्यशुद्धिं तथा एव च चतुर्णां अपि वर्णानां यथावत् अनुपूर्वशः ॥

यो० । चतुर्णां अपि वर्णानां प्रेतशुद्धिं चपुनः तथैव द्रव्यशुद्धिं अनुपूर्वशः यथावत् प्रवक्ष्यामि ॥

भा० । ता० । चारों वर्णों की क्रम से यथार्थ प्रेत की शुद्धि और द्रव्य की शुद्धि को कहताहूं अर्थात् कितने दिन में ब्राह्मण आदिवर्ण मरण सूतक में शुद्धहोते हैं और कौन तेज आदि का द्रव्य किसप्रकार शुद्धहोता है ५७ ॥

दन्तजातेऽनुजातेचकृतचूडेचसंस्थिते । अशुद्धावान्धवाःसर्वेसूतकेचतथोच्यते ५८ ॥

प० । दन्तजाते अनुजाते च कृतचूडे च संस्थिते अशुद्धाः बान्धवाः सर्वे सूतके च तथा उच्यते ॥

यो० । दन्तजाते चपुनः अनुजाते चपुनः कृतचूडे (बाले) संस्थिते (मृते) सति चपुनः जन्मसूतके सर्वे बान्धवाः यथा अशुद्धाः भवंति तथा उच्यते ॥

भा० । ता० । जिसके दांत उत्पन्न होगये हों—और दांतों की उत्पत्ति से पीछे और चूडाकर्म से पहिले और जिसका चूडाकर्म (मुण्डन) होगयाहो—और जिसको यज्ञोपवीत होगयाहो ऐसे बालकोंकी मृत्यु होनेपर और बालकके जन्म सूतकमें सम्पूर्ण बांधव (सपिण्ड और समानोदक) जैसे अशुद्ध होतेहैं वही प्रकार हम कहते हैं ५८ ॥

दशाहंशावमाशौचंसपिण्डेषुविधीयते । अर्वाक्संचयनादस्थ्नांत्र्यहमेकाहमेवच ५९॥

प० । दशाहं शावं आशौचं सपिंडेषु विधीयते अर्वाक् संचयनात् अस्थ्नां त्र्यहं एकाहं एव च ॥

यो० । सपिंडेषु शावं आशौचं—दशाहं—अस्थ्नां संचयनात् अर्वाक् त्र्यहं—चपुनः एकाहं—विधीयते ॥

भा० । सपिंडोंकी शाव (मारने का) आशौच दशदिन अथवा अस्थिसंचयनसे पहिले तीन दिन वा एकदिन में शुद्धि होतीहै ॥

ता० । सात पीढ़ीतक सपिण्डहोते हैं मरनेके आशौच सपिंडों दश अहोरात्र ब्राह्मणको कहा है क्योंकि ब्राह्मण शुद्धि (शुद्धयेद्विप्रोदशाहेन) दशदिनमें कहेंगे और चौथेदिन अस्थिसंचयन

से पहिले तीन दिनतक ब्राह्मणको आशौच कहाहै क्योंकि इस[1] विष्णुवचन से चौथेदिन अस्थि-संचयनहोता है अथवा तीन वा एक अहोरात्र ब्राह्मणको आशौचहोता है—यह विकल्प (भेद) अग्निहोत्र और वेद और गुणकी अपेक्षा से होता है क्योंकि दक्ष[2]ने यह कहाहै कि जो ब्राह्मण अग्निहोत्र और वेद दोनोंसे युक्तहै वह एकदिन में शुद्धहोताहै और उक्त दोनोंसे हीनहै उसको शुद्धिकी हीनताहोती है अर्थात् तीन वा चार दिनमें शुद्धि होतीहै—सिद्धान्त यह है कि जो वेदोक्त अग्निहोत्री हो और मंत्र ब्राह्मणरूप सम्पूर्ण शाखा जिसने पढ़ी हो वह एकदिन में—और जो वेदोक्त अग्निहोत्र वेदपठन इनमेंसे एकगुणहीनहै वह तीनदिनमें और दोनोंसे हीनहै और स्मार्त अग्निहोत्र करताहै वहचारदिनमें और जोसब गुणोंसे रहित है वह दशदिनमें शुद्ध-होता है क्योंकि पराशर ऋषि[3] ने निर्गुण ब्राह्मण को दशदिन का आशौच कहा है ५६ ॥

सपिण्डतानुपुरुषेसप्तमेविनिवर्तते । समानोदकभावस्तुजन्मनाम्नोरवेदने ६० ॥

प० । सपिंडता तु पुरुषे सप्तमे विनिवर्तते समानोदकभावः तु जन्मनाम्नोः अवेदने ॥

यो० । सप्तमे पुरुषे सपिंडता—तुपुनः जन्मनाम्नोः अवेदने समानोदकभावः—विनिवर्तते ॥

भा० । सातवी पीढ़ीमें सपिंडता—और जन्म और नामके अज्ञानमें समानोदकभाव निवृत्त होजाता है और मूल पुरुष के जन्म व नाम दोनोंकी जब प्रतीति न रहै तब ॥

ता० । सपिंड का लक्षण कहते हैं जिसके मरण वा जन्मसूतक का निर्णय कर्तव्यहो उसके पिता पितामहआदि छःपुरुषोंके पीछे सपिंडता (पिंडकासम्बन्ध) निवृत्तहोजातीहै—और इसी प्रकार पुत्र पौत्रआदिमें भी जाननी—और यह सपिंडता पिंडसम्बन्धसे होनीहै कि पिता—पिता-मह—प्रपितामह ये तीन पिंडके भागी हैं और प्रपितामहके पिताआदि तीन लेपभाग के भोक्ता होते हैं इन छः से पहिलेको पिंडकासम्बन्ध नहीं है इससे वह सपिंड नहींकहाता—और जिसके ये छः पुरुष हैं वहभी पिंडकेदेने से सपिंडहै इससे देनेवाले समेत ये सातसपिंड होते हैं क्योंकि मत्स्यपुराण में[4] यहकहाहै कि चौथेपुरुष आदि तीन लेपभागभुज और पिताआदि तीन पिंड के भागी—और सातवां इनके पिंडकादाता—यह सातपीढ़ीतक सापिंड्यहोताहै—और यह सपिंड-ताभी सगोत्रोमेंहै क्योंकि शंख और लिखितने[5] यहकहाहै कि सातपुरुषतक सपिंडता गोत्रसे (एकगोत्रमेंहै) है—इससे मातामहआदि तीनोंको एक पिंडका सम्बन्धभी है तथापि सगोत्र के अभाव से सपिंडता नहींहोती—और समानोदक भाव तो तब निवृत्तहोता है कि जब यह ज्ञान न रहै कि हमारेकुलमें अमुक समय में अमुकनाम का मनुष्यहुआ ६० ॥

यथेदंशावमाशौचंसपिण्डेषुविधीयते । जननेऽप्येवमेवस्यान्निपुणंशुद्धिमिच्छताम् ६१॥

प० । यथा इदं शावं आशौचं सपिंडेषु विधीयते जनने अपि एवं एव स्यात् निपुणं शुद्धिं इच्छताम् ॥

---

१ चतुर्थेदिवसेस्थिसंचयनं कुर्यात् ॥

२ एकाहाच्छुद्ध्यतेविप्रो योग्निवेदसमन्वितः हीनेहीनेभवेच्चैव त्र्यहश्चतुरहस्तथा ॥

३ निर्गुणो दशभिर्दिनैः ॥

४ लेपभाजश्चतुर्थाद्याः पित्राद्याः पिण्डभागिनः पिण्डदः सप्तमस्तेषां सापिंड्यं साप्तपौरुषं ॥

५ सपिण्डतानु सर्वेषां गोत्रतः साप्तपौरुषी ॥

यो० । इदं शावं आशौचं सपिंडेषु यथा विधीयते—निपुणां शुद्धिं इच्छतां पुरुषाणां एवं एव जनने अपि एवं एव स्यात् ॥

भा० । ता० । जैसा यह शाव (मरने का) आशौच दशाह आदिका सपिण्डों को कहाहै इसी प्रकार जनमें भी निपुण (पूरी २) शुद्धि इच्छा करनेवाले पुरुषों को आशौच होताहै ६१ ॥

सर्वेषांशावमाशौचंमातापित्रोस्तुसूतकम् । सूतकंमातुरेवस्यादुपस्पृश्यपिताशुचिः ६२॥

प० । सर्वेषां शावं आशौचं मातापित्रोः तु सूतकं सूतकं मातुः एव स्यात् उपस्पृश्य पिता शुचिः ॥

यो० । शावं आशौचं सर्वेषां (भवति) सूतकं तु मातापित्रोः एवभवति—तयोर्मध्ये अपि मातुः एवस्यात्—पिता उपस्पृश्य (स्नात्वा) शुचिः भवति ॥

भा० । ता० । सबको तुल्य आशौच पाया इससे विशेषता कहतेहैं कि—मरनेका आशौच सब सपिण्डों को समान होताहै और जन्म निमित्तक आशौच तो माता और पिताकोही होता है और तिन दोनोंमें भी दशदिन का सूतक माताकोही होताहै और पिता तो स्नान के अनन्तर स्पर्शके योग्य होजाता है यही प्रकार संवर्त्तऋषिने[1] प्रकट कियाहै कि पुत्रहोनेपर पिता सचैल स्नानकरै माता दशदिनमें शुद्धहोती है पिता तो स्नान करके स्पर्श करनेके योग्य होताहै ६२ ॥

निरस्यतुपुमान्शुक्रमुपस्पृश्यैवशुध्यति । बैजिकादभिसंबन्धादनुरुन्ध्यादघंत्र्यहम् ६३॥

प० । निरस्य तु पुमान् शुक्रं उपस्पृश्य एव शुध्यति बैजिकात् अभिसम्बन्धात् अनुरुन्ध्यात् अघं त्र्यहम् ॥

यो० । पुमान् शुक्रं निरस्य उपस्पृश्य एव शुध्यति—बैजिकात् अभिसम्बन्धात् त्र्यहं अघं अनुरुन्ध्यात् ॥

भा० । पुरुष स्वप्नमें वीर्य आदिको सींचकर स्नानसे—और परस्त्री में संतानको पैदाकरके तीन दिनमें—शुद्धहोताहै ॥

ता० । मैथुनके कर्ताको (स्नानंमैथुनिनःस्मृतं) इस वचनमें स्नानकहेंगे तिससे मैथुनके विना यदि स्वप्न आदिमें ज्ञानसे वीर्यका स्खलन (निकसना) होजाय तो स्नानकरनेसे मनुष्य होताहै और यदि अज्ञानसे स्वप्न आदिमें वीर्यका पात होजाय तो—वीर्यके पातमें मूत्रके समान जल स्पर्श आदिसे शुद्धिहोतीहै इस आपस्तम्बके[2] वचनानुसार गृहस्थीकी शुद्धिहोतीहै और ब्रह्मचारीका तो अकामसे भी यदि स्वप्नमें रेत (वीर्य) का पात होजाय तो स्नानसे शुद्धि (स्वप्नेसिक्त्वा ब्रह्मचारी) इस वचनसे कहीहै और पराई स्त्रीमें बैजिक (संतानकी उत्पत्तिकरने वाला) सम्बन्धहोजाय तो तीन दिनतक आशौच होताहै क्योंकि विष्णुने[3] त्रिरात्रही कहाहै यह वीर्यपातका आशौच जन्माशौचके प्रकरणमें प्रसंगसे कहाहै अर्थात् जहां वीर्यपातमें स्नान है वहां अपत्य की उत्पत्तिसे तीन रात्र आशौच उचित है ६३ ॥

---

१ जाते पुत्रे पितुः स्नानं सचैलंतु विधीयते माता शुध्येद्दशाहेन स्नानात्तुस्पर्शनंपितुः ॥
२ मूत्रवद्रेतस उत्सर्गे ॥
३ परपूर्वभार्यासुत्रिरात्रम् ॥

अह्ना चैकेन रात्र्या च त्रिरात्रैरेव च त्रिभिः । शवस्पृशो विशुध्यन्ति त्र्यहादुदकदायिनः ६४ ॥

प० । अह्ना च एकेन रात्र्या च त्रिरात्रैः एव च त्रिभिः शवस्पृशः विशुध्यंति त्र्यहात् उदक-दायिनः ॥

यो० । एकेन अह्ना — एकया रात्र्या — (अहोरात्रेण) त्रिभिः त्रिरात्रैः (नवाहोरात्रैः) मिलित्वा दशाहेन शवस्पृशः विशुध्यंति — उदकदायिनः त्र्यहात् विशुध्यंति ॥

भा० । शवके स्पर्श करनेवाले दशदिनमें और समानोदक तीनदिनमें शुद्धहोते हैं ॥

ता० । एकदिन और एकरात्र अर्थात् एक अहोरात्र और तीन त्रिरात्र अर्थात् नव अहोरात्र सबमिलकर दशदिन हुये अर्थात् दशदिनमें शवके स्पर्शकरनेवाले शुद्धहोतेहैं—यद्यपि यहांपर दशाहेन यहीकहना उचित था यह वाणीका विस्तार वृथा प्रतीतनहोताहै तथापि पंडितजो बड़ी अथवा छोटी वाणीसे शास्त्रको रचतेहैं उनको यह नियम नहीं कोई करासक्ता कि लघु वाणीसे ही शास्त्रको रचाकरैं तात्पर्य यहहै जो सपिंड सदाचार और स्वाध्याय गुणवाले होनेसे एकदिन के आशौचके योग्यहैं वे यदि स्नेह वशसे शव (मुर्दे) का स्पर्शकरलें तो दशदिनमें शुद्धहोतेहैं और जिनको जलदेनेका अधिकारहै वे समानोदक तीनदिनमें शुद्धहोतेहैं—गोविंदराज तो यह कहतेहैं कि जो ब्राह्मण धनके लोभसे शवका स्पर्शकरतेहैं वे दशदिनमें शुद्धहोतेहैं ६४ ॥

गुरोः प्रेतस्य शिष्यस्तु पितृमेधं समाचरन् । प्रेतहारैः समं तत्र दशरात्रेण शुध्यति ६५ ॥

यो० । राजा उपजप्यान् उपजपेत—चपुनः तत्कृतं बुध्येत एव— चपुनः जयप्रेप्सुः अपेतभीः राजा दैवे युक्तेसति युध्येत ॥

भा० । ता० । उपजाप (भेद) करनेके योग्य शत्रु वंशके राज्याभिलाषी और मंत्री आदि का भेद (फोड़ना) करै—और भिन्न कियेहुये उन मंत्रियोंकी चेष्टाको अवश्यजाने कि ये मेरे अनुकूल चल रहे हैं अथवा अपने स्वामीके—और जयका अभिलाषी राजा—शुभ ग्रहकी दशा आदि से शुभ दैव (अच्छा मुहूर्त) में निडरहोकर युद्धकरै १९७ ॥

साम्नादानेनभेदेनसमस्तैरथवापृथक् । विजेतुंप्रयतेतारीन्नयुद्धेनकदाचन १९८ ॥

प० । साम्ना दानेन भेदेन समस्तैः अथवा पृथक् विजेतुं प्रयतेत अरीन् न युद्धेन कदाचन ॥

यो० । साम्ना दानेन भेदेन—समस्तैः अथवा पृथक् अरीन् विजेतुं राजा प्रयतेत—युद्धेन विजेतुं कदाचन न प्रयतेत ॥

भा० । ता० । प्रीति—आदर सत्कार दिखाने—हित कहने आदि रूप शांतिसे—अथवा हाथी अश्व रथ द्रव्य आदिके देनेसे—और राजाकी प्रजा और राजाके अनुयायी जो राज्यके अभिलाषी उनके भेदसे—और ये साम आदि सबहों चाहे एक२ हो—ही शत्रुओंके जीतनेका यत्नकरै और युद्धसे जीतनेकी इच्छा कभी भी न करै १९८ ॥

अनित्योविजयोयस्माद्दृश्यतेयुध्यमानयोः । पराजयश्चसंग्रामेतस्माद्युद्धंविवर्जयेत् १९९

प० । अनित्यः विजयः यस्मात् दृश्यते युध्यमानयोः पराजयः च संग्रामे तस्मात् युद्धं विवर्जयेत् ॥

यो० । यस्मात् संग्रामे युद्ध्यमानयोः राज्ञोः विजयः चपुनः पराजयः अनित्यः दृश्यते तस्मात् राजायुद्धं विवर्जयेत् ॥

भा० । ता० । जिससे संग्राम युद्धकरनेहुये दोनों राजाओंका विजय और पराजय अनित्य दीखताहै क्योंकि कभी दैवगति अल्पसेनाके स्वामीका विजय और अधिक सेना के स्वामी का पराजय होजाताहै तिससे राजा यदि अन्य सामआदि उपायोंसे कार्यबने तो युद्धको विशेषकर वर्जदे १९९ ॥

त्रयाणामप्युपायानांपूर्वोक्तानामसम्भवे । तथायुद्ध्येतसंपन्नोविजयेतरिपून्यथा २०० ॥

प० । त्रयाणां अपि उपायानां पूर्वोक्तानां असंभवे तथा युद्ध्येत संपन्नः विजयेत रिपून् यथा ॥

यो० । पूर्वोक्तानां त्रयाणां अपि उपायानां असंभवे सति संपन्नः राजा तथा युद्ध्येत यथा रिपून् विजयेत ॥

भा० । यदि पूर्वोक्त तीनों उपाय असंभवहोयँ तो–यत्नवाला राजा तिसप्रकार युद्धकरै जैसे शत्रुओंका विजयकरै ॥

ता० । यदि पूर्वोक्त तीनों (साम दाम भेद) उपायोंका असंभवहो (न बनसकें) यतो जय पराजय के सन्देह में भी सम्पन्नहुआ (बड़ेयत्नसे) उसप्रकारसे सावधान होकर युद्धकरै जिस प्रकार शत्रुओंकाविजयकरै क्योंकि जयमें धनकालाभ और सन्मुख मरनेपर स्वर्गकी प्राप्तिहोती है–और जो शत्रु के पराजय निश्चय से सन्देहहोय तो युद्धमें से भाग जानाही श्रेष्ठ है क्योंकि आगे मनुजीही कहेंगे कि अपने आत्मा की सदैव रक्षाकरनी–यह गोविंदराज और मेधातिथि कहतेहैं परंतु यह नरकका साधनहोनेसे अनुचितहै २०० ॥

जित्वासंपूजयेद्देवान्ब्राह्मणांश्चैवधार्मिकान्।प्रदद्यात्परिहारांश्चख्यापयेदभयानिच २०१

प० । जित्वा संपूजयेत् देवान् ब्राह्मणान् च एव धार्मिकान् प्रदद्यात् परिहारान् च ख्यापयेत् अभयानि च ॥

यो० । राजा – जित्वा देवान् चपुनः धार्मिकान् ब्राह्मणान् पूजयेत् – चपुनः परिहारान् (पारितोषिकान्) प्रदद्यात् – चपुनः अभयानि ख्यापयेत् ॥

भा० । राजा जीतकर देवता और धार्मिक ब्राह्मणोंकापूजनकरै और परिहारों को दे और सबको अभय विदित करै ॥

ता० । शत्रुके देशका पराजयकरके राजा वहां जो देवताहों उनका और धार्मिक ब्राह्मणोंका सुवर्णआदि का दान और संमानआदि से पूजनकरै और यह पूजन भी इस याज्ञवल्क्य के वचनानुसार उसीद्रव्य के एकभागमेंसे करै जो शत्रुके पराजयसे मिलाहो कि जयसे संचयकिये हुये द्रव्यको ब्राह्मणोंकोदेने और प्रजाको अभयदानसे अधिक और राजाओंका उत्तमधर्म नहीं है और उस देश के निवासियोंको ये परिहार (पारितोषिक) दे कि मैंने देवता और ब्राह्मणों के लिये इतनाद्रव्य दियाहै और यह अभय उसदेश में विदितकरै कि अपने स्वामीकी भक्तिसे जिनमनुष्योंने हमारा अपकार (अपमान) कियाहै वह अपराध हमने क्षमाकिया अब वे सब निर्भयहुये अपने २ व्यापार को करैं २०१ ॥

१ नातःपरतरोधर्मोनृपाणांयद्रणार्जितम् विप्रेभ्योदीयतेद्रव्यं प्रजाभ्यश्चाभयंसदा ॥

सर्वेषांतुविदित्वैषांसमासेनचिकीर्षितम् । स्थापयेत्तत्रतद्वंश्यंकुर्याच्चससमक्रियाम् २०२

प० । सर्वेषां तु विदित्वा एषां समासेन चिकीर्षितम् स्थापयेत् तत्र तद्वंश्य कुर्यात् च सः समक्रियाम् ॥

यो० । एषां सर्वेषां समासेन चिकीर्षितं विदित्वा सः (राजा) तत्र (राजसिंहासने) तद्वंश्यं स्थापयेत् — चपुनः समक्रियां (नियमं) कुर्यात् ॥

भा० । ता० । इन सब (शत्रु और उसके मंत्री) के अभिप्राय (कर्त्तव्य) को संक्षेपसे जानकर—राजसिंहासनपर उसीराजा के वंश के किसी मनुष्यका अभिषेककरे और यह नियमकरदे तुम यहकरियो और यह मतकरियो २०२ ॥

प्रमाणानिचकुर्वीततेषांधर्म्यान्यथोदितान् । रत्नैश्चपूजयेदेनंप्रधानपुरुषैःसह २०३ ॥

प० । प्रमाणानि च कुर्वीत तेषां धर्म्यान् यथोदितान् रत्नैः च पूजयेत् एनं प्रधानपुरुषैः सह ॥

यो० । तेषां धर्म्यान् यथोदितान् प्रमाणानि कुर्वीत — चपुनः प्रधानपुरुषैः सह एनं (राजानं) रत्नैः पूजयेत् ॥

भा० । ता० । और शत्रु के देश के मनुष्यों के धर्मके अनुकूल और शास्त्रोक्त आचरणों को प्रमाणकरादे—और अभिषेक किये मुख्य २ मंत्रियों समेत इस राजा का रत्नआदि के दान से पूजनकरै २०३ ॥

आदानमप्रियकरंदानंचप्रियकारकम् । अभीप्सितानामर्थानांकालेयुक्तंप्रशस्यते २०४

प० । आदानं अप्रियकरम् दानं च प्रियकारकम् अभीप्सितानां अर्थानां काले युक्तं प्रशस्यते ॥

यो० । अभीप्सितानां — अर्थानां अप्रियकरं आदानं चपुनः प्रियकरं दानं कालेयुक्तं बुधैः प्रशस्यते ॥

भा० । ता० । अपनेको वाञ्छित द्रव्योंका आदान अप्रसन्नता और दान प्रसन्नताका कारण होताहै परंतु समय २ परही आदान और दानकी पंडितजन प्रशंसाकरतेहैं—इससे जयके अनंतर उस शत्रु राजाकी अवश्य पूजाकरै २०४ ॥

सर्वकर्मेदमायत्तंविधानेदैवमानुषे । तयोर्दैवमचिन्त्यंतुमानुषेविद्यतेक्रिया २०५ ॥

प० । सर्वं कर्म इदं आयत्तं विधाने दैवमानुषे तयोः दैवं अचिन्त्यं तु मानुषे विद्यते क्रिया ॥

यो० । सर्वं इदं कर्म दैव मानुषविधाने आयत्तं अस्ति — तयोः (दैवमानुषविधानयोः) दैवं अचिंत्यं भवति — मानुषे क्रिया विद्यते (अस्ति) ॥

भा० । ता० । संपूर्ण यह कर्म (मनुष्य का कर्तव्य) दैव और मानुष कर्म की विधिके आधीन है और पूर्व जन्म के पुण्य और पापको दैव कहतेहैं और मनुष्य के व्यापार को मानुष कर्म कहतेहैं—तिन दोनों दैव और मानुष विधियोंमें दैव तो जानने के अयोग्यहै और मनुष्य कर्म के जानने की तो क्रिया होसक्तीहै—इससे राजा मनुष्य के कर्मानुसारही यत्नकरै २०५ ॥

सहवापिव्रजेद्युक्तःसंधिंकृत्वाप्रयत्नतः । मित्रंहिरण्यंभूमिंवासंपश्यंस्त्रिविधंफलम्२०६॥

प० । सह वा अपि व्रजेत् युक्तः संधिं कृत्वा प्रयत्नतः मित्रं हिरण्यं भूमिं वा संपश्यन् त्रिविधं फलम् ॥

यो० । युक्तः राजा प्रयत्नतः संधिं कृत्वा-मित्रं — हिरण्यं- वा भूमिं — एतत् त्रिविधं फलं संपश्यन्सन् सहएव व्रजेत् (गच्छेत्) ॥

भा० । ता० । पूर्वोक्त प्रकारसे शत्रुके संग युद्धकरै—अथवा उस शत्रुकोही मित्रता वा उसकी दीहुई द्रव्य और भूमिकी प्राप्ति इस तीन प्रकार के फलको देखता हुआ राजा उसके संग संधि (मित्रता) करके यत्नसे गमन करै २०६ ॥

पार्ष्णिग्राहंचसंप्रेक्ष्यतथाक्रन्दंचमण्डले।मित्रादथाप्यमित्राद्वायात्राफलमवाप्नुयात् २०७

प० । पार्ष्णिग्राहं चँ संप्रेक्ष्यँ तथाँ आक्रंदं चँ मंडले मित्रात् अथँ अँपि अमित्रात् वाँ यात्रा-फलं अवाप्नुयात् ॥

यो० । पार्ष्णिग्राहं तथा मंडले आक्रंदं संप्रेक्ष्य (दृष्ट्वा) मित्रात् अथ अपि अमित्रात् वा यात्राफलं राजा अवाप्नुयात् (गृह्णीयात) ॥

भा० । पार्ष्णिग्राह और मंडलमें आक्रंद इन दोनोंको देखकर यात्राकरै और मित्र अथवा शत्रुसे यात्राके फलको ग्रहणकरै (ले) ॥

ता० । शत्रुके सन्मुख गमन करनेवाले विजिगीषु राजाका जो पृष्ठवर्ती (पीठपर रहनेवाला) जो राजा देशपर चढ़ाईकरनाचाहे उसे पार्ष्णिग्राहकहतेहैं और उसका नियामक (प्रेरक) जोराजा वह आक्रंदहोताहै इन दोनोंको मंडलमें भलीप्रकार देखकर राजा गमनकरै और अपनी यात्राके फल (प्रयोजन) को मित्रसे अथवा शत्रुसे ग्रहणकरै अर्थात् यात्राके फल लेनेमें शत्रु वा मित्रको न देखे—इस प्रकार करनेवाला राजा दोषका भागी नहींहोता २०७ ॥

हिरण्यभूमिसंप्राप्त्यापार्थिवोनतथैधते। यथामित्रंध्रुवंलब्ध्वाकृशमप्यायतिक्षमम् २०८

प० । हिरण्यभूमिसंप्राप्त्याँ पार्थिवः नँ तथाँ एधैते यथाँ मित्रं ध्रुवं लब्ध्वाँ कृशं अँपि आयति-क्षमम् ॥

यो० । पार्थिवः हिरण्यभूमिसंप्राप्त्या तथा न एधते — यथा ध्रुवं आयतिक्षमं कृशं अपि मित्रं लब्ध्वा एधते ॥

भा० । ता० । सुवर्ण और पृथ्वीके लाभहोनेपर राजा उस प्रकार वृद्धिको प्राप्त नहींहोताहै—जिस प्रकार ऐसे मित्रके मिलनेपर होताहै कि जो संप्रति कृश (अल्पबल) भी हो और आगामी समयमें बढ़ने वाला हो और जो निश्चलहो अर्थात् मित्रतासे चलायमान न हो २०८ ॥

धर्मज्ञंचकृतज्ञंचतुष्टप्रकृतिमेवच । अनुरक्तंस्थिरारम्भंलघुमित्रंप्रशस्यते २०९ ॥

प० । धर्मज्ञं चँ कृतज्ञं चँ तुष्टप्रकृतिं एवँ चँ अनुरक्तं स्थिरारंभं लघुं मित्रं प्रशस्यते ॥

यो० । धर्मज्ञं — कृतज्ञं — चपुनः तुष्टप्रकृतिं — अनुरक्तं — स्थिरारंभ — लघु — मित्रं — प्रशस्यते ॥

भा० । ता० । धर्मका और कियेहुये उपकारका ज्ञाता (जाननेवाला) और सदैवप्रसन्न—और अपनेमें प्रीतिवाला—और जिसके कार्योंका प्रारंभ स्थिरहो—ऐसा मित्र चाहे लघु (तुच्छ) भी हो तो भी उत्तम होताहै २०९ ॥

प्राज्ञंकुलीनंशूरंचदक्षंदातारमेवच । कृतज्ञंधृतिमन्तंचकष्टमाहुररिंबुधाः २१० ॥

प० । प्राज्ञं कुलीनं शूरं चँ दक्षं दातारं एवँ चँ कृतज्ञं धृतिमंतं चँ कष्टं आहुः अरिं बुधाः ॥

यो० । प्राज्ञं — कुलीनं — शूरं दक्षं चपुनः दातारं — कृतज्ञं चपुनः धृतिमंतं — आरिं बुधाः कष्टं आहुः ॥

भा० । ता० । ऐसे शत्रुको पंडितजन कष्ट (जीतनेके अयोग्य) कहतेहैं कि जो पंडित (विद्वान्)हो. कुलीन—शूरवीर—चतुर—दाता—उपकारोंका ज्ञाता—और सुख और दुःखमें धीरहो २१० ॥

आर्यतापुरुषज्ञानंशौर्यंकरुणवेदिता । स्थौललक्ष्यंचसततमुदासीनगुणोदयः २११ ॥

प० । आर्यता पुरुषज्ञानं शौर्यं करुणवेदिता स्थौललक्ष्यं च सततं उदासीनगुणोदयः ॥

यो० । आर्यता — पुरुषज्ञानं शौर्यं करुणवेदिता — चपुनः सततं स्थौललक्ष्यं—एषः उदासीनगुणोदयः (अस्ति) ॥

भा० । साधु—पुरुष विशेषका ज्ञान—पराक्रमी—दयालु—बहुत दाता—ये उदासीन राजाके गुण हैं—ऐसे उदासीन राजाके आश्रयसे विद्वान् आदि शत्रुके संग भी युद्धकरे ॥

ता० । साधुता (श्रेष्ठ मनुष्य होना) और पुरुष विशेषकी पहचान—और पराक्रमी—और कृपालुता और सदैव स्थूललक्ष्यहोना अर्थात् बहुत देना अथवा स्थूललक्ष्य उसेकहतेहैं जो अपने प्रयोजनमें सक्ष्म विचार न करना यह मेधातिथि और गोविंदराजका अर्थ ठीक नहींहै—ये उदासीनके गुणोंकी सामग्रीहैं—तिससे ऐसे उदासीन राजाके आश्रयसे—पंडित आदि शत्रुके संग भी युद्धकरे २११ ॥

क्षेम्यांसस्यप्रदांनित्यंपशुवृद्धिकरीमपि । परित्यजेन्नृपोभूमिमात्मार्थमविचारयन् २१२ ॥

प० । क्षेम्यां सस्यप्रदां नित्यं पशुवृद्धिकरीं अपि परित्यजेत् नृपः भूमिं आत्मार्थं अविचारयन् ॥

यो० । क्षेम्यां — नित्यं सस्यप्रदां — पशुवृद्धिकरीं अपि भूमिं नृपः अविचारयन् सन् आत्मार्थं परित्यजेत् ॥

भा० । ता० । आरोग्यआदि कल्याणके योग्य और जलआदिकी अनुकूलतासे सदैव सस्य (घास अन्न) आदिकी देनेवाली और अतएव पशुओंकी बढ़ानेवाली भी—भूमिको राजा पूर्वापर विचारको छोड़कर अपनी रक्षाकेलिये छोड़दे अर्थात् अपनी रक्षाको मुख्यसमझे २१२ ॥

आपदर्थंधनंरक्षेद्दारान्रक्षेद्धनैरपि । आत्मानंसततंरक्षेद्दारैरपिधनैरपि २१३ ॥

प० । आपदर्थं धनं रक्षेत् दारान् रक्षेत् धनैः अपि आत्मानं सततं रक्षेत् दारैः अपि धनैः अपि ॥

यो० । आपदर्थं धनंरक्षेत् — धनैः अपि दारान् रक्षेत् — दारैः धनैः अपि आत्मानं सततं रक्षेत् ॥

भा० । ता० । मनुष्य आपत्ति (दुःख) की निवृत्तिकेलिये धनकी और धनोंसे अर्थात् धनके व्ययसे दारा (स्त्रियों) ओंकी—और स्त्री और धन इनको भी त्यागकर अपने आत्माकी निरंतर रक्षाकरे अर्थात् सबसे अधिक अपने देहकी रक्षाकरे क्योंकि इसश्रुति[1] में देहकीरक्षा सबसे कर्त्तव्य है २१३ ॥

सहसर्वाःसमुत्पन्नाःप्रसमीक्ष्यापदोभृशम् । संयुक्तांश्चवियुक्तांश्चसर्वोपायान्सृजेद्बुधः २१४

प० । सह सर्वाः समुत्पन्नाः प्रसमीक्ष्य आपदः भृशम् संयुक्तान् च वियुक्तान् च सर्वोपायान् सृजेत् बुधः ॥

यो० । सर्वाः आपदः सह समुत्पन्नाः भृशं प्रसमीक्ष्य — संयुक्तान् चपुनः वियुक्तान् सर्वोपायान् बुधः सृजेत ॥

---

१ सर्वत एवात्मानं गोपायीत ॥

भा० ता० । संपूर्ण (कोशकाक्षय–प्रकृतिकाकोप मित्रको दुःखआदि) अत्यन्त आपत्तियों को एकसमयमेंही पैदाहुई देखकर–इकट्ठे और पृथक् २ संपूर्ण उपायोंको शास्त्रके जाननेवाला पुरुष करे २१४ ॥

उपेतारमुपेयंचसर्वोपायांश्चकृत्स्नशः । एतत्त्रयंसमाश्रित्यप्रयतेतार्थसिद्धये २१५ ॥

प० । उपेतारं उपेयं च सर्वोपायान् च कृत्स्नशः एतत् त्रयं समाश्रित्य प्रयतेत अर्थसिद्धये ॥

यो० । उपेतारं (आत्मानं) चपुनः उपेयं (प्राप्तव्यं)– चपुनः कृत्स्नशः सर्वोपायान् (सामादीन्) एतत्त्रयं (उपेत्रादि) समाश्रित्य अर्थसिद्धये राजा प्रयतेत ॥

भा० । ता० । अपनी आत्मा और प्राप्तहोने योग्य (शत्रु)–और सामआदि संपूर्ण उपाय इनतीनोंका आश्रय लेकर अर्थात् तीनोंको यथार्थ विचारकर प्रयोजन सिद्धि के लिये राजा यत्नकरे २१५ ॥

एवंसर्वमिदंराजासहसंमन्त्र्यमन्त्रिभिः।व्यायम्याप्लुत्यमध्याह्नेभोक्तुमन्तःपुरंविशेत् २१६

प० । एवं सर्वं इदं राजा सह संमंत्र्य मंत्रिभिः व्यायम्य आप्लुत्य मध्याह्ने भोक्तुं अन्तःपुरं विशेत् ॥

यो० । एवं इदं सर्वं (राजवृत्तं) मंत्रिभिः सह राजा संमंत्र्य व्यायम्य चपुनः मध्याह्ने आप्लुत्य भोक्तुं अंतःपुरं विशेत् ॥

भा० । ता० । इस उक्तप्रकारसे संपूर्ण राज्यके वृत्तांतको मंत्रियोंके संग विचारकर और आयुधआदिके अभ्याससे व्यायाम करके और मध्याह्नमें स्नानआदि नित्यकर्मोंको करके भोजन करने के लिये अन्तःपुर (रनिवास) में प्रवेशकरे २१६ ॥

तत्रात्मभूतैःकालज्ञैरहार्यैःपरिचारकैः । सुपरीक्षितमन्नाद्यमद्यान्मन्त्रैर्विषापहैः २१७॥

प० । तत्र आत्मभूतैः कालज्ञैः अहार्यैः परिचारकैः सुपरीक्षितं अन्नाद्यं अद्यात् मंत्रैः विषापहैः॥

यो० । तत्र (अन्तःपुरे) आत्मभूतैः कालज्ञैः अहार्यैः परिचारकैः सुपरीक्षितं अन्नाद्यं विषापहैः मंत्रैः राजा अद्यात् (भक्षयेत्)॥

भा० । ता० । उस रनिवास में राजा जाकर अपनेसमान और भोजनके समयके ज्ञाता और अव्यभिचारी जो सूपकार (रसोइया) आदिकोंने भलीप्रकारसेही परीक्षा जिसकी अर्थात् चकोरआदि के दिखानेसे निर्विष अन्नका निश्चय करके क्योंकि विषसहित अन्नके देखनेसे चकोरके नेत्र रक्त होजातेहैं–ऐसे अन्नको विषसे दूरकरनेवाले मंत्रों से अन्नको अभिमंत्रित करके अन्नका भोजन करे २१७ ॥

विषघ्नैरगदैश्चास्यसर्वद्रव्याणियोजयेत् । विषघ्नानिचरत्नानिनियतोधारयेत्सदा २१८

प० । विषघ्नैः अगदैः च अस्य सर्वद्रव्याणि योजयेत् विषघ्नानि च रत्नानि नियतः धारयेत् सदा ॥

यो० । अस्य राज्ञः सर्वद्रव्याणि (भोज्यानि) विषघ्नैः अगदैः योजयेत – चपुनः विषघ्नानि रत्नानि नियतःसन् राजा सदा धारयेत् ॥

भा० । ता० । विषके नष्टकरनेवाली ओषधियोंसे इस राजाके खाने योग्य सब पदार्थों को युक्त करै–और राजा विषके नष्टकरनेवाले संपूर्ण रत्नोंको सदैव धारणकरै २१८ ॥

परीक्षिताःस्त्रियश्चैनंव्यजनोदकधूपनैः । वेषाभरणसंशुद्धाःस्पृशेयुःसुसमाहिताः२१९॥

प० । परीक्षिताः स्त्रियः च एनं व्यजनोदकधूपनैः वेषाभरणसंशुद्धाः स्पृशेयुः सुसमाहिताः ॥

यो० । चपुनः एनं (राजानं) परीक्षिताः वेषाभरणसंशुद्धाः सुसमाहिताः स्त्रियः व्यजनोदकधूपनैः स्पृशेयुः (परिचरेयुः) ॥

भा० । ता० । गुप्त दूतोंके द्वारा की है परीक्षा जिनकी और गुप्त शस्त्र और विषसे लिये हुये भूषणकी शंकासे अर्पण कियेहैं वेष और भूषण जिन्होंने और सावधानहै मन जिनका ऐसी स्त्री व्यजन (चवँर) और जल (स्नान आदिमें) और धूप आदिसे इस राजा की परिचर्या (सेवा) करै २१६ ॥

एवंप्रयत्नंकुर्वीतयानशय्यासनाशने । स्नानेप्रसाधनेचैवसर्वालंकारकेषुच २२० ॥

प० । एवं प्रयत्नं कुर्वीत यानशय्यासनाशने स्नाने प्रसाधने च एव सर्वालंकारकेषु च ॥

यो० । यान शय्यासनाशने – स्नाने चपुनः प्रसाधने चपुनः सर्वालंकारकेषु – राजा एवं प्रयत्नं कुर्वीत ॥

भा० । ता० । इसी प्रकार परीक्षा आदिके प्रयत्नको राजा–गमन–शय्या–आसन–भोजन–स्नान–अनुलेपन (चंदन आदिसे) और संपूर्ण अलंकार आदिकोंमें भी–करै २२० ॥

भुक्तवान्विहरेच्चैवस्त्रीभिरन्तःपुरेसह । विहृत्यतुयथाकालंपुनःकार्याणिचिन्तयेत्२२१॥

प० । भुक्तवान् विहरेत् च एव स्त्रीभिः अंतःपुरे सह विहृत्य तु यथाकालं पुनः कार्याणि चिंतयेत् ॥

यो० । भुक्तवान् राजा स्त्रीभिःसह अंतः पुरे विहरेत् – तपुनः यथाकालं विहृत्य पुनः कार्याणि चिंतयेत् ॥

भा० । ता० । कियाहै भोजन जिसने ऐसा राजा रनिवासमें स्त्रियोंके संग विहारकरै और यथाकाल (दिनके सप्तम७भागमें) वहांपर विहारको करके दिनके अष्टम भागमें फिर अपने कार्योंकी चिंताकरै २२१ ॥

अलंकृतश्चसंपश्येदायुधीयंपुनर्जनम् । वाहनानिचसर्वाणिशस्त्राण्याभरणानिच२२२॥

प० । अलंकृतः च संपश्येत् आयुधीयं पुनः जनम् वाहनानि च सर्वाणि शस्त्राणि आभरणानि च ॥

यो० । पुनः अलंकृतः राजा चपुनः आयुधीयंजनं – चपुनः सर्वाणि वाहनानि – चपुनः शस्त्राणि आभरणानि – संपश्यत् ॥

भा० । ता० । फिर राजा–अलंकृत (शोभित) होकर आयुधसे जीनेवाले जन और संपूर्ण वाहन (सवारी) और शस्त्र और भूषण इन सबका अवलोकनकरै (देखै) २२२ ॥

संध्यांचोपास्यशृणुयादन्तर्वेश्मनिशस्त्रभृत् ।
रहस्याख्यायिनांचैवप्रणिधीनांचचेष्टितम् २२३ ॥
गत्वाकक्षान्तरंत्वन्यत्समनुज्ञाप्यतंजनम्।प्रविशेद्भोजनार्थंचस्त्रीवृतोऽन्तःपुरंपुनः २२४

प० । संध्यां च उपास्य शृणुयात् अंतर्वेश्मनि शस्त्रभृत् रहस्याख्यायिनां च एवं प्रणिधीनां च चेष्टितम् ॥

प० । गत्वा कक्षांतरं तु अन्यत् समनुज्ञाप्य तं जनं प्रविशेत् भोजनार्थं च स्त्रीवृतः अंतःपुरं पुनः ॥

यो० । संध्यां उपास्य (कृत्वा) शस्त्रभृत् राजा — रहस्याख्यायिनां चपुनः प्रणिधीनां चेष्टितं अंतर्वेश्मनि अन्यत् कक्षांतरं गत्वा — शृणुयात् — ततः तंजनं समनुज्ञाप्य स्त्रीवृतः राजा भोजनार्थं पुनः अंतःपुरं प्रविशेत् ॥

भा० । ता० । फिर राजा संध्या समय की ईश्वरकी उपासना करके घरके भीतर किसी अन्य कक्षांतर (गुप्तस्थान) में जाकर और शस्त्रोंको धारकर रहस्य (गुप्तवार्त्ता) कहनेवाले दूतों के चेष्टित (कर्तव्य)–को सुनै–फिर उन दूतोंको आज्ञादेकर स्त्रियोंसमेत राजा भोजनके लिये रनिवासमें प्रवेशकरै २२३ । २२४ ॥

तत्रभुक्त्वापुनःकिंचित्तूर्यघोषैःप्रहर्षितः । संविशेत्तुयथाकालमुत्तिष्ठेच्चगतक्लमः २२५ ॥

प०।तत्र भुक्त्वा पुनः किंचित् तूर्यघोषैः प्रहर्षितः संविशेत् तु यथाकालं उत्तिष्ठेत् च गतक्लमः ॥

यो० । तत्र (अंतःपुरे) तूर्यघोषैः प्रहर्षितः राजा किंचित् भुक्त्वा यथाकालं संविशेत् चपुनः गतक्लमः सन् उत्तिष्ठेत (जागृयात्) ॥

भा० । ता० । उस अंतःपुरमें तूर्य (बाजा) के शब्दों से प्रसन्नहुआ राजा यत्किंचित् (थोड़ा) भोजन करके शयनके समय (४ घड़ी रात्रिके पीछे) शयनकरै और विश्रामको करके रात्रिके पिछले प्रहरमें उठै (जगै) २२५ ॥

एतद्विधानमातिष्ठेदरोगःपृथिवीपतिः । अस्वस्थःसर्वमेतत्तुभृत्येषुविनियोजयेत्२२६॥
इतिमानवेधर्मशास्त्रेभृगुप्रोक्तायांसंहितायांराजधर्मोनामसप्तमोऽध्यायः ७॥

प० । एतत् विधानं आतिष्ठेत् अरोगः पृथिवीपतिः अस्वस्थः सर्वं एतत् तु भृत्येषु विनियोजयेत् ॥

यो० । अरोगः पृथिवीपतिः एतत् विधानं आतिष्ठेत् (स्वयंकुर्यात्) अस्वस्थः राजा एतत् सर्वं भृत्येषु विनियोजयेत् (समर्पयेत्) ॥

भा० । ता० । अरोग–(स्वस्थ) राजा इस प्रजाकी रक्षा आदि विधिको स्वयंकरै और अस्वस्थ(रोगी)राजा अर्थात् रोगके समय इस संपूर्णविधिको योग्य और श्रेष्ठ मंत्रियोंको समर्पणकरदे २२६ ॥

इति मन्वर्थभास्करे सप्तमोऽध्यायः ७ ॥

अथअष्टमोऽध्यायः ॥

व्यवहारान्दिदृक्षुस्तुब्राह्मणैःसहपार्थिवः।मन्त्रज्ञैर्मन्त्रिभिश्चैवविनीतःप्रविशेत्सभाम्१॥

प० । व्यवहारान् दिदृक्षुः तु ब्राह्मणैः सह पार्थिवः मंत्रज्ञैः मंत्रिभिः च एव विनीतः प्रविशेत् सभां ॥

यो० । व्यवहारान् दिदृक्षुः पार्थिवः ब्राह्मणैः चपुनः मंत्रज्ञैः मंत्रिभिः सह विनीतः (सन्) सभां प्रविशेत् ॥

भा० । व्यवहारों के देखनेकी है इच्छा जिसकी ऐसा राजा ब्राह्मण और मंत्रके जाननेवाले मंत्रियों सहित विनीत होकर सभा में प्रवेशकरे ॥

ता० । इसप्रकार विपक्षी राजाओंसे प्रजाओं की रक्षाके द्वारा प्राप्तहुई है जीविका जिसको ऐसा राजा प्रजाओंके परस्पर विवादसे उत्पन्न दुःखकी निवृत्ति के लिये ऋण आदान आदि अठारह प्रकार के विवादमें परस्पर विरुद्ध है प्रयोजन जिनका ऐसे अर्थि प्रत्यर्थि (मुदई मुद्दाइले) योंके वाक्यसे पैदाहुये संदेह का हरनेवाला जो विचाररूप व्यवहार उसके देखने की है इच्छा जिसकी ऐसा राजा क्योंकि इस कात्यायनके वचनानुसार धन आदि के संदेहको जो हरे उसीको व्यवहार कहतेहैं ब्राह्मण और मंत्रके जाननेवाले मंत्रियों सहित विनीतहोकर अर्थात् वाणी हस्त पाद आदि देहकी चपलताको छोड़कर क्योंकि जब राजा अविनीत (उद्धत)होताहै तो वादि प्रतिवादियों की बुद्धि नष्टहोनेसे वे यथार्थ नहीं कहसक्के इससे तत्त्वनिर्णय नहीं होगा अर्थात् यथार्थ न्याय नहीं होगा इससे विनीत होकर सभा के बीच में राजा प्रवेशकरे और इस राजाके व्यवहारके देखनेका यहफलहै प्रजाओंकी परस्पर पीडाकी निवृत्ति और यथार्थ निर्णय से रक्षा और राजाको परलोकमें स्वर्गहोगा १ ॥

तत्रासीनःस्थितोवापिपाणिमुद्यम्यदक्षिणम् ।
विनीतवेषाभरणःपश्येत्कार्याणिकार्यिणाम्२ ॥

प० । तत्र आसीनः स्थितः वा अपि पाणिं उद्यम्य दक्षिणं विनीतवेषाभरणः पश्येत् कार्याणि कार्यिणां ॥

यो० । तत्र आसीनः वा स्थितः विनीतवेषाभरणः राजा दक्षिणंपाणिं उद्यम्य कार्यिणां कार्याणि पश्येत् ॥

भा० । ता० । उससभामें बड़े कार्यमें बैठा छोटेकार्य में खड़ाहुवा नहीं उद्धत है वेष-और अलंकार जिसका ऐसा राजा दाहनी भुजाको उठाकर कार्य (मुकद्दमे) वाले कार्योंका विचार करे २ ॥

प्रत्यहंदेशदृष्टैश्चशास्त्रदृष्टैश्चहेतुभिः । अष्टादशसुमार्गेषुनिबद्धानिपृथक्पृथक् ३ ॥

प० । प्रत्यहं देशदृष्टैः च शास्त्रदृष्टैः च हेतुभिः अष्टादशसु मार्गेषु निबद्धानि पृथक् पृथक् ॥

यो० । अष्टादशसुमार्गेषु पृथक् पृथक् निबद्धानि कार्याणि देशदृष्टैः चपुनः शास्त्रदृष्टैः हेतुभिः प्रत्यहं विचारयेत् ॥

१ विनानार्थेहसंदेहे हरणंहारउच्यते नानासंदेहहरणाद्व्यवहारइतिस्मृतः ॥

भा० । ता० । ऋणादानआदि अठारह प्रकारके मार्गोंमें पृथक् पृथक् बँधे (पढ़े) हुये कार्यों को देशमेंदेख और शास्त्रमें देखहुये अर्थात् साक्षिआदि हेतुओंसे प्रतिदिन विचारे ३ ॥

तेषामाद्यमृणादानंनिक्षेपोऽस्वामिविक्रयः । संभूयचसमुत्थानंदत्तस्यानपकर्मच ४ ॥

प० । तेषां आद्यं ऋणादानं निक्षेपः अस्वामिविक्रयः संभूय च समुत्थानं दत्तस्य अनपकर्म च ॥

यो० । तेषां अष्टादशव्यवहाराणां आद्यं ऋणादानं निक्षेपः अस्वामिविक्रयः चपुनः संभूयसमुत्थानं चपुनः दत्तस्य अनपकर्म ज्ञेयम् ॥

भा० । ता० । उन अठारह प्रकार के व्यवहारों में पहिले ऋणादान है और वह इस नारद वचन के इहहोना है कि ऋणदेने योग्य नहीं देने योग्यहोता है और जिससे ऋण जिसप्रकार लियाहो लेने और देनेका जो व्यवहार ठहराहोय उसे ऋणादान कहते हैं और दूसरा निक्षेप अर्थात् अपनाधन दूसरेको अर्पण करना (सौंपदेना) तीसरा अस्वामिविक्रय अर्थात् दूसरे की चीज बेचदेना और चौथा इकट्ठे होकर (साझेमें) व्यवहार करना और पांचवां दियेहुये धनका अपात्रबुद्धि वा क्रोधसे ग्रहण करना ४ ॥

वेतनस्यैवचादानंसंविदश्चव्यतिक्रमः । क्रयविक्रयानुशयोविवादःस्वामिपालयोः ५ ॥
सीमाविवादधर्मश्चपारुष्येदण्डवाचिके । स्तेयंचसाहसंचैवस्त्रीसंग्रहणमेवच ६ ॥
स्त्रीपुंधर्मोविभागश्चद्यूतमाह्वयएवच । पदान्यष्टादशैतानिव्यवहारस्थिताविह ७ ॥

प० । वेतनस्य एव च अदानं संविदः च व्यतिक्रमः क्रयविक्रयानुशयः विवादः स्वामिपालयोः ॥

प० । सीमाविवादधर्मः च पारुष्ये दंडवाचिके स्तेयं च साहसं च एव स्त्रीसंग्रहणं एव च ॥

प० । स्त्रीपुंधर्मः विभागः च द्यूतं आह्वयः एव च पदानि अष्टादश एतानि व्यवहारस्थितौ इह ॥

यो० । वेतनस्य चपुनः अदानं चपुनः संविद व्यतिक्रमः क्रयविक्रयानुशयः स्वामिपालयोर्विवादः चपुनः सीमाविवादधर्मः दंडवाचिके पारुष्ये चपुनः स्तेयं चपुनः साहसं चपुनः स्त्रीसंग्रहणं स्त्रीपुंधर्मः चपुनः विभागः द्यूतं — आह्वयः एतानि अष्टादशइह व्यवहारस्थितौ पदानि (भवंति) ॥

भा० । ता० । वेतन का न देना अर्थात् भृत्यकीभृति (नौकरी) न देना—और कीहुई व्यवस्थाको न करना और क्रयविक्रयका विवाद—स्वामिपशुपालका विवाद—सीमाकाविवाद—कठोरदंड—और कठोरवाणी—और चोरी—और बलसे दूसरेके धनको हरना—और स्त्रीको परपुरुषका संपर्क (संग) और स्त्री पुरुषकाधर्म—पिताआदिके धनका विभाग—और आह्वय द्यूत अर्थात् पक्षी और मेषादि प्राणियोंका युद्धकरावना ये चारोंइलोकोंमें कहेहुये अठारह इस जगतमें व्यवहारकी प्रवृत्तिके स्थान हैं—अर्थात् इन अठारहोंमेंही मनुष्योंका वाद विवाद होताहै५—६—७॥

एषुस्थानेषुभूयिष्ठंविवादंचरतांनृणाम् । धर्मंशाश्वतमाश्रित्यकुर्यात्कार्यविनिर्णयम् ८ ॥

प० । एषु स्थानेषु भूयिष्ठं विवादं चरतां नृणां धर्मं शाश्वतं आश्रित्य कुर्यात् कार्यविनिर्णयं ॥

यो० । (राजा) एषु स्थानेषु भूयिष्ठं चरतां नृणां कार्यविनिर्णयं शाश्वतं धर्ममाश्रित्य कार्यविनिर्णयं कुर्यात् ॥

१ ऋणंदेयमदेयञ्च येनयत्रयथाचयत् दानग्रहणधर्माश्च तदृणादानमुच्यते ॥

भा० । ता० । इन अष्टादश व्यवहारके स्थानमें अनेकप्रकारका विवाद करतेहुये मनुष्यों के कार्यका विनिर्णय सनातनधर्मका अवलम्बन करिके राजाकरे और जो इन अठारहमें विवाद के स्थान नहींआयेहैं वे इस नारद वचन के अनुसार प्रकीर्णक कहातेहैं—क्योंकि इसश्लोकमें भूयिष्ठपद देनेसे बहुतसे विवादके स्थान (मनुने) सूचन कियेहैं ८ ॥

यदास्वयंनकुर्यात्तुनृपतिःकार्यदर्शनम् । तदानियुञ्ज्याद्विद्वांसंब्राह्मणंकार्यदर्शने ९ ॥

प० । यदा स्वयं न कुर्यात् तु नृपतिः कार्यदर्शनं तदा नियुंज्यात् विद्वांसं ब्राह्मणं कार्यदर्शने॥

यो० । यदा तु नृपतिः कार्यदर्शनं स्वयं न कुर्यात् तदा विद्वांसं ब्राह्मणं कार्यदर्शने नियुंज्यात ॥

भा० । ता० । जबराजा अन्यकार्यमें व्याकुल वा रोगआदिसे कार्योंको न देखसके तबकार्यों के देखनेमें विद्वान् ब्राह्मणको नियुक्तकरे ९ ॥

सोऽस्यकार्याणिसंपश्येत्सभ्यैरेवत्रिभिर्वृतः।सभामेवप्रविश्याग्र्यामासीनःस्थितएववा१०

प० । सः अस्य कार्याणि संपश्येत् सभ्यैः एव त्रिभिः वृतः सभां एव प्रविश्य अग्र्यां आसीनः स्थितः एव वा ॥

यो० । सःविद्वान ब्राह्मणः त्रिभिः सभ्यैः वृतःएव अग्र्यांसभांएवप्रविश्य आसीनः वा स्थितःएव सन् अस्य(राज्ञः) कार्याणि संपश्येत् ॥

भा० । ता० । वह विद्वान् ब्राह्मण तीनसभासदों समेत मुख्यसभा में प्रविष्ट होकर बैठकर अथवा खड़ाहोकर राजाके देखनेयोग्य कार्य्योंकोकरै अर्थात् चलताफिरता किसीकार्यको न देखे क्योंकि उससमय चित्त विक्षिप्त होता है १० ॥

यस्मिन्देशेनिषीदन्तिविप्रावेदविदस्त्रयः।राज्ञश्चाधिकृतोविद्वान्ब्रह्मणस्तांसभांविदुः११

प० । यस्मिन् देशे निषीदन्ति विप्राः वेदविदः त्रयः राज्ञः च अधिकृतः विद्वान् ब्रह्मणः ताम् सभां विदुः ॥

यो० । यस्मिनदेशे वेदविदःत्रयःविप्राः निषीदंति चपुनः राज्ञः अधिकृतः विद्वानंनिषीदति बुधाःतांब्रह्मणःसभांविदुः ॥

भा० । ता० । जिसस्थान में वेदत्रयी के जाननेवाले और राजानेदियाहै अधिकार जिसको ऐसा विद्वान् ब्राह्मणटिकतेहैं उसराजाकी सभाको ब्रह्माकी सभाकेसमान विद्वान्जानतेहैं ११ ॥

धर्मोविद्धस्त्वधर्मेणसभांयत्रोपतिष्ठते । शल्यंचास्यनकृन्तन्तिविद्धास्तत्रसभासदः १२ ॥

प० । धर्मः विद्धः तु अधर्मेण सभां यत्र उपतिष्ठते शल्यं च अस्य न कृन्तन्ति विद्धाः तत्र सभासदः ॥

यो० । यत्र अधर्मेणविद्धः धर्मः सभां उपतिष्ठते तत्रसभासदः अधर्मेणविद्धाः सन्तः अस्य (धर्मस्य) शल्यं (अधर्मरूपं) नं कृन्तन्ति (न दूरीकुर्वीत) ॥

भा० । जिसदेशमें अधर्मसे मिला धर्म सभामें टिकताहै उससभामें अधर्मसे विधेहुये सभासद धर्मकीपीडा (अधर्म) को दूर नहींकरसक्ते ॥

ता० । सभाशब्द का यहअर्थ है भानामप्रकाश के सहित जो वर्त्ते उसे सभाकहते हैं अर्थात्

१ नदृष्टंयच्चपूर्वेषु सर्वंतत्स्यात्प्रकीर्णकं ॥

विद्वानों का समागम जहांहोय वही सभाहोतीहै जिससभामें सत्यबोलनेसे पैदाहुआ धर्म झूंठ बोलनेसे पैदाहुये अधर्म से पीडित होता है अर्थात् दोनों वादि विवादियों के मध्यमें एक सत्य बोलता है और एकझूंठ बोलता है उससे धर्म की पीडाकरनेवाले और अधर्म के शल्य (कांटे) से बिधेहुये सभासद धर्म के शल्य अधर्मको दूरनहींकरसक्ते क्योंकि वे आपही अधर्म से बिध जातेहैं १२ ॥

सभांवानप्रवेष्टव्यंवक्तव्यंवासमञ्जसम् । अब्रुवन्विब्रुवन्वापिनरोभवतिकिल्बिषी १३ ॥

प० । सभां वा न प्रवेष्टव्यं वक्तव्यं वा समंजसं अब्रुवन् विब्रुवन् वा अपि नरः भवति किल्बिषी ॥

यो० । सभांज्ञात्वा पुरुषेण न प्रवेष्टव्यं वा समंजसं वक्तव्यं (कुतः) अब्रुवन् वा विब्रुवन् अपिनरः किल्बिषी भवति ॥

भा० । ता० । सभाको जानकर मनुष्य सभा में प्रवेश न करे यदिकरे तो सत्यबोले क्योंकि तूष्णीं बैठाहुआ और झूंठबोलताहुआ मनुष्य पापका भागीहोता है १३ ॥

यत्रधर्मोह्यधर्मेणसत्यंयत्रानृतेनच । हन्यतेप्रेक्षमाणानांहतास्तत्रसभासदः १४ ॥

प० । यत्र धर्मः हि अधर्मेण सत्यं यत्र अनृतेन च हन्यते प्रेक्षमाणानां हताः तत्र सभासदः ॥

यो० । यत्र (सभायां) अधर्मेण धर्मः यत्र अनृतेन सत्यं हन्यते तत्र प्रेक्षमाणानां (अनादृत्य) सभासदः तेन अधर्मेण हताः भवंति ॥

भा० । ता० । जिससभा में वादि विवादियों के धर्मको अधर्म और सत्यको झूंठ नष्टकरदे अर्थात् जिस सभा के साक्षी धर्म से निर्णय न करें उससभामें वह अधर्म देखनेवालोंको छोड़कर वे सभासदही उस अधर्म से नष्टकियेजातेहैं अर्थात् उस अधर्म के फलको भोगतेहैं १४ ॥

धर्मएवहतोहन्तिधर्मोरक्षतिरक्षितः । तस्माद्धर्मोनहन्तव्योमानोधर्मोहतोऽवधीत् १५ ॥

प० । धर्मः एव हतः हन्ति धर्मः रक्षति रक्षितः तस्मात् धर्मः न हंतव्यः मा नः धर्मः हतः अवधीत् ॥

यो० । हतः धर्मः एव हंति रक्षितः धर्मः रक्षति तस्मात् हतःधर्मः नः (अस्मान्) मा अवधीत् (इतिबुद्ध्या) धर्मोनहंतव्यः ॥

भा० । ता० । अवलंघनकियाहुआ धर्मही इष्ट अनिष्टोंसहित नष्टकरताहै—और सेवनकिया धर्मही रक्षाकरताहै जिससे इसबुद्धिसे प्राड्विवाक (वकील) कभी भी धर्मकाअवलंघन न करे कि नष्टकियाहुआ धर्म तेरेसहित हमको मतनष्टकरो—जो प्राड्विवाक वादि विवादी सभासद इनके विरुद्ध वर्त्तताहै उसके प्रति यह सम्बोधन है १५ ॥

वृषोहिभगवान्धर्मस्तस्ययःकुरुतेह्यलम् । वृषलंतंविदुर्देवास्तस्माद्धर्मंनलोपयेत् १६ ॥

प० । वृषः हि भगवान् धर्मः तस्य यः कुरुते हि अलं वृषलं तं विदुः देवाः तस्मात् धर्मं न लोपयेत् ॥

यो० । हि (यतः) वृषःभगवान्धर्मः (अस्ति) तस्य यःपुरुषः अलं (विनाशं) कुरुते तं देवाः वृषलंविदुः—तस्माद्धर्मं न लोपयेत् ॥

भा० । ता० । जिससे भगवान् धर्मकोही वृष कहतेहैं क्योंकि धर्मही मनुष्यकी कामनाओं

को वर्षताहै उसवृषका जो अलं (नाश) करताहै देवता उसीपुरुषको वृषल (शूद्र) जानते हैं तिससे मनुष्य कभी भी अपने धर्मकालोप (विनाश) न करे १६ ॥

एकएवसुहृद्धर्मोनिधनेऽप्यनुयातियः । शरीरेणसमंनाशंसर्वमन्यद्धिगच्छति १७॥

प० । एकः एव सुहृत् धर्मः निधने अपि अनुयाति यः शरीरेण समं नाशं सर्वं अन्यत् हि गच्छति ॥

यो० । यः निधनेअपि अनुयाति सःधर्मः एव एकःसुहृत् अस्ति हि (यतः) अन्यत् सर्वं शरीरेण समं (नाशं) गच्छति ॥

भा० । ता० । एक धर्महीं अपना मित्रहै जो मरनेपर भी वांछितफल देनेकेलिये संग चलता है और अन्य सम्पूर्ण (स्त्री पुत्रादि) शरीर के नष्टहोनेपरही नाश (अदर्शन) को प्राप्तहोजाते हैं अर्थात् शरीर के छुटनेपर स्त्री पुत्रादिक कोई भी जीवात्माको नहींदेखते इससे स्त्री पुत्रादिकोंके स्नेहको त्यागदे परंतु धर्मको न त्यागे १७ ॥

पादोधर्मस्यकर्त्तारंपादःसाक्षिणमृच्छति । पादःसभासदःसर्वान्पादोराजानमृच्छति १८

प० । पादः धर्मस्य कर्त्तारं पादः साक्षिणं ऋच्छति पादः सभासदः सर्वान् पादः राजानं ऋच्छति ॥

यो० । धर्मस्यपादः कर्त्तारं पादः साक्षिणं ऋच्छति पादः सर्वान् सभासदः पादः राजानं ऋच्छति (प्राप्नोति) ॥

भा० । ता० । कुरीतिसे व्यवहारदेखनेसे अधर्म का चौथाभाग अधर्मकरनेवाले और चौथा भाग साक्षिको और चौथाभाग सम्पूर्ण सभासदों को और चौथाभाग राजा को प्राप्त होता है अर्थात् इनसबको पापका सम्बंध होताहै १८ ॥

राजाभवत्यनेनास्तुमुच्यन्तेचसभासदः । एनोगच्छतिकर्त्तारंनिन्दार्होयत्रनिन्द्यते १९॥

प० । राजा भवति अनेनाः तु मुच्यंते च सभासदः एनः गच्छति कर्त्तारं निन्दार्हः यत्र निन्द्यते ॥

यो० । यत्र निंदार्हः निंद्यते तत्र राजा अनेनाः भवति चपुनः सभासदः मुच्यंते एनः कर्त्तारं गच्छति ॥

भा० । ता० । जिससभामें निंदाकेयोग्य (असत्यवादी) वादी अथवा प्रतिवादीकी निंदाकी जाती है वहां राजा पापसे हीन होताहै–सभासदभी पापसे छूटते हैं–पापके फल करने वाले को प्राप्त होताहै १६ ॥

जातिमात्रोपजीवीवाकामंस्याद्ब्राह्मणब्रुवः । धर्मप्रवक्तानृपतेर्नतुशूद्रःकथंचन २० ॥

प० । जातिमात्रोपजीवी वा कामं स्यात् ब्राह्मणब्रुवः धर्मप्रवक्ता नृपतेः न तु शूद्रः कथंचन ॥

यो० । नृपतेः धर्मप्रवक्ता जातिमात्रोपजीवी ब्राह्मणब्रुवः कामंस्यात् शूद्रस्तु कथंचन न स्यात् ॥

भा० । जातिमात्र से जीविका करते हुये अपने कर्म से हीन भी ब्राह्मण कोई धर्मके विवेचन में राजा नियत करे शूद्रको कभी न करे ॥

ता० । ब्राह्मण जातिसेही जो जीवताहोइ अर्थात् जातिका ब्राह्मण होइ चाहे कर्मको न भी करता हो परन्तु साक्षी आदि के द्वारा न्याय और अन्याय के निरूपण में समर्थ हो–जिसे ब्राह्मणब्रुव कहते हैं–और शूद्रधर्म का कहनेवाला भी कभी नियत न करना चाहिये अर्थात् पूर्वोक्त

शास्त्रके जाननेवाले ब्राह्मणके अभाव में जो जातिमात्रसे ही ब्राह्मण होइ उसे नियुक्तकरे और व्यवहारके जाननेवाले धार्मिक भी शूद्रको नियत न करे—यद्यपि धर्मप्रवक्ता इससेही धर्म के कहने वाले ब्राह्मणका जो विधान उससेही शूद्रका निषेध सिद्धथा फिर जो ननु शूद्रःकथंचन इस पदसे शूद्र का निषेध कियाहै वह योग्य ब्राह्मण के न मिलने पर क्षत्री—और वैश्यकी अनुमति के लियेहै—क्योंकि इस कात्यायन ऋषि के वचन से यह सिद्धहोताहै कि जहांपर विद्वान ब्राह्मण न मिले वहां धर्म शास्त्र के जाननेवाले क्षत्री को अथवा वैश्यको नियुक्त करे शूद्रको तो यत्न से वर्जिदे २० ॥

यस्यशूद्रस्तुकुरुतेराज्ञोधर्मविवेचनम् । तस्यसीदतितद्राष्ट्रंपङ्केगौरिवपश्यतः २१ ॥

प० । यस्य शूद्रः तु कुरुते राज्ञः धर्मविवेचनं तस्य सीदति तत् राष्ट्रं पंके गौः इव पश्यतः ॥

यो० । यस्यराज्ञः धर्मविवेचनं शूद्रःकुरुते तस्य पश्यतः एव तत् राष्ट्रं पंके गौरिवसीदति ॥

भा० । ता० । जिसराजा के यहां धर्म का विवेचन शूद्र करताहै उस राजाका वहदेशराजाके देखतेही इसप्रकार दुखी होताहै जैसे पंक (कीच) में गौ दुखीहोतीहै २१ ॥

यद्राष्ट्रंशूद्रभूयिष्ठंनास्तिकाक्रान्तमद्विजम् ।
विनश्यत्याशुतत्कृत्स्नंदुर्भिक्षव्याधिपीडितम् २२ ॥

प० । यत् राष्ट्रं शूद्रभूयिष्ठं नास्तिकाक्रान्तं अद्विजं विनश्यति आशु तत् कृत्स्नं दुर्भिक्षव्याधिपीडितम् ॥

यो० । यत् राष्ट्रं (देशं) शूद्रभूयिष्ठं नास्तिकाक्रांतं अद्विजं (भवति) तत् कृत्स्नं दुर्भिक्षव्याधिपीडितं सत् आशु विनश्यति ॥

भा० । ता० । जिसराजाके देशमें बहुत शूद्रहोइँ अथवा नास्तिकहोइँ और द्विज न होइँ उस राजाका वह संपूर्ण देश दुर्भिक्ष और व्याधिसे दुखी होकर शीघ्रही नष्टहोताहै—अर्थात् उस देश में—होमादिक के अभाव से वृष्टिके न होनेसे दुर्भिक्ष और शान्ति आदि के अभाव से रोगादिक होतेहैं २२ ॥

धर्मासनमधिष्ठायसंवीताङ्गःसमाहितः । प्रणम्यलोकपालेभ्यःकार्यदर्शनमारभेत् २३ ॥

प० । धर्मासनं अधिष्ठाय संवीतांगः समाहितः प्रणम्य लोकपालेभ्यः कार्यदर्शनं आरभेत् ॥

यो० । संवीतांगः समाहितः (राजा) धर्मासनं अधिष्ठाय —लोकपालेभ्यः प्रणम्य कार्यदर्शनं आरभेत् ॥

भा० । ता० । अपने देहका ढककर अर्थात् वस्त्रों को धारण करिके सावधानी से धर्मासन (सिंहासन) पर बैठकर और लोकपालों को नमस्कार करिके (राजा) कार्योंके देखने का आरंभकरे २३ ॥

अर्थानर्थावुभौबुद्धाधर्माधर्मौचकेवलौ ।वर्णक्रमेणसर्वाणिपश्येत्कार्याणिकार्यिणाम्२४॥

प० । अर्थानर्थौ उभौ बुद्ध्वा धर्माधर्मौ च केवलौ वर्णक्रमेण सर्वाणि पश्येत् कार्याणि कार्यिणाम् ॥

१ यत्रविप्रोनविद्वान्स्यात्क्षत्रियंतत्रयोजयेत् वैश्यंवाधर्मशास्त्रज्ञंशूद्रंयत्नेनवर्जयेत् ॥

यो० । उभौ अर्थानर्थौ चपुनः केवलौ धर्माधर्मौ बुद्ध्वा कार्यिणां सर्वाणि कार्याणि वर्णक्रमेण पश्येत् ॥

भा० । ता० । दोनों अर्थ और अनर्थको और केवल धर्म और अधर्मको जानकर कार्यवालों के संपूर्ण कार्योंको वर्णोंके क्रमसे देखे—अर्थात् प्रथम ब्राह्मणके फिर क्षत्री वैश्य शूद्रके कामोंका निर्णयकरे २४ ॥

बाह्यैर्विभावयेल्लिङ्गैर्भावमन्तर्गतंनृणाम् । स्वरवर्णेङ्गिताकारैश्चक्षुषाचेष्टितेनच २५ ॥

प० । बाह्यैः विभावयेत् लिंगैः भावं अंतर्गतं नृणां स्वरवर्णेङ्गिताकारैःचक्षुषा चेष्टितेन चैं ॥

यो० । नृणां अंतर्गतं भावं बाह्यैः लिङ्गैः चपुनः स्वरवर्णेङ्गिताकारैः चक्षुषा चपुनः चेष्टितेन विभावयेत् (कथयेत्) ॥

भा० । ता० । मनुष्योंके मनके अभिप्रायको बाहिरके लिङ्गों (स्वर आदि) से—और स्वर (गदगदवाणी) आकार स्वाभाविक से अन्यथा मुखकी कृष्णता आदि इङ्गित (नीचेको देखना) आकार और पसीना और रोमांचका उठना नेत्र और चेष्टा (हाथोंका फेकना) इनसे मनुष्योंके भीतरले अभिप्रायको राजा जाने २५ ॥

आकारैरिङ्गितैर्गत्याचेष्टयाभाषितेनच । नेत्रवक्त्रविकारैश्चगृह्यतेऽन्तर्गतंमनः २६ ॥

प० । आकारैः इङ्गितैः गत्या चेष्टया भाषितेन चैं नेत्रवक्त्रविकारैः चैं गृह्यते अंतर्गतम् मनः ॥

यो० । आकारैः इंगितैः — गत्या चेष्टया चपुनः भाषितेन चपुनः नेत्रवक्त्र विकारैः अंतर्गतं मनः गृह्यते (ज्ञायते) ॥

भा० । ता० । आकारइंगित (नीचेको देखना आदि) चेष्टा बोलना नेत्र और मुखका बिकार इनसे भीतर रहताहुआ भी मन जाना जाताहै २६ ॥

बालदायादिकंरिक्थंतावद्राजानुपालयेत् । यावत्सस्यात्समावृत्तोयावच्चातीतशैशवः २७॥

प० । बालदायादिकं रिक्थं तावत् राजा अनुपालयेत् यावत् सः स्यात् समावृत्तः यावत् चैं अतीतशैशवः ॥

यो० । राजा बालदायादिकं रिक्थं तावत् अनुपालयेत् यावत् सः बालः समावृत्तः स्यात् चपुनः यावत् अतीतशै शवःस्यात् ॥

भा० । ता० । अनाथ बालकके धनको यदि कोई पितृव्य (चचा) आदि अन्यायसे ग्रहण करनेलगे तो राजा उस धनकी तबतक रक्षाकरे जबतक वह बालक समावृत्त न हो अर्थात् गुरुके यहां छत्तीसवर्ष आदि ब्रह्मचारीके धर्मको करिके गृहस्थाश्रममें प्रविष्ट न हो और जो असामर्थ्य आदिसे ब्रह्मचर्य्य आदिही समावृत्तहो वह उसके धनको भी तबतक रक्षाकरे और सोलहवर्षकी अवस्थातक बालकहोताहै इस नारदके वचन[1] से यही प्रतीत होताहै कि सोलह वर्षतक बालक होताहै २७ ॥

वसापुत्रासुचैवंस्याद्रक्षणंनिष्कुलासुच । पतिव्रतासुचस्त्रीषुविधवास्वातुरासुच २८ ॥

प० । वसापुत्रासु चैं एवं स्यात् रक्षणं निष्कुलासु चैं पतिव्रतासु चैं स्त्रीषु विधवासु आतुरासु चैं ॥

यो० । वसापुत्रासु चपुनःनिष्कुलासु पतिव्रतासु विधवासु चपुनः आतुरासु धनस्य रक्षणं एवं (बालधनवत्) स्यात् ॥

---

१ बालआषोडशाद्वर्षात् ॥

भा० । वंध्या (पुत्रहीन) निष्कुल–पतिव्रता–विधवा–रोगवाली जो स्त्रीहैं इन सबके धनकी भी रक्षा राजा बालकके धनके समानही करै ॥

ता० । वंध्या स्त्रियोंमें और अपुत्रा स्त्रियोंके धनकी भी बालक के धनकी तुल्यही राजा रक्षा करे क्योंकि उनका पति उनके निर्वाहमात्र धनका देकर दूसरा विवाह करलेताहै और जो स्त्री पुत्रवाली नहींहै दैव वशसे उनका पति परदेशमें हो वा न हो उनके धनकी–और जो स्त्री निष्कुल जिनके कुलका सपिंड नहींहै और जो साधु स्वभावहै अर्थात् पतिव्रताहै और जो विधवा अथवा रोगवालीहै उनके धनकी भी राजा इसी प्रकार रक्षाकरै जैसे बालक के धनकी करताहै २८ ॥

जीवन्तीनांतुतासांयेतद्धरेयुःस्वबान्धवाः।ताञ्छिष्याच्चौरदण्डेनधार्मिकःपृथिवीपतिः२९

प० । जीवंतीनां तु तासां ये तत् हरेयुः स्वबांधवाः तान् शिष्यात् चौरदंडेन धार्मिकः पृथिवीपतिः ॥

यो० । ये स्वबांधवाः जीवंतीनां तासां तद्धनं हरेयुः तान् धार्मिकः पृथिवीपतिः चौरदंडेन शिष्यात् ॥

भा० । ता० । जो उनके बांधव (उनके पीछे अधिकारी) जीतीहुई उन स्त्रियोंके उस धनको हरलें धार्मिक राजा–चौरके दंडसे शिक्षादे २९ ॥

प्रणष्टस्वामिकंरिक्थंराजात्र्यब्दंनिधापयेत्।अर्वाक्त्र्यब्दाद्धरेत्स्वामीपरेणनृपतिर्हरेत्३०

प० । प्रणष्टस्वामिकं रिक्थं राजा त्र्यब्दं निधापयेत् अर्वाक् त्र्यब्दात् हरेत् स्वामी परेण नृपतिः हरेत् ॥

यो० । राजा प्रणष्ट स्वामिकं रिक्थं त्र्यब्दं निधापयेत् त्र्यब्दात् अर्वाक् स्वामीधनं हरेत् परेण नृपतिः हरेत् ॥

भा० । ता० । जिस धनके स्वामीका ज्ञान न होइ उस धनको भेरी शब्दके घोषणके अनंतर (ढँढोरा पिटवाकर) राज्यके द्वारपर तीन वर्षतक रक्खे यदि तीनवर्षके बीचमें धनका स्वामी आयजाय तो उस धनको वही ग्रहणकरे तीनवर्षके अनंतर राजा अपने आधीनमें करले ३० ॥

ममेदमितियोब्रूयात्सोऽनुयोज्योयथाविधि।संवाद्यरूपसंख्यादीन्स्वामीतद्द्रव्यमर्हति३१

प० । मम इदं इति यः ब्रूयात् सः अनुयोज्यः यथाविधि संवाद्य रूपसंख्यादीन् स्वामी तत् द्रव्यं अर्हति ॥

यो० । यः पुरुषः इदंधनं मम (अस्ति) इति ब्रूयात् सः किंरूपं किंसंख्याकं कुत्र प्रनष्टं इत्येवं यथाविधि अनुयोज्यः (प्रष्टव्यः) ततः रूपसंख्यादीन् संवाद्य तत् द्रव्यं स्वामी अर्हति ॥

भा० । ता० । जो मनुष्य उस धनको अपनावतावै उसको यथाविधि इसप्रकार पूछे कि क्या धनथा कितना उसकी संख्याथी कहाँजातारहाथा यदि वह रूप और संख्यादिक को सत्य सत्य बतादे तो वह धनका स्वामीही उस धनको ग्रहण करने योग्य होताहै ३१ ॥

अवेदयानोनष्टस्यदेशंकालंचतत्त्वतः । वर्णंरूपंप्रमाणंचतत्समंदण्डमर्हति ३२ ॥

प० । अवेदयानः नष्टस्य देशं कालं च तत्त्वतः वर्णं रूपं प्रमाणं च तत्समं दंडं अर्हति ॥

यो० । नष्टस्य धनस्य देशं चपुनः कालं वर्णरूपं चपुनः प्रमाणं अवेदयानः पुरुषः तत्समं दंडं अर्हति ॥

भा० । ता० । जो नष्टहुये द्रव्यके देश काल वर्ण–रूप–और प्रमाणको यथार्थ न जानताहो अर्थात् उस देशमें उसकालमें इस वर्णका इस आकारका इतना मेरा द्रव्य जाता रहाहै इनको यथार्थ न बतासके वह मनुष्य उस धनके तुल्यही दंडके योग्य होताहै ३२ ॥

आददीताथषड्भागंप्रणष्टाधिगतान्नृपः । दशमंद्वादशंवापिसतांधर्ममनुस्मरन् ३३॥

प० । आददीत अथ षट् भागं प्रणष्टाधिगतात् नृपः दशमं द्वादशं वा अपि सतां धर्मं अनुस्मरन् ॥

यो० । प्रणष्टाधिगतात् नृपः सतांधर्मं अनुस्मरन् (सन) षड्भागं दशमं वा द्वादशं भागं आददीत (गृह्णीयात्) ॥

भा० । जो धन नष्टहुआ राजाको मिले उस धनमेंसे छठा–दशवां–बारहवां भाग सज्जनोंके धर्मका ज्ञाता राजा ग्रहणकरे और शेषधनको स्वामीको देदे ॥

ता० । सज्जनोंके धर्मको स्मरण करताहुआ राजा उसनष्ट अपनेको मिलेहुये धनमेंसे छठा–दशवां–वा बारहवां–भाग इस लिये ग्रहणकरले कि उस धनकी रक्षा राजाने कीहै–और यह छठा और दशवां और बारहवें भागका लेना भी धनके स्वामी की निर्गुण सगुणताकी अपेक्षासे है अर्थात् निर्गुणसे छठाभाग गुणवान से दशवांभाग अत्यंत गुणवानसे बारहवां भाग ग्रहणकरे शेष धनको धन के स्वामीको अर्प्पणकरदे ३३ ॥

प्रणष्टाधिगतंद्रव्यंतिष्ठेद्युक्तैरधिष्ठितम्।यांस्तत्रचौरान्गृह्णीयात्तान्राजेभेनघातयेत्३४॥

प० । प्रणष्टाधिगतं द्रव्यं तिष्ठेत् युक्तैः अधिष्ठितं यान् तत्र चौरान् गृह्णीयात् तान् राजा इभेन घातयेत् ॥

यो० । प्रणष्टाधिगतं द्रव्यं युक्तैः अधिष्ठितंतिष्ठेत् तत्र (धने) यान् पुरुषान् चौरान् गृह्णीयात् तान् इभेन राजा घातयेत् ॥

भा० । जो नष्टहुआ द्रव्य राजाकोमिले उसको युक्त (रक्षाकरनेवाले) पुरुषोंसे रक्षाकरे और और जिनको उसधनमेंसे चोरजानले उनको हाथीसे राजा मरवाइदे ॥

ता० । जो द्रव्य किसीका नष्टहुआ राजाके मनुष्योंको मिले उस धनको उसकी रक्षामें नियत मनुष्योंसे रक्षित रक्खे और उस धनमें जिनको चोरजाने उनको राजा हाथीसे मरवाइदे इस श्लोकमें गोविंदराज यह कहतेहैं कि सौसे अधिक की चोरीकरनेपर मरवावें अर्थात् सोने की सौ मुद्रासे अधिक चोरी करनेपर इस वचन[१] के अनुसार मारना लिखाहै सो ठीक नहींहै क्योंकि संधिकरिके (मिलकर) चोरीहोतीहैं–और किसीके नष्टहुये और राजाके रक्षाकियेद्रव्य के हरनेसे यहांपर वधकहाहै इससे उक्त वचन सामान्य वधमें लगताहै और यहवध विशेषका कहाहै ३४ ॥

ममायमितियोब्रूयान्निधिंसत्येनमानवः । तस्याददीतषड्भागंराजाद्वादशमेववा३५ ॥

प० । मम अयं इति यः ब्रूयात् निधिं सत्येन मानवः तस्य आददीत षड्भागं राजा द्वादशं एव वा॥

---

१. शतादभ्यधिके वधः ॥

यो० । यः मानवः अयं (निधिः) मम (अस्ति) इति सत्येन निधिं ब्रूयात् तस्य षड्भागं वा द्वादशं भागं राजा आददीत (गृह्णीयात्) ॥

भा० । ता० । जो मनुष्य निधिके मिलनेपर सत्यसे यह कहे कि यह निधि (खजाना) मेरा है उसमेंसे छठा भाग अथवा बारहवां भाग स्वयंग्रहण करले शेष धनको स्वामीको देदे ३५ ॥

अनृतंतुवदन्दण्ड्यःस्ववित्तस्यांशमष्टमम ।
तस्यैववानिधानस्यसंख्यायाल्पीयसींकलाम् ३६ ॥

प० । अनृतं तु वदन् दंड्यः स्ववित्तस्य अंशं अष्टमं तस्य एव वा निधानस्य संख्याय अल्पीयसीं कलां ॥

यो० । अनृतं वदन् पुरुषः स्ववित्तस्य अष्टमं अंशं वा तस्य एव निधानस्य अल्पीयसीं कलां दंड्यः ॥

भा० । ता० । जो धन अपना न होइ उसको अपना बनाताहुआ मनुष्य अपने वित्तके आठवेंभागके दंडयोग्यहै अथवा उसीनिधिको गिनकर उसमेंसे थोड़ेसभागके दंडयोग्यहोताहै ३६ ॥

विद्वांस्तुब्राह्मणोदृष्ट्वापूर्वोपनिहितंनिधिम् । अशेषतोऽप्याददीतसर्वस्याधिपतिर्हिसः ३७

प० । विद्वान् तु ब्राह्मणः दृष्ट्वा पूर्वोपनिहितं निधिम् अशेषतः अपि आददीत सर्वस्य अधिपतिः हि सः ॥

यो० । विद्वान् ब्राह्मणः पूर्वोपनिहितं निधिं दृष्ट्वा अशेषतः अपि आददीत हि (यतः) सः ब्राह्मणः सर्वस्य अधिपतिः (अस्ति) ॥

भा० । विद्वानब्राह्मण तो किसीकी रक्खीहुई निधिको देखकर सबको ग्रहणकरले क्योंकि वह विद्वान ब्राह्मण सबकाप्रभुहै ॥

ता० । विद्वान् ब्राह्मण पहिले गड़ीहुई निधि को संपूर्ण को लेले अर्थात् छठाभाग राजा को नदे क्योंकि सब धनोंका स्वामी राजा होता है क्योंकि इस वर्नन सर्वस्वंब्राह्मणस्येदम् से सब वस्तु ब्राह्मण काही सर्वस्व होताहै और नारद मुनि याज्ञवल्क्यने यह कहाहै कि अन्यकी गाड़ीहुई निधिको प्राप्तहोकर राजा ग्रहण करले ब्राह्मण को छोड़कर सब धनका स्वामी राजाही होताहै—राजा निधि को पाकर उसमें से आधा धन ब्राह्मणों को दे और विद्वान् ब्राह्मण संपूर्ण निधि का स्वामी होताहै इससे गोविंदराज मेधातिथि ने यह जो कहाहै कि जो मनुष्य यह कहे कि निधि मेरीहै और इसकाअर्थ यहकिया है कि राजाको देनेयोग्य धनके निराशके लिये यह वचनहै (ममायमितियोब्रूयात्) कि राजाके देनेयोग्य धनके निराशके लियेहै और यहवचन पिताकी रक्खी निधिमेंमेंही छठाआदि भागदे यहबात अनार्षहै इससे नारद याज्ञवल्क्यसे विपरीत अपने मनसे कल्पना कियाहुआ विरुद्ध अर्थ ठीकनहीं है ३७ ॥

यंतुपश्येन्निधिंराजापुराणंनिहितंक्षितौ । तस्माद्द्विजेभ्योदत्त्वार्द्धमर्द्धंकोशेप्रवेशयेत् ३८॥

प० । यं तु पश्येत् निधिं राजा पुराणं निहितं क्षितौ तस्मात् द्विजेभ्यः दत्त्वा अर्द्धं अर्द्धं कोशे प्रवेशयेत् ॥

१ परेणानिहितंलब्ध्वा राजाह्यपहरेन्निधिम् राजास्वामीनिधेस्सर्व सर्वेषांब्राह्मणादृते ॥
२ राजालब्ध्वानिधिंदद्यात् द्विजेभ्योऽर्द्धंद्विजःपुनः विद्वानशेषमादद्यात् ससर्वस्यप्रभुर्यतः ॥

यो० । राजाक्षितौ निहितं यं पुराणं निधिं पश्येत् तस्मात् अर्द्धं द्विजेभ्यः दत्त्वा अर्द्धं कोशे प्रवेशयेत् ॥

भा० । ता० । पृथ्वीमें गड़ीहुई पुराणीनिधिको राजादेखे अर्थात् राजाको मिले उसनिधिमें से आधा धन ब्राह्मणको देकर आधा अपने कोशमें रखदे ३८ ॥

निधीनांतुपुराणानांधातूनामेवचक्षितौ। अर्द्धभाग्रक्षणाद्राजाभूमेरधिपतिर्हिसः ३९ ॥

प० । निधीनां तु पुराणानां धातूनां एवं च क्षितौ अर्द्धभाक् रक्षणात् राजा भूमेः अधिपतिः हि सः ॥

यो० । पुराणानां निधीनां चपुनः क्षितौ धातूनां रक्षणात् राजा अर्द्धभाक् (भवति) हि (यतः) सः भूमेः अधिपतिः अतः अर्द्धभाक् भवति ॥

भा० । ता० । पुराणीनिधि और पृथ्वीकी धातुओंके अर्द्धभाग का ग्रहणकरनेवाला इसलिये राजाहोताहै कि वह पृथ्वीकी रक्षाकरताहै और पृथ्वीका अधिपति है ३९ ॥

दातव्यंसर्ववर्णेभ्योराज्ञाचौरैर्हृतंधनम्।राजातदुपयुञ्जानश्चौरस्याप्नोतिकिल्बिषम् ४०॥

प० । दातव्यं सर्ववर्णेभ्यः राज्ञा चौरैः हृतं धनं राजा तदुपयुञ्जानः चौरस्य आप्नोति किल्बिषम् ॥

यो० । राज्ञा चौरैर्हृतंधनं सर्ववर्णेभ्यः दातव्यं तदुपयुञ्जानः राजा चौरस्य किल्बिषं आप्नोति ॥

भा० । ता० । लोकोंकाधन जो चोरों ने हरलियाहो उसधनको राजा सम्पूर्ण वर्णोंकोदेदे अर्थात् जिसवर्णकाहो उसीवर्ण के मनुष्य को देदे क्योंकि उसधनको जो राजा भोगताहै उसको वहीपाप होताहै जो चोरको होताहै ४० ॥

जातिजानपदान्धर्मान्श्रेणीधर्मांश्चधर्मवित्।समीक्ष्यकुलधर्मांश्चस्वधर्मंप्रतिपालयेत् ४१

प० । जातिजानपदान् धर्मान् श्रेणीधर्मान् च धर्मवित् समीक्ष्य कुलधर्मान् च स्वधर्मं प्रतिपालयेत् ॥

यो० । धर्मवित् राजा जातिजानपदान् धर्मान् चपुनः श्रेणीधर्मान् चपुनः कुलधर्मान् समीक्ष्य स्वधर्मं प्रतिपालयेत् ॥

भा० । जाति—देश—श्रेणी (वैश्यआदि) कुल इनके धर्मोंको देखकर राजा अपने धर्म को कहै ॥

ता० । जातिके धर्म अर्थात् ब्राह्मणादि जातियोंमें नियत याजनआदि धर्म और देशके धर्म अर्थात् जो शास्त्रसे विरुद्ध नहों और देशरीति से प्रसिद्धहों—क्योंकि इस गौतमऋषी के वचन से यहप्रतीत होताहै देशजाति कुल इनके धर्म प्रमाणहैं जो शास्त्रमें निषिद्धनहीं और वैश्यआदिकों के धर्म और कुल कुलके विषे व्यवस्थितधर्म इनको जानकर राजा व्यवहारों के विषे शास्त्रके अनुकूल धर्मोंकी व्यवस्थाकरे ४१ ॥

स्वानिकर्माणिकुर्वाणादूरेसंतोऽपिमानवाः।प्रियाभवन्तिलोकस्यस्वेस्वेकर्मण्यवस्थिताः ४२

प० । स्वानि कर्माणि कुर्वाणाः दूरे सन्तः अपि मानवाः प्रियाः भवन्ति लोकस्य स्वे स्वे कर्मणि अवस्थिताः ॥

१ देशजातिकुलधर्माश्च आम्नायैरप्रतिषिद्धाः प्रमाणम् ॥

यो० । दूरे सन्तः अपि स्वानि कर्माणि कुर्वाणाः स्वे स्वे कर्मणि अवस्थिताः मानवाः लोकस्य प्रियाः भवन्ति ॥

भा० । ता० । जाति–देश–कुल आदि के अनुसार अपने अपने कर्मको करतेहुये और अपने अपने नित्य (सन्ध्याआदि) और नैमित्तिकः (जातेष्टिआदि) कर्मोंमें वर्त्ततेहुये दूरइहहुये भी मनुष्य जगत्‌के प्यारेहोते हैं ४२ ॥

नोत्पादयेत्स्वयंकार्यंराजानाप्यस्यपूरुषः । नचप्रापितमन्येनग्रसेदर्थंकथंचन ४३ ॥

प० । नँ उत्पादयेत्‌ँ स्वयं कार्यं राजा नँ अँपि अस्य पूरुषः नँ चँ प्रापितं अन्येन ग्रसेत्‌ँ अर्थं कथंचनँ ॥

यो० । राजा अस्य पूरुषः अपि कार्यं (विवादं) स्वयं न उत्पादयेत् चपुनः अन्येन प्रापितं अर्थं नच प्रापितं अर्थं कथंचन न ग्रसेत् ॥

भा० । ता० । राजा अथवा राजाका कोई भृत्य स्वयं कार्य (विवाद) को पैदा न करे और और के प्राप्तकियेहुये कार्यको किसीप्रकार नहीं ग्रसे अर्थात् लोभसे ऋणादी के विवादको न करै क्योंकि इस कात्यायन के वचन से यह प्रतीतहोता है कि राजा अपने आप कार्यको पैदा न करे ४३ ॥

यथानयत्यसृक्पातैर्मृगस्यमृगयुःपदम् । नयेत्तथानुमानेनधर्मस्यनृपतिःपदम् ४४ ॥

प० । यथाँ नयँति असृक्पातैः मृगस्य मृगयुः पदं नयेत्‌ँ तथाँ अनुमानेन धर्मस्य नृपतिः पदम् ॥

यो० । यथा मृगयुः (व्याधः) मृगस्य पदं असृक्पातैः नयति तथा नृपतिः धर्मस्य पदं अनुमानेन नयेत् ॥

भा० । ता० । जैसे रुधिर के पडनेसे मृगके स्थानको व्याध प्राप्तहोता है तैसे राजा भी अनुमान से धर्मके तत्त्वको निश्चय करे ४४ ॥

सत्यमर्थंचसंपश्येदात्मानमथसाक्षिणः । देशंरूपंचकालंचव्यवहारविधौस्थितः ४५ ॥

प० । सत्यं अर्थं चँ संपश्येत्‌ँ आत्मानं अथ साक्षिणः देशं रूपं चँ कालं चँ व्यवहारविधौ स्थितः ॥

यो० । व्यवहारविधौस्थितः राजा सत्यं चपुनः अर्थं आत्मानं अथ साक्षिणः देशं रूपं चपुनः कालं संपश्येत् ॥

भा० । निर्णय करने के समय बैठाहुआ राजा सत्य धनआदि का व्यवहार अपनी आत्मा साक्षि (गवाह) देश व्यवहारका स्वरूप काल इनको देखे अर्थात् इन्हींके अनुसार निर्णय करे ॥

ता० । व्यवहार के देखनेमें जब राजा प्रवृत्तहो तब छलको छोडके सत्यको देखे और गौ–सोना आदि धनके व्यवहारको देखे अर्थात् यह न देखे कि इस मनुष्यने मेरीतरफको आंख मीचकर हँसी करी ऐसे अपराधको न देखे और अपने आत्माको इसलिये देखे कि जोमैं यथार्थ निर्णय करूंगा स्वर्गआदि फलका भागीहोंगा और साक्षियोंको सत्य असत्यके निर्णयकेलिये देखे और देश–काल के योग्य वस्तुको देखे और छोटे अथवा बडे व्यवहार के स्वरूपको देखे ४५ ॥

सद्भिराचरितंयत्स्याद्धार्मिकैश्चद्विजातिभिः।तद्देशकुलजातीनामविरुद्धंप्रकल्पयेत् ४६

प० । सद्भिः आचरितं यत् स्यात्‌ँ धार्मिकैः चँ द्विजातिभिः तत् देशकुलजातीनां अविरुद्धं प्रकल्पयेत्‌ँ ॥

---

१ नराजातुवशित्वेन धनलोभेनवापुनः । स्वयंकर्माणिकुर्वीत नराणामभिवादिनाम् ॥

यो० । यत् सद्भिः चपुनः धार्मिकैः द्विजातिभिः आचरितंस्यात् देशकुलजातीनां अविरुद्धं तत् (व्यवहारनिर्णयम्) प्रकल्पयेत् ॥

भा० । ता० । जो आचरण सत्पुरुषोंने धर्मके ज्ञाता द्विजातियोंने कियाहो देश—कुल—जाति इन के अविरोधी उसी आचरणके अनुसार व्यवहारका निर्णयकरे ४६ ॥

अधमर्णार्थसिद्ध्यर्थमुत्तमर्णेनचोदितः । दापयेद्धनिकस्यार्थमधमर्णाद्विभावितम् ४७॥

प० । अधमर्णार्थसिद्ध्यर्थं उत्तमर्णेन चोदितः दापयेत् धनिकस्य अर्थं अधमर्णात् विभावितम् ॥

यो० । अधमर्णार्थसिद्ध्यर्थं उत्तमर्णेन चोदितः राजा अधमर्णात् विभावितं धनिकस्य अर्थं दापयेत् ॥

भा० । ता० । अधमर्ण (करजवाले) से धनकी सिद्धिकेलिये उत्तमर्ण ने की प्रेरणा जिसको ऐसा राजा धनिकको धन तब दिवावे जब अधमर्णपर उसके धनकी लेख साक्षिआदिसे निश्चयहोजाय ४७॥

यैर्यैरुपायैरर्थंस्वंप्राप्नुयादुत्तमर्णिकः । तैस्तैरुपायैःसंगृह्यदापयेदधमर्णिकम् ४८ ॥

प० । यैः यैः उपायैः अर्थं स्वं प्राप्नुयात् उत्तमर्णिकः तैः तैः उपायैः संगृह्य दापयेत् अधमर्णिकम् ॥

यो० । उत्तमर्णिकः यैः यैः उपायैः स्वमर्थं प्राप्नुयात् तैः तैः उपायैः संगृह्य अधमर्णिकं दापयेत् ॥

भा० । ता० । उत्तमर्ण (धनि) जिन२ उपायों से अपने धनको प्राप्तहो उन उन उपायोंसे वश में करिकै अधमर्णिक से उत्तमर्ण के धनको राजा दिवावे ४८ ॥

धर्मेणव्यवहारेणछलेनाचरितेनच । प्रयुक्तंसाधयेदर्थंपञ्चमेनबलेनच ४९ ॥

प० । धर्मेण व्यवहारेण छलेन आचरितेन च प्रयुक्तं साधयेत् अर्थं पंचमेन बलेन च ॥

यो० । राजा धर्मेण—व्यवहारेण—छलेन—चपुनः आचरितेन चपुनः पंचमेन बलेन अर्थं साधयेत् ॥

भा० । धर्म व्यवहार छल आचरित और पांचवें बलसे उत्तमर्ण को अधमर्ण से राजा धन को दिवावे ॥

ता० । अधमर्ण से उत्तमर्णके धनको (राजा) धर्मसे दिवावे [1]धर्म इस वचन के अनुसार बृहस्पतिने कहेहैं मित्र और संबन्धियों का कथन और शांति—अनुगम इनके द्वारा अधमर्णसे धनीको जो धनदिलाना उसे धर्म कहते हैं और यदि धनदेनेमें अधमर्णका विवाद न होय तो व्यवहार से अर्थात् लेख साक्षीआदिकों से निश्चय करके धनको दिवावे और मेधातिथि तो यह कहतेहैं कि जो अधमर्ण निर्धन है उसीसे व्यवहार के द्वारा उत्तमर्णको धन दिवावे अर्थात् अधमर्ण से कुछ सेवा—कृषि—व्यापार आदि काम कराकर उससे पैदाहुये धनको उत्तमर्णको दिलादे और छल आचरित बलात्कार इन तीनोंका स्वरूप इस वचने से बृहस्पति ने यह कहाहै कि बहाने से अधमर्ण से धन को इसप्रकार मांगकर कि मानो किसी और कामकेलिये धन राजाने मँगाया है फिर उसधन को उत्तमर्णकोदेदे उसको छलकहतेहैं स्त्री—पुत्र पशु इनसबको मारकर अधमर्णको दरवज्जेपर बैठाकर उत्तमर्णको जो धनदिलानाउसको आचरित कहतेहैं और अधमर्णको बांधकर अपने घरलाना उससे ताड़नादि यत्नों से उत्तमर्णकोजो धन दिलाना उसे बलात्कार कहते हैं ४९ ॥

---

१ सुहृत्संबन्धिसंदिष्टैः साम्नाचानुगमेनच । प्रायेणवाऋणीदाप्यो धर्मएषउदाहृतः ॥

२ छद्मनायाचितंचार्थमानीयऋणिकाद्बली । अन्याहृतादिवाहृत्य दाप्यतेतत्रसोपधिः ॥ दारपुत्रपशून्हत्वा कृत्वाद्वारोपवेशनम् । यत्रार्थीदाप्यतेऽर्थंस्वन्तदाचरितमुच्यते ॥ बध्वास्वगृहमानीय ताडनाद्यैरुपक्रमैः । ऋणिकोदाप्यतेयत्र बलात्कारः प्रकीर्तितः ॥

यःस्वयंसाधयेदर्थमुत्तमर्णोऽधमर्णिकात्।नसराज्ञाभियोक्तव्यःस्वकंसंसाधयन्धनम् ५०

प० । यः स्वयं साधयेत् अर्थं उत्तमर्णः अधमर्णिकात् न सः राज्ञा अभियोक्तव्यः स्वकं संसाधयन् धनम् ॥

यो० । यः उत्तमर्णः अधमर्णिकात् अर्थंस्वयंसाधयेत् स्वकंधनं संसाधयन सः उत्तमर्णः राज्ञा न अभियोक्तव्यः—(न निषेद्धव्यः) ॥

भा० । ता० । जो उत्तमर्ण बलआदि यत्नसे अपने धनको अधमर्णसे सिद्धकरे (लेइ) अपनेधन को भलीप्रकार ग्रहणकरतेहुये उस उत्तमर्णको राजा निषेधनकरे कि राजदरबारमें कहेबिना स्वयमेव बलसे धनको क्यों ग्रहणकरता है ५० ॥

अर्थेऽपव्ययमानंतुकरणेनविभावितम् । दापयेद्धनिकस्यार्थंदण्डलेशंचशक्तितः ५१ ॥

प० । अर्थे अपव्ययमानं तु करणेन विभावितं दापयेत् धनिकस्य अर्थं दंडलेशं च शक्तितः ॥

यो० । अर्थे अपव्ययमानं (अधमर्णं) करणेनविभावितं धनिकस्य अर्थं चपुनः शक्तितः दंडलेशं राजादापयेत् ॥

भा० । ता० । जो उत्तमर्ण धनकी नाहींकरताहो कि मुझे इसका ऋणनहींदेना उसअधमर्णपर यदि लेख साक्षि दिव्यआदि से धनका निश्चय होजाय तो उसधनको उत्तमर्णको दिलावे और शक्ति के अनुसार कुछ दंडभी दे अर्थात् दूना वा दशांश दंडदे ५१ ॥

अपह्नवेऽधमर्णस्यदेहीत्युक्तस्यसंसदि । अभियोक्तादिशेद्देश्यंकरणंवान्यदुद्दिशेत् ५२

प०।अपह्नवे अधमर्णस्य देहि इति उक्तस्य संसदि अभियोक्ता दिशेत् देश्यं करणं वा अन्यत् उद्दिशेत् ॥

यो० । धनंदेहि इतिसंसदि उक्तस्य अधमर्णस्य अपह्नवेसति अभियोक्ता देश्यंदिशेत् वा अन्यत् करणं उद्दिशेत् ॥

भा० । ता० । सभामें प्राड्विवाक (वकील) ने यहकहाहै जिसको कि उत्तमर्ण के धनकोदेदे ऐसा अधमर्ण यदि अपह्नव अपलाप (नाहीं) करे तो कि मुझे इसकाधन नहीं देना तो अभियोक्ता (मुद्दई) जिसजगह धनादियाहो उसजगह के साक्षीकोदे क्योंकि स्त्री और मूर्खादिकों के ऋणका निर्णय साक्षियोंसेही होताहै अथवा अन्यपत्र आदि (अधमर्ण का लिखाहुआ) कारण उत्तमर्ण कहे ५२ ॥

अदेश्यंयश्चदिशतिनिर्दिश्यापह्नुतेचयः।यश्चाधरोत्तरानर्थान्विगीतान्नावबुद्ध्यते ५३
अपदिश्यापदेश्यंचपुनर्यस्त्वपधावति।सम्यक्प्रणिहितंचार्थंपृष्टःसन्नाभिनन्दति५४॥
असंभाष्येसाक्षिभिश्चदेशेसंभाषतेमिथः।निरुच्यमानंप्रश्नंचनेच्छेद्यश्चापिनिष्पतेत्५५
ब्रूहीत्युक्तश्चनब्रूयादुक्तंचनविभावयेत् । नचपूर्वापरंविद्यात्तस्मादर्थात्सहीयते ५६ ॥

प० । अदेश्यं यः च दिशति निर्दिश्य अपह्नुते च यः च अधरोत्तरान् अर्थान् विगीतान् न अवबुद्ध्यते ॥

प०।अपदिश्य अपदेश्यं च पुनः यः तु अपधावति सम्यक् प्रणिहितं च अर्थं पृष्टः सन् न अभिनंदति॥

प०।असंभाष्ये साक्षिभिः च देशे संभाषते मिथः निरुच्यमानं प्रश्नं च न इच्छेत् यः च अपि निष्पतेत्॥

प० । ब्रूहि इति उक्तः च न ब्रूयात् उक्तं च न विभावयेत् न च पूर्वापरं विद्यात् तस्मात् अर्थात् सः हीयते ॥

यो० । यः उत्तमर्णः अदेश्यं दिशति यः चपुनः निर्दिश्य अपह्नुते चपुनः यः अधरोत्तरान् अर्थान् विगीतान् न अवबुद्ध्यते चपुनः अपदेश्यं अपदिश्य पुनः अपधावति चपुनः पृष्टः सन सम्यक् प्रणिहितं अर्थं न अभिनंदति यः असंभाष्ये

देशे साक्षिभिः सहमिथः संभाषते यः निरूच्यमाणं प्रश्नं न इच्छेत् चपुनः यः निष्पतेत् यः ब्रूहीति उक्तस्सन् न ब्रूयात् चपुनः उक्तं न विभावयेत् चपुनः यः पूर्वापरं न विद्यात् सः उत्तमर्णः तस्मात् अर्थात् हीयते तं धनं न लभते इत्यर्थः॥

भार्यापुत्रश्चदासश्चप्रेष्योभ्राताचसोदरः।प्राप्तापराधास्ताड्याःस्यूरज्ज्वावेणुदलेनवा२९९

प० । भार्या पुत्रः च दासः च प्रेष्यः भ्राता च सोदरः प्राप्तापराधाः ताड्याः स्युः रज्ज्वा वेणुदलेन वा ॥

यो० । भार्या- पुत्रः- दासः- प्रेष्यः चपुनः सोदरः भ्राता प्राप्तापराधाः एते रज्ज्वा वा वेणुदलेन ताड्याः स्युः ॥

भा० । ता० । स्त्री–पुत्र–दास–भृत्य–और सोदर (सगा) भाई ये सब, कोई अपराधकरें तो रज्जु (रस्सी) और बांसकी पतली लकड़ीसे शिक्षाकेलिये इनकीताडनाकरै और कोई दंडनदे२९९॥

पृष्ठतस्तुशरीरस्यनोत्तमांगेकथंचन । अतोन्यथातुप्रहरन्प्राप्तःस्याच्चौरकिल्बिषम् ३०० ॥

प०। पृष्ठतः तु शरीरस्य न उत्तमांगे कथंचन अतः अन्यथा तु प्रहरन् प्राप्तः स्यात् चौरकिल्बिषम् ॥

यो० । शरीरस्य पृष्ठतः भार्यादयः ताड्याः स्युः उत्तमांगे (शिरसि) कथंचन ताड्याः नस्युः अतः अन्यथा प्रहरन् सन् चौरकिल्बिषं प्राप्तःस्यात् ॥

भा० । ता० । यदि रज्जु और बांस दलसे स्त्री आदिकोंको ताडनादे तो शरीरकी पीठपरदे और उत्तमअंग (शिर) पर कभी भी ताडना नदे क्योंकि पूर्वोक्त प्रकारसे अन्यथा ताडताहुआ मनुष्य चौर के दंडको प्राप्तहोताहै ३०० ॥

एषोऽखिलेनाभिहितोदंडपारुष्यनिर्णयः । स्तेनस्यातःप्रवक्ष्यामिविधिंदण्डविनिर्णये २०१॥

प० । एषः अखिलेन अभिहितः दंडपारुष्यनिर्णयः स्तेनस्य अतः प्रवक्ष्यामि विधिं दंडविनिर्णये ॥

यो० । एषः दंडपारुष्यनिर्णयः अखिलेन मया अभिहितः अतः परं स्तेनस्य दंडविनिर्णये विधिं प्रवक्ष्यामि ॥

भा० । ता० । यह सम्पूर्ण दंडकी कठोरता का निर्णय मैंनेकहा इसके अनन्तर स्तेन (चोर) के दंडके निर्णयकी विधिको कहताहूं २०१ ॥

परमंयत्नमातिष्ठेत्स्तेनानांनिग्रहेनृपः । स्तेनानांनिग्रहादस्ययशोराष्ट्रंचवर्द्धते ३०२ ॥

प० । परमं यत्नं आतिष्ठेत् स्तेनानां निग्रहे नृपः स्तेनानां निग्रहात् अस्य यशः राष्ट्रं च वर्द्धते ॥

यो० । स्तेनानां निग्रहे नृपः परमंयत्नं आतिष्ठेत् कुतः स्तेनानां निग्रहात् अस्य यशः चपुनःराष्ट्रं वर्द्धते ॥

भा० । ता० । चोरों के निग्रह अर्थात् नियमन (ताडनासे नष्टकरना) में राजा परमयत्नकरै क्योंकि चोरोंके निग्रहसे इसराजा का यश और देश ये दोनों बढ़ते हैं अर्थात् उपद्रवों की शांति से देशमें सुखचैन रहताहै ३०२ ॥

अभयस्यहियोदातासपूज्यःसततंनृपः । सत्रंहिवर्धतेतस्यसदैवाभयदक्षिणम् ३०३ ॥

प० । अभयस्य हि यः दाता सः पूज्यः सततं नृपः सत्रं हि वर्द्धते तस्य सदा एव अभयदक्षिणम्

यो० । यः नृपः सततं अभयस्य दाता भवति सः पूज्यः हि (यतः) सदा एव अभयदक्षिणं तस्य सत्रं वर्द्धते ॥

भा० । अभय के देनेवाले राजाकी निरन्तर पूजाकरै क्योंकि अभयकी है दक्षिणा जिसमें ऐसा उसराजा का यज्ञरूप देश सदैव बढ़ताहै ॥

ता० । चोरोंको दंडदेनेसे जो राजा अपनी प्रजाकी निरन्तर रक्षाकरने से राजा अभय (भयका अभाव) को देताहै वहराजा सबके पूजनेयोग्य अर्थात् श्लाघा का भागी होताहै क्योंकि उसराजाका सत्र अर्थात् समाजआदि यज्ञके समान देशबढ़ता है क्योंकि इसयज्ञ में चोरों के अभाव से प्रजाको सदैव अभयकी दक्षिणा राजा से मिलती है इससे उसराजा का प्रजारूपी यज्ञ सदैव बढ़ताहै—इतर यज्ञोंमें किसी नियत समयपर नियत दक्षिणा मिलती है इसराजाकी यज्ञमें सम्पूर्णकाल में अभय दक्षिणा प्रजाको मिलती रहती है इससे राजा इसप्रजाकी रक्षारूप यज्ञका कदाचित् भी परित्याग न करै अर्थात् सदैव चोरोंको दंडदेतारहै ३०३ ॥

सर्वतोधर्मषड्भागोराज्ञोभवतिरक्षतः । अधर्मादपिषड्भागोभवत्यस्यह्यरक्षतः ३०४॥

प० । सर्वतः धर्मषड्भागः राज्ञः भवति रक्षतः अधर्मात् अपि षड्भागः भवति अस्य हि अरक्षतः॥

यो० । रक्षतः राज्ञः सर्वेन धर्मषड्भागो भवति अरक्षतः अस्य अधर्मात् अपि षड्भागो भवति ॥

भा० । रक्षाकरनेवाले राजाको सबके धर्म में से छठाभाग और रक्षा न करनेवाले राजा को सबके अधर्ममेंसे छठाभाग मिलता है ॥

ता० । रक्षाकरनेवाले राजाको भृतिके देनेवाले व्यापारी आदिकोंसे और वेदके पढ़नेवाले श्रोत्रिय आदिकों से धर्मका छठाभाग मिलता है अर्थात् इनके पुण्यका छठाअंश राजा को मिलता है—और जो राजा प्रजाकी रक्षानहींकरता उसको व्यापारी और श्रोत्रियआदिकोंके अधर्ममें से छठाभाग राजा को मिलता है अर्थात् जो ये पापकरते हैं उसके छठेअंशका भागी राजा होताहै तिससे राजा

चोरोंको दंडदेकर बड़ेयत्नसे प्रजाकी रक्षाकरै इसमें कोई यह शंका करते हैं कि जिसमनुष्यको भृति (नौकरी) देकर मोल लेलिया उससे छठाभाग पुण्यका राजाको युक्तनहीं है—यहशंका ठीकनहीं है क्योंकि यदि धर्मसे भृति देकर मोललियाहो अथवा राजा के कोप के भय से ठीक २ भृति भृत्यको मिलीहोय तो राजा का छठाभागीहोना ठीक है और राजा ने उसकी भृति दिलाने और भृति शास्त्रोक्त है वा नहीं यह विचार न कियाहोय तो राजाको छठेअंशका भागीहोना उचितनहीं है ३०४ ॥

यदधीतेयद्यजतेयद्ददातियदर्चति । तस्यषड्भागभाग्राजासम्यग्भवतिरक्षणात् ३०५ ॥

प० । यत् अधीते यत् यजते यत् ददाति यत् अर्चति तस्य षड्भागभाक् राजा सम्यक् भवति रक्षणात् ॥

यो० । मनुष्यः यत् अधीते यत् यजते यत् ददाति यत् अर्चति सम्यक् रक्षणात् राजा तस्य षड्भागभाक् भवति ॥

भा० । ता० । मनुष्य जो पढ़ता है यज्ञकरताहै दानदेताहै देवताओंका पूजनकरताहै उस सबके छठे अंशकाभागी राजा इससे होताहै कि वह भलीप्रकार प्रजाकी रक्षा करताहै ३०५ ॥

रक्षन्धर्मेणभूतानिराजावध्यांश्चघातयन् । यजतेऽहरहर्यज्ञैःसहस्रशतदक्षिणैः ३०६ ॥

प० । रक्षन् धर्मेण भूतानि राजा वध्यान् च घातयन् यजते अहःअहः यज्ञैः सहस्रशतदक्षिणैः ॥

यो० । भूतानि धर्मेणरक्षन् चपुनः वध्यान् घातयन् सन् राजा सहस्रशतदक्षिणैः यज्ञैः अहःअहः यजते ॥

भा० । ता० । स्थावर और जंगम आदि संपूर्ण भूतों की धर्मपूर्वक अर्थात् शास्त्रके अनुसार दंड देनेसे रक्षाकरताहुआ और स्तेन आदि हिंसकोंको ताडना देताहुआ राजा लक्षमुद्राओंकीहै दक्षिणा जिनमें ऐसी यज्ञोंसे प्रतिदिन ईश्वरको पूजता है अर्थात् पूर्वोक्त यज्ञोंके पुण्यको प्राप्तहोताहै ३०६ ॥

योऽरक्षन्बलिमादत्तेकरंशुल्कंचपार्थिवः । प्रतिभागंचदंडंचससद्योनरकंव्रजेत् ३०७

प० । यः अरक्षन् बलिं आदत्ते करं शुल्कं च पार्थिवः प्रतिभागं च दंडं च सः सद्यः नरकं व्रजेत् ॥

यो० । यः पार्थिवः अरक्षन् सन् बलिं करं शुल्कं प्रतिभागं चपुनः दंडं आदत्ते सः राजा सद्यः नरकं व्रजेत् ॥

भा० । प्रजाकी रक्षा न करताहुआ जो राजा बलि, कर—शुल्क—प्रतिभाग—(भेट) दंड—(जुर्माना आदि) को लेताहै वह मरकर शीघ्र नरक में जाताहै ॥

ता० । जो राजा प्रजाकी रक्षाको न करिके बलि(अन्नका छठाभाग)जो ग्रामवासियोंसे प्रतिमास व षण्मासमें लिया जाता है वह कर और शुल्क अर्थात् स्थल और जल के व्यापारियोंसे द्रव्यके अनुसार किसी नियत स्थानपर जो लिया जाता है जिसको महसूल कहते हैं और प्रतिभाग फल पुष्प शाक तृण आदि का उपायन (भेट) प्रतिदिन जो राजाको दियाजाताहै और दंड जो व्यवहारि-(मुकद्दमवाले)यों से लिया जाता है—इन सबको ग्रहणकरता है वह राजा मरनेके अनंतरही नरक में जाता है ३०७ ॥

अरक्षितारंराजानंबलिषड्भागहारिणम् । तमाहुःसर्वलोकस्यसमग्रमलहारकम् ३०८

प० । अरक्षितारं राजानं बलिषड्भागहारिणं तं आहुः सर्वलोकस्य समग्रमलहारकम् ॥

यो० । अरक्षितारं बलिषड्भागहारिणं तं राजानं सर्वलोकस्य समग्रमलहारकं बुधाः आहुः ॥

भा०। ता०। प्रजाकी रक्षा न करने और बलिका छठाभाग लेनेवाले उस राजाको संपूर्ण जगत् के समग्र पापोंकाभागी विद्वानोंने कहा है ३०८॥

अनपेक्षितमर्यादंनास्तिकंविप्रलुम्पकम्। अरक्षितारमत्तारंनृपंविद्यादधोगतिम् ३०९

प०। अनपेक्षितमर्यादं नास्तिकं विप्रलुंपकं अरक्षितारं अत्तारं नृपं विद्यात् अधोगतिम्॥

यो०। अनपेक्षितमर्यादं नास्तिकं विप्रलुंपकं अरक्षितारं अत्तारं नृपं अधोगतिं विद्यात्॥

भा०। ता०। जो राजा मर्यादाकी अपेक्षा न करै अर्थात् शास्त्रोक्त रीतिसे न वर्ते और जो नास्तिकहो अर्थात् परलोक को न माने और जो विप्रलुम्पक अनुचित दंड आदि से धनका ग्रहण करै और जो प्रजाकीरक्षा न करै और अन्न आदिके करको भक्षणकरै ऐसे राजाको नरकगामिजानै ३०९॥

अधार्मिकंत्रिभिर्न्यायैर्निगृह्णीयात्प्रयत्नतः। निरोधनेनवन्धेनविविधेनवधेनच ३१०॥

प०। अधार्मिकं त्रिभिः न्यायैः निगृह्णीयात् प्रयत्नतः निरोधनेन बंधेन विविधेन वधेन च॥

यो०। राजानिरोधनेन, बंधेन, चपुनः विविधेन वधेन एभिस्त्रिभिः न्यायैः अधार्मिकं प्रयत्नतः निगृह्णीयात्॥

भा०। ता०। राजा चोर आदि अधर्मियोंको अपराधके अनुसार इन तीनों न्यायोंसे निगृहीत (वशीभूत) करै कि निरोधन अर्थात् कारागार (कैदखान) में प्रवेशकरनेसे और बंधन (बेड़ीडालना) से और विविध, (अनेकप्रकार) के कर चरणछेदन आदिकोंकी हिंसाओंसे ३१०॥

निग्रहेणहिपापानांसाधूनांसंग्रहेणच। द्विजातयइवेज्याभिःपूयन्तेसततंनृपाः ३११॥

प०। निग्रहेण हि पापानां साधूनां संग्रहेण च द्विजातयः इव इज्याभिः पूयंते सततं नृपाः॥

यो०। पापानां निग्रहेण चपुनः साधूनां संग्रहेण इज्याभिः द्विजातयः इव नृपाः सततं पूयंते॥

भा०। ता०। पापियों को दंडदेने और साधुओंपर अनुग्रह करने से राजा इसप्रकार निरंतर पवित्र होतेहैं जैसे यज्ञोंके करनेसे तीनों द्विजाती अर्थात् ब्राह्मण,क्षत्री, वैश्य इससे राजा पापियोंको दंडदे और साधुओंपर अनुग्रहकरै ३११॥

क्षन्तव्यंप्रभुणानित्यंक्षिपतांकार्यिणांनृणाम्।बालवृद्धातुराणांचकुर्वताहितमात्मनः३१२

प०। क्षंतव्यं प्रभुणा नित्यं क्षिपतां कार्यिणां नृणां बालवृद्धातुराणां च कुर्वता हितं आत्मनः॥

यो०। आत्मनः हितं कुर्वता प्रभुणा कार्यिणां नृणां क्षिपतां चपुनः बालवृद्धातुराणां नित्यं क्षंतव्यं॥

भा०। ता०। अपने हितको चाहताहुआ राजा कार्यवाले मनुष्योंके अर्थात् अर्थि प्रत्यर्थि (मुद्दई, मुद्दआअलेह) के और बालक, वृद्ध,और रोगियोंके आक्षेप (अनुचित वचन) की सदैव क्षमाकरै—अर्थात् ये सब दुःखितहोकर असावधानीसे कोई अनुचितवचनभी कहदें तो उसकी क्षमाकरै (सहले) ३१२॥

यःक्षिप्तोमर्षयत्यार्तैस्तेनस्वर्गेमहीयते। यस्त्वैश्वर्यान्नक्षमतेनरकंतेनगच्छति ३१३॥

प०। यः क्षिप्तः मर्षयति आर्तैः तेन स्वर्गे महीयते यः तु ऐश्वर्यात् न क्षमते नरकं तेन गच्छति॥

यो०। आर्तैः क्षिप्तः यः राजा मर्षयति सः तेन स्वर्गे महीयते तुपुनः यः ऐश्वर्यात् न क्षमते तेन नरकं गच्छति॥

भा०। ता०। दुःखीहुये मनुष्यों के कठोर वचनों को जो राजा सहताहै वह राजा उक्त वचनों

के सहनेसे स्वर्गमें पूजाको प्राप्तहोताहै और जो राजा अपनी प्रभुतासे क्षमा नहीं करता वह राजा क्षमाके न करने से नरक में जाताहै ३१३ ॥

राजास्तेनेनगन्तव्योमुक्तकेशेनधावता।आचक्षाणेनतत्स्तेयमेवंकर्मास्मिशाधिमाम् ३१४
स्कन्धेनादायमुसलंलगुडंवापिखादिरम्।शक्तिंचोभयतस्तीक्ष्णामायसंदण्डमेववा ३१५

प० । राजा स्तेनेन गंतव्यः मुक्तकेशेन धावता आचक्षाणेन तत् स्तेयं एवंकर्मा अस्मि शाधि माम् ॥

प० । स्कंधेन आदाय मुसलं लगुडं वा अपि खादिरं शक्तिं च उभयतः तीक्ष्णां आयसं दंडं एव वा ॥

यो० । स्कंधेन मुसलं वा खादिरं लगुडं उभयतः तीक्ष्णां शक्तिं वा आयसं दंडं मुक्तकेशेन धावता एवंकर्मा अहं अस्मि त्वं मांशाधि इति तत्स्तेयं आचक्षाणेन स्तेनेनराजागंतव्यः ॥

भा० । मैं चौरहूं मुझे शिक्षादो यहकहताहुआ केशों को खोलकर बड़ीशीघ्रतासे चोर अपने कांधे पर मुसल वा खैरकादंड वा दोनोंतरफ पैनीबर्छी वा लोहेकादंड इनकोरखकर राजाके समीपजाय॥

ता० । केशोंको खोलकर दौड़ताहुआ और ब्राह्मणका सुवर्ण मैंनेचुरायाहै इससे तुमसुझे शिक्षा दो अर्थात् मारदो इसप्रकार अपनीचोरीको कहताहुआ चोर अपने कांधपर मुसल अथवा खैरकादंड अथवा दोनोंतरफ पैनीधारवाली शक्ति (बर्छी) अथवा लोहेकादंड रखकर राजाकेसमीप चलाजाय यद्यपि सुवर्ण की चोरीका प्रायश्चित्त प्रायश्चित्त के प्रकरण में कहेंगे तथापि सुवर्ण की चोरीकरने वाले को यह राजाका दंडहोताहै इसलिये यहां दंडप्रकरणमें इसकालिखना उचितहै ३१४।३१५॥

शासनाद्वाविमोक्षाद्वास्तेनःस्तेयाद्विमुच्यते। अशासित्वातुतंराजास्तेनस्याप्नोतिकिल्बिषम्३१६

प० । शासनात् वा विमोक्षात् वा स्तेनः स्तेयात् विमुच्यते अशासित्वा तु तं राजा स्तेनस्य आप्नोति किल्बिषम् ॥

यो० । शासनात् वा विमोक्षात् स्तेयात् स्तेनं विमुच्यते राजा तु तं अशासित्वा स्तेनस्य किल्बिषं आप्नोति ॥

भा० । चौरको शिक्षादेनेसे वा छोड़नेसे चोर अपने पापसे छूटताहै यदि राजा चौरको शिक्षा न दे तो राजाही चोरके पापका भागी होताहै ॥

ता० । एकवार मुसल के प्रहारसे यदि चौरके प्राणोंका परित्यागहोजाय अथवा मृतकके समान जीतेहुयेकोही राजा छोड़दे तो वह चौर उससोनेकी चोरी के पापसे छूटजाताहै क्योंकि याज्ञवल्क्य ऋषिने इस वचनसे यहकहाहै कि मुसलादिक के प्रहारसे पीडित और मृतक के तुल्य चौर जीता हुआ भी शुद्धहोजाता है और यदि राजा उसको किसीप्रकार के दयाभावसे न मारे तो उसचौरका पाप राजाको प्राप्तहोता है ३१६ ॥

अन्नादेभ्रूणहामार्ष्टिपत्यौभार्यापचारिणी।गुरौशिष्यश्चयाज्यश्चस्तेनोराजनिकिल्बिषम्३१७

प० । अन्नादे भ्रूणहा मार्ष्टि पत्यौ भार्या अपचारिणी गुरौ शिष्यः च याज्यः च स्तेनः राजनि किल्बिषम् ॥

यो० । भ्रूणहा अन्नादे अपचारिणी भार्या पत्यौ शिष्यः चपुनः याज्य. गुरौ स्तेनः राजनि किल्बिषं मार्ष्टि ॥

---

१ मृतकल्पः प्रहारार्त्तो जीवन्नपिविशुद्ध्यति ॥

भा०। ब्रह्महत्यारे का पाप अन्नखानेवालेको औ व्यभिचारिणी स्त्रीकापाप पतिको शिष्यकापाप गुरुको यजमानकापाप यज्ञकरानेवाले को और चौर का पाप राजाको लगताहै इससे राजा चौरको अवश्यदंडदे ॥

ता०। ब्रह्महत्यारा अन्नके भक्षणकरनेवाले में अपने पापको समर्पण करता है अर्थात् जो पाप ब्रह्महत्यारे को होताहै वही उसके अन्नभक्षणकरनेवाले को होताहै यह नहींसमझना कि ब्रह्महत्यारे का पाप नष्ट होताहै और व्यभिचार करनेवाली स्त्री अपने पतिको पापका समर्पण करती है-यदि पति उस जारकी क्षमाकरै तो पतिभी उसी पापको प्राप्तहोताहै जिसकी वह स्त्री होतीहै और शिष्य अपने गुरुमें अपने पापको अर्प्पण करताहै यदि गुरु शिष्य के सन्ध्यक और अग्निहोत्र आदि न करनेको सहताहो और याज्य यज्ञ करता हुआ यजमान किसी विधिको त्यागदे और यज्ञ करानेवाला उसकी क्षमाकरै अर्थात् शिक्षा न दे तो याजक में अपने पापको समर्प्पण करताहै और चौर अपने पापको राजाको समर्प्पण करता है यदि राजा चोर को छोड़दे और दण्ड न दे ३१७ ॥

राजनिर्धूतदण्डास्तुकृत्वापापानिमानवाः।निर्मलाःस्वर्गमायान्तिसन्तःसुकृतिनोयथा३१८॥

प०। राजनिर्द्धूतदंडाः तु कृत्वा पापानि मानवाः निर्मलाः स्वर्गं आयांति सन्तः सुकृतिनः यथा ॥

यो०। पापानि कृत्वा राजनिर्द्धूतदंडाः मानवाः यथा सुकृतिनः सन्तः तथा निर्मलाः स्वर्गं आयांति ॥

भा०। ता०। किया है पाप जिन्होंने ऐसे मनुष्य राजाके दण्ड देनेपर निर्मल हुये इस प्रकार स्वर्ग में जातेहैं जैसे पुण्यात्मासाधु इससे दण्डभी प्रायश्चित्त के समान पापका नाशकारक होता है ३१८ ॥

यस्तुरज्जुंघटंकूपाद्धरेद्भिद्याच्चयःप्रपाम्।सदण्डंप्राप्नुयान्माषंतच्चतस्मिन्समाहरेत्३१९

प०। यः तु रज्जुं घटं कूपात् हरेत् भिद्यात् च यः प्रपां सः दण्डं प्राप्नुयात् माषं तत् च तस्मिन् समाहरेत् ॥

यो०। यः पुरुषः कूपात् रज्जुं वा घटंहरेत्—चपुनः यः प्रपां भिद्यात् सः माषं दण्डं प्राप्नुयात् चपुनः तत् (रज्ज्वादिकं) तस्मिन् (कूपे) समाहरेत् (समर्पयेत्) ॥

भा०। ता०। जो मनुष्य जलभरने को कूपपर रक्खीहुई रज्जु और घटको चुरावै अथवा प्याऊ को नष्टकरदे तो वे दोनों मनुष्य एक मासे सोनेके दण्डको प्राप्त होतेहैं—क्योंकि इसे कात्यायन के वचनसे सोने का माषाही शास्त्रोक्त दण्ड प्रतीत होता है और उस रज्जु और घट को कुयेंके ऊपर समर्प्पण करिदे ३१९ ॥

धान्यंदशभ्यःकुम्भेभ्योहरतोऽभ्यधिकंवधः।शेषेप्येकादशगुणंदाप्यस्तस्यचतद्धनम्३२०

प०। धान्यं दशभ्यः कुम्भेभ्यः हरतः अभ्यधिकं वधः शेषे अपि एकादशगुणं दाप्यः तस्य च तत् धनम् ॥

यो०। दशभ्यः कुम्भेभ्यः अभ्यधिकं धान्यं हरतः पुरुषस्य राज्ञा वधः कर्तव्यः शेषे (दशपर्यन्ते) हृते सति एकादशगुणं चपुनः तस्य अन्नस्वामिनः तत् धनं राज्ञा दाप्यः (दण्डनीयः) ॥

१ यन्निर्दिष्टंतु सौवर्णं माषं तत्र प्रकल्पयेत् ॥

भा० । ता० । जो मनुष्य दश कुम्भों (घट) से अधिक चोरी करै उस मनुष्यका राजा वधकरदे अर्थात् चौर अन्नके स्वामी इनके गुणकी अपेक्षासे ताडन, अंगछेदन और मारणका दण्डराजादे और यदि एकसे लेकर दश पर्यंत कुम्भ अन्नकी चोरी करै और उसको छिपावै तो ग्यारहगुणा दण्ड राजाले और अन्नके स्वामी का धन चौरसे दिलादे—और दोसौपल अन्नको द्रोण कहतेहैं और बीस द्रोण का एक कुम्भ होताहै ३२० ॥

तथाधरिममेयानांशतादभ्यधिकेवधः । सुवर्णरजतादीनामुत्तमानांचवाससाम् ३२१ ॥

प० । तथा धरिममेयानां शतात् अभ्यधिके वधः सुवर्णरजतादीनां उत्तमानां च वाससाम् ॥

यो० । तथा धरिममेयानां अन्नानां, सुवर्णरजतादीनां, चपुनः उत्तमानां वाससां, शतात् अभ्यधिके हृते सति राज्ञावधः कर्तव्यः ॥

भा० । ता० । तिसी प्रकार तुला (तकडी) में तोलने योग्य अन्नों और सुवर्ण, चांदी, और उत्तम वस्त्र, पशु आदिकोंको शत (सौ) से अधिक की चोरी करै तो राजा चौर को मारिदे यहांपरभी अधिक और न्यून दण्डका विचार देश,काल,चौरकी जाति,और गुणकी अपेक्षासे राजाकरले ३२१ ॥

पञ्चाशतस्त्वभ्यधिकेहस्तच्छेदनमिष्यते।शेषेत्वेकादशगुणंमूल्याद्दण्डंप्रकल्पयेत् ३२२

प० । पंचाशतः तु अभ्यधिके हस्तच्छेदनं इष्यते शेषे तु एकादशगुणं मूल्यात् दण्डं प्रकल्पयेत् ॥

यो० । पञ्चाशतः अभ्यधिके हृते सति हस्तच्छेदनं इष्यते शेषे (पञ्चाशदन्तरे) हृते सति मूल्यात् दशगुणं दण्डं प्रकल्पयेत् ॥

भा० । ता० । यदि पूर्वोक्त अन्न और सुवर्ण आदि की पचास से अधिक चोरी करै तो राजा चौर के हाथों को छेदन करिदे यदि पचासके भीतरही चुरावे तो मोल से ग्यारहगुणा दण्ड राजा चौर को दे ३२२ ॥

पुरुषाणांकुलीनानांनारीणांचविशेषतः । मुख्यानांचैवरत्नानांहरणेवधमर्हति ३२३ ॥

प० । पुरुषाणां कुलीनानां नारीणां च विशेषतः मुख्यानां च एव रत्नानां हरणे वधं अर्हति ॥

यो० । कुलीनानां पुरुषाणां चपुनः विशेषतः नारीणां चपुनः मुख्यानां रत्नानां हरणेसति चोरः वधं अर्हति ॥

भा० । ता० । यदि चौर अच्छे कुलके मनुष्यों की और विशेष कर स्त्रियों की और उत्तम २ रत्नों (वज्र वैडूर्य आदि) की चोरी करै तो राजा चौर को मार दे ३२३ ॥

महापशूनांहरणेशस्त्राणामौषधस्यच । कालमासाद्यकार्यंचदण्डंराजाप्रकल्पयेत् ३२४॥

प० । महापशूनां हरणे शस्त्राणां औषधस्य च कालं आसाद्य कार्यं च दण्डं राजा प्रकल्पयेत् ॥

यो० । महापशूनां हरणे शस्त्राणां चपुनः औषधस्य कालं चपुनः कार्यं आसाद्य राजा दण्डं प्रकल्पयेत् ॥

भा० । ता० । हाथी, अश्व, गौ, भैंस आदि बडे २ पशु और खड्ग आदि शस्त्र और घृत आदि औषध इनकी जो चोरी करै उसको दुर्भिक्ष आदि काल के अनुसार न्यून वा अधिक दण्ड राजा दे ३२४ ॥

गोषुब्राह्मणसंस्थासुछुरिकायाश्चभेदने । पशूनांहरणेचैवसद्यःकार्योऽर्धपादिकः ३२५॥

प० । गोषु ब्राह्मणसंस्थासु छुरिकायाः च भेदने पशूनां हरणे च एवं सद्यः कार्यः अर्धपादिकः ॥

यो० । ब्राह्मणसंस्थासु गोषु हृतासु चपुनः गवां छुरिकायाः भेदने सति चपुनः पशूनां हरणे सति राज्ञा सद्यः अर्धपादिकः दण्डः कार्यः ॥

भा० । ता० । ब्राह्मण की गौओं के हरने और जोतने के लिये बन्ध्या होने पर छुरी से नाकके छेदन में और बकरी, भेड़ आदि पशुओं के यज्ञके लिये चोरी करने में आधा पाद दण्ड दे अर्थात् छेदन के दण्डसे आधा दण्ड दे ३२५ ॥

सूत्रकार्पासकिण्वानांगोमयस्यगुडस्यच।दध्नःक्षीरस्यतक्रस्यपानीयस्यतृणस्यच३२६
वेणुवैदलभाण्डानांलवणानांतथैवच। मृन्मयानांचहरणेमृदोभस्मनएवच ३२७ ॥
मत्स्यानांपक्षिणांचैवतैलस्यचघृतस्यच।मांसस्यमधुनश्चैवयच्चान्यत्पशुसंभवम्३२८॥
अन्येषांचैवमादीनामद्यानांमोदकस्यच।पक्वान्नानांचसर्वेषांतन्मूल्याद्द्विगुणोदमः३२९

प० । सूत्रकार्पासकिण्वानां गोमयस्य गुडस्य च दध्नः क्षीरस्य तक्रस्य पानीयस्य तृणस्य च ॥

प० । वेणुवैदलभाण्डानां लवणानांतथा एवं च मृन्मयानां च हरणे मृदः भस्मनः एवं च ॥

प० । मत्स्यानां पक्षिणां च एव तैलस्य च घृतस्य च मांसस्य मधुनः च एवं यत् च अन्यत् पशुसम्भवम् ॥

प० । अन्येषां च एवमादीनां अद्यानां मोदकस्य च पक्वान्नानां च सर्वेषां तन्मूल्यात् द्विगुणः दमः॥

यो० । सूत्रकार्पासकिण्वानां— गोमयस्य गुडस्य —दध्नः क्षीरस्य तक्रस्य पानीयस्य— चपुनः तृणस्य—वेणु वैदलभाण्डानां लवणानां चपुनःमृन्मयानां—मृदः चपुनः भस्मनः मत्स्यानां —पक्षिणां तैलस्य—घृतस्य—मांसस्य—मधुनः चपुनः यत् अन्यत् पशुसम्भवं तस्य चपुनः एवमादीनां अन्येषां अद्यानां चपुनः मोदकस्य चपुनः सर्वेषां पक्वान्नानां हरणे सति राज्ञा तन्मूल्यात् द्विगुणः दमः कार्यः ॥

भा० । ता० । ऊन आदि का सूत्र और कपास और किण्व (मदिराकाबीज) गोमय, गुड, दही दूध, मठा, जल और तृण और बांस के दलसे बने हुये पात्र और लवण और मट्टी के पात्र और मट्टी, भस्म, और मत्स्य, पक्षी, तेल, घी, मांस, मधु (सहत) और पशुसे पैदा हुये अन्य (मृगचर्म सींग ढाल आदि) और ऐसेही तुच्छ मनसिल आदि पदार्थ और पक्वान्न और मोदक इन सम्पूर्ण वस्तुओंकी जो चोरीकरे उसको जितनेकी जो वस्तु हो उससे दूना दण्ड राजा दे ३२६ । ३२९ ॥

पुष्पेषुहरितेधान्येगुल्मवल्लीनगेषुच।अन्येष्वपरिपूतेषुदण्डःस्यात्पञ्चकृष्णलः३३० ॥

प० । पुष्पेषु हरिते धान्ये गुल्मवल्लीनगेषु च अन्येषु अपरिपूतेषु दंडः स्यात् पंचकृष्णलः ॥

यो० । पुष्पेषु हरिते धान्ये गुल्मवल्लीनगेषु चपुनः अन्येषु अपरिपूतेषु हृतेषु पञ्चकृष्णलः दण्डःस्यात् ॥

भा० । ता० । पुष्प—और क्षेत्र में खड़ाहुआ हरा अन्न—और गुल्म—लता—वृक्ष और अन्य जो अपरिपूत (जिनको समर्थ पुरुष भार बांधकर लेजासके) इन सब की चोरी में चोर के देश और काल के अनुसार चांदी वा सोने के पांच कृष्णल (मासाभर) दण्ड राजा दे ३३० ॥

परिपूतेषुधान्येषुशाकमूलफलेषुच। निरन्वयेशतंदण्डःसान्वयेऽर्द्धशतंदमः ३३१ ॥

प० । परिपूतेषु धान्येषु शाकमूलफलेषु च निरन्वये शतं दण्डः सान्वये अर्द्धशतं दमः ॥

यो० । परिपूतेषु धान्येषु चपुनः शाकमूलफलेषु हृतेषु सत्सु निरन्वये शतं दण्डः सान्वये अर्द्धशतं दमः राज्ञा देयः ॥

भा० । ता० । यदि परिपूत रक्षा किये हुये वृक्ष और अन्न शाक मूल फल इनको कोई ऐसा पुरुष चुरावे जिसके संग स्वामी का कोई सम्बन्ध न होय (जैसे एक ग्राम में बसना आदि) तो उसको सौ पण दण्ड राजा दे और यदि स्वामी के संग कोई सम्बन्ध होय तो पचास पण दण्ड दे यह दण्ड उस अन्न पर है जो स्थल (खलियाना वा पैर) में रक्खाहो यदि घरमें रक्खे हुये अन्नको चुरावे तो पूर्वोक्त से ग्यारहगुणा दण्ड होता है ३३१ ॥

स्यात्साहसंत्वन्वयवत्प्रसभंकर्मयत्कृतम् । निरन्वयंभवेत्स्तेयंहृत्वापव्ययतेचयत् ३३२ ॥

प० । स्यात् साहसं तु अन्वयवत् प्रसभं कर्म यत् कृतं निरन्वयं भवेत् स्तेयं हृत्वा अपव्ययते च यत् ॥

यो० । यत्कर्म प्रसभं कृतं तत् अन्वयवत् चेत् भवेत् साहसं स्यात् निरन्वयं चेत् यत् हृत्वा अपव्ययते तत्कर्म स्तेयं भवेत् ॥

भा० । ता० । जो पूर्वोक्त अन्न आदि की चोरी रूप कर्म द्रव्यके स्वामी के समक्ष (सामने) बल से किया जाय उसे साहस कहते हैं क्योंकि सह नाम बल का है उस से जो किया जाय उसे साहस कहते हैं इस में राजा चोरी का दण्ड न दे और जो द्रव्य स्वामी के परोक्ष (पीछे) हरा जाय उसे और जिसको चुराकर अपह्नव (मुकरना) किया जाय उसको स्तेय (चोरी) कहते हैं ३३२ ॥

यस्त्वेतान्युपक्लृप्तानिद्रव्याणिस्तेनयेन्नरः । तमाद्यंदण्डयेद्राजायश्चाग्निंचोरयेद्गृहात् ३३३

प० । यः तु एतानि उपक्लृप्तानि द्रव्याणि स्तेनयेत् नरः तं आद्यं दण्डयेत् राजा यः च अग्निं चोरयेत् गृहात् ॥

यो० । यः नरः उपक्लृप्तानि एतानि द्रव्याणि स्तेनयेत् चपुनः यः गृहात् अग्निं चोरयेत् तं राजा आद्यं साहसं दण्डयेत् ॥

भा० । अपने वर्तने के लिये स्वामीने रक्खेहुये सूत आदि द्रव्योंको किसी के घरमेंसे होमकी अग्निको जो चुरावे उसको राजा प्रथम साहस दंड दे ॥

ता० । जो इन पूर्वोक्त सूत आदि द्रव्योंको चुरावे ये द्रव्य स्वामीने अपने भोगने के लिये स्वच्छ कर २ रक्खेहों और जो मनुष्य किसी के घरमें से आहवनीय आदि तीनों अग्नियोंको चुरावे इन दोनों मनुष्योंको राजा प्रथम साहस दंडदे और आधान अग्निकी उपेक्षा करनेवाले स्वामी को भी किंचित् दंडदे गोविंदराजने तो लौकिक अग्निके चुराने वाले को यह दंड कहा है सो ठीक नहीं क्योंकि थोडे अपराधपर अधिक दंड अयुक्त है ३३३ ॥

येनयेनयथांगेनस्तेनोनृपुविचेष्टते । तत्तदेवहरेत्तस्यप्रत्यादेशायपार्थिवः ३३४ ॥

प० । येन येन यथा अंगेन स्तेनः नृपु विचेष्टते तत् तत् एव हरेत् तस्य प्रत्यादेशाय पार्थिवः ॥

यो० । येन येन अंगेन स्तेनः नृपु यथा विचेष्टते तस्य तत् तत् एव अंगं प्रत्यादेशाय पार्थिवः हरेत् ॥

भा० । ता० । जिस २ अंगसे मनुष्यों के धनचुरानेमें जिस २ प्रकार से चौर विरुद्ध (धनकाचुराना) की चेष्टाकरताहै उसी २ अंगका उसकी चोरी के पापसे निवृत्ति के लिये राजा छेदन करदे और यह अंगका छेदन धन और स्वामीकी बडाई की अपेक्षा से करे ३३४ ॥

पिताचार्यःसुहन्माताभार्यापुत्रःपुरोहितः।नादण्ड्योनामराज्ञोऽस्तियःस्वधर्मेनतिष्ठति ३३५

प० । पिता आचार्यः सुहृत् माता भार्या पुत्रः पुरोहितः न अदंड्यः नाम राज्ञः अस्ति यः स्वधर्मे न तिष्ठति ॥

यो० । यः पिता-आचार्यः-सुहृत्-माता-भार्या-पुत्रः-पुरोहितः- स्वधर्मे न तिष्ठति सः राज्ञः अदंड्यः नाम न अस्ति ॥

भा० । ता० । यदि पिता आचार्य मित्र-माता-स्त्री-पुत्र-और पुरोहित-इनमेंसे कोई अपनेधर्म पर न टिकै तो यह बात प्रसिद्ध है कि राजाको अदंड्य (दंडदेने के अयोग्य) कोई नहीं हैं अर्थात् अपराधकरने पर इनको भी राजा दंडदे ३३५ ॥

कार्षापणंभवेद्दण्ड्योयत्रान्यःप्राकृतोजनः। तत्रराजाभवेद्दण्ड्यःसहस्रमितिधारणा ३३६ ॥

प० । कार्षापणं भवेत् दंड्यः यत्र अन्यः प्राकृतः जनः तत्र राजा भवेत् दंड्यः सहस्रं इति धारणा ॥

यो० । यत्र अपराधे अन्यः प्राकृतः जनः तत्र कार्षापणं दंडः भवेत् तत्र अपराधे राजा सहस्रं पणं दंड्यः भवेत् इति धारणा (निश्चयः) अस्ति ॥

भा० । ता० । जिस अपराधके करने पर राजासे अन्य प्राकृत मनुष्यको एक कार्षापण दंडहोता है उसी अपराधके करने पर राजाको सहस्र पण दंडहोताहै यही शास्त्रका निश्चयहै और राजा उस अपने दंडके द्रव्यको जलमें गेरदे अथवा ब्राह्मणोंको देदे क्योंकि आगे मनुजीही वरुणको दंड का स्वामी कहेंगे ३३६ ॥

अष्टापाद्यंतुशूद्रस्यस्तेयेभवतिकिल्बिषम्।षोडशैवतुवैश्यस्यद्वात्रिंशत्क्षत्रियस्यच ३३७ ॥
ब्राह्मणस्यचतुःषष्टिःपूर्णंवापिशतंभवेत्। द्विगुणावाचतुःषष्टिस्तद्दोषगुणविद्धिसः ३३८ ॥

प० । अष्टापाद्यं तु शूद्रस्य स्तेये भवति किल्बिषं षोडश एव तु वैश्यस्य द्वात्रिंशत् क्षत्रियस्य च ॥

प० । ब्राह्मणस्य चतुःषष्टिः पूर्णं वा अपि शतं भवेत् द्विगुणा वा चतुःषष्टिः तत्दोषगुणवित् हि सः ॥

यो० । हि (यतः) सः तद्दोषगुणवित् अतः शूद्रस्य स्तेये अष्टापाद्यं (अष्टगुणं) वैश्यस्य षोडश एव चपुनः क्षत्रियस्य द्वात्रिंशत् किल्बिषं भवति ब्राह्मणस्य चतुःषष्टिः वा पूर्णशतं वा द्विगुणा चतुःषष्टिः किल्बिषं भवेत् ॥

भा० । ता० । जिस पदार्थ की चोरी में जो दंड कहा है वह चोरीके गुण दोषोंको जाननेवाले मनुष्योंको इसप्रकार राजाको देना चाहिये कि शूद्रको आठगुणा वैश्यको सोलहगुणा क्षत्रियकोबत्तीसगुणा और ब्राह्मणको चौसठगुणा वा सौगुणा अथवा एकसौ अट्ठाईसगुणा दंडहोताहै ब्राह्मणको यह तीनप्रकारका दंड ब्राह्मणके गुणोंकी अपेक्षासे देना चाहिये क्योंकि सबसे अधिक गुण दोषके ज्ञाता ब्राह्मणही हैं ३३७ । ३३८ ॥

वानस्पत्यंमूलफलंदार्वग्न्यर्थंतथैवच। तृणंचगोभ्योग्रासार्थमस्तेयंमनुरब्रवीत् ३३९ ॥

प० । वानस्पत्यं मूलफलं दारु अग्न्यर्थं तथा एव च तृणं च गोभ्यः ग्रासार्थं अस्तेयं मनुः अब्रवीत् ॥

यो० । वानस्पत्यं-मूलफलं- चपुनः तथैव अग्न्यर्थं दारु चपुनः गोभ्यः ग्रासार्थं तृणं मनुः अस्तेयं अब्रवीत् ॥

भा० । वनस्पति के फूल, मूल, फल-होमके लिये काठ गौओंके लिये तृण इनको मनुजी ने अस्तेय कहा है अर्थात् इनकी चोरी चोरी नहीं है ॥

ता० । जिनकी वाड आदि से अथवा मनुष्यसे रोक वा रक्षा नकर रक्खीहो ऐसी वनस्पतियोंके पुष्प मूल–और फलोंको और होमके लिये काष्ठको और गौओं के भक्षणकेलिये तृणों (घास आदि) को मनुजी ने अस्तेय कहा है अर्थात् इनको विना पूछे भी लेने से न कोई दंड है न कुछ अधर्म है क्योंकि इस गौतम ऋषी के वचनसे यह प्रतीतहोता है कि विना रोकीहुई वनस्पतियों के फूलों को और विना वाडकिये फलोंको इसप्रकार लेले जैसे अपनोंको लेताहो ३३९ ॥

योऽदत्तादायिनोहस्ताल्लिप्सेतब्राह्मणोधनम् । याजनाध्यापनेनापियथास्तेनस्तथैवसः ३४०

प० । यः अदत्तादायिनः हस्तात् लिप्सेत ब्राह्मणः धनं याजनाध्यापनेन अपि यथा स्तेनः तथा एव सः ॥

यो० । यः ब्राह्मणः याजनाध्यापनेन अपि अदत्तादायिनः हस्तात् धनं लिप्सेत सः ब्राह्मणः यथा स्तेनः तथैव ज्ञेयः ॥

भा० । ता० । जो ब्राह्मण यज्ञकराने और पढाने से भी चोरके हाथसे धनलेनेकी इच्छाकरै उस ब्राह्मणको भी वैसाही समझना चाहिये जैसा वह चोर है इससे इस ब्राह्मण को भी चोरके समान दंडहोताहै परंतु यदि ब्राह्मणके उस धनका यह निश्चय होना चाहिये कि यह धन चोरीकाहै ३४० ॥

द्विजोऽध्वगःक्षीणवृत्तिर्द्वाविक्षूद्वेचमूलके । आददानःपरक्षेत्रान्नदण्डंदातुमर्हति ३४१ ॥

प० । द्विजः अध्वगः क्षीणवृत्तिः द्वौ इक्षू द्वे च मूलके आददानः परक्षेत्रात् न दंडं दातुं अर्हति ॥

यो० । परक्षेत्रात् द्वौ इक्षू चपुनः द्वे मूलके आददानः क्षीणवृत्तिः अध्वगः द्विजः दंडं दातुं न अर्हति ॥

भा० । ता० । जो मार्ग में चलनेवाला क्षीणवृत्ति (जिसके पास मार्ग का खर्च न होय) ऐसा द्विज दूसरे के खेतमें से दो गांडे अथवा दो मूली लेले तो दंडदेने योग्य नहीं होताहै ३४१ ॥

असंधितानांसंधातासंधितानांचमोक्षकः । दासाश्वरथहर्ताचप्राप्तःस्याच्चौरकिल्बिषम् ३४२

प०।असंधितानां संधाता संधितानां च मोक्षकः दासाश्वरथहर्ता च प्राप्तः स्यात् चौरकिल्बिषम्॥

यो० । असंधितानां संधाता चपुनः संधितानां मोक्षकः चपुनः दासाश्वरथहर्ता पुरुषः चौरकिल्बिषं प्राप्तः स्यात् ॥

भा० । ता० । किसी के विना बंधहुये पशुओंको जो संधानकरै (बांधले) और जो संधान किये हुयेंको खोलिदे और दास–घोडे–रथ इनकी जो चोरीकरै वह मनुष्य चोरके दंडको प्राप्तहोताहै वह दंड लघु और गुरु अपराधके अनुसार अंगका छेदन, मारन, धनका लेना आदि समझना ३४२ ॥

अनेनविधिनाराजाकुर्वाणःस्तेननिग्रहम् । यशोऽस्मिन्प्राप्नुयाल्लोकेप्रेत्यचानुत्तमंसुखम् ३४३

प० । अनेन विधिना राजा कुर्वाणः स्तेननिग्रहं यशः अस्मिन् प्राप्नुयात् लोके प्रेत्य च अनुत्तमं सुखम् ॥

यो० । अनेन विधिना स्तेननिग्रहं कुर्वाणः राजा अस्मिन् लोके यशः चपुनः प्रेत्य अनुत्तमं सुखं प्राप्नुयात् ॥

भा० । ता० । इसविधिसे चोरोंको दंडदेताहुआ राजा इसलोक में यशको और परलोकमें उत्तम सुखको प्राप्तहोता है ३४३ ॥

ऐन्द्रंस्थानमभिप्रेप्सुर्यशश्चाक्षयमव्ययम् । नोपेक्षेतक्षणमपिराजासाहसिकंनरम् ३४४ ॥

प० । ऐन्द्रं स्थानं अभिप्रेप्सुः यशः च अक्षयं अव्ययं न उपेक्षेत क्षणं अपि राजा साहसिकं नरम् ॥

यो० । ऐन्द्रं स्थानं चपुनः अक्षयं अव्ययं यशः अभिप्रेप्सुः राजा क्षणं अपि साहसिकं नरं न उपेक्षेत ॥

भा० । ता० । अब साहसिक का दंड वर्णन करतेहैं कि इन्द्र के स्थानको (सबका अधिपति बनना) और जो कभी नष्ट और न्यूननहों ऐसे यशकी वाञ्छा करताहुआ राजा क्षणमात्र भी साहसिक मनुष्यकी उपेक्षा न करै अर्थात् न छोड़े ३४४ ॥

वाग्दुष्टात्तस्कराच्चैवदण्डेनैवचहिंसतः । साहसस्यनरःकर्ताविज्ञेयःपापकृत्तमः ३४५ ॥

प० । वाग्दुष्टात् तस्करात् चँ एवँ दंडेनँ एवँ चँ हिंसतः साहसस्य नरः कर्ता विज्ञेयः पापकृत्तमः॥

यो० । वाग्दुष्टात् तस्करात् चपुनः दंडेन एवहिंसतः (सकाशात्) साहसस्य कर्ता नरः पापकृत्तमः विज्ञेयः ॥

भा० । ता० । दुष्टवचन कहनेवाले और चौर और दंडसे हिंसाकरनेवाले मनुष्यकी अपेक्षा साहस करनेवाला मनुष्य अत्यंत पापकारी जानना ३४५ ॥

साहसेवर्तमानंतुयोमर्षयतिपार्थिवः । सविनाशंव्रजत्याशुविद्वेषंचाधिगच्छति ३४६ ॥

प० । साहँसे वर्त्तमानं तुँ यः मर्षयँति पार्थिवः सः विनाशं व्रजँति आशुँ विद्वेषं चँ अधिगच्छँति ॥

यो० । यः पार्थिवः साहसेवर्त्तमानं नरं मर्षयति सः नरः आशु विनाशं व्रजति चपुनः विद्वेषं अधिगच्छति ॥

भा० । ता० । जो राजा साहसकरतेहुये मनुष्यपर क्षमा करताहै अर्थात् दंड नहीं देता वह राजा शीघ्रही पापियोंकी उपेक्षासे नष्टहोताहै और अपनी प्रजाके मनुष्योंके संग वैरको प्राप्त होताहै क्योंकि धन आदि के नाशसे प्रजा उस राजा के संग वैर मानने लगती है ३४६ ॥

नमित्रकारणाद्राजाविपुलाद्वाधनागमात् । समुत्सृजेत्साहसिकान्सर्वभूतभयावहान् ३४७ ॥

प० । नँ मित्रकारँणात् राजा विपुलात्ँ वाँ धनागमात् समुत्सृजेत्ँ साहसिकान् सर्वभूतभयावहान्

यो० । मित्रकारणात् वा विपुलात् धनागमात् सर्वभूतभयावहान् साहसिकान् नरान् राजा न समुत्सृजेत् ॥

भा० । ता० । किसी मित्रके कहने से अथवा बहुत धनकी प्राप्तिसे भी संपूर्ण प्राणियोंको भयदेनेवाले साहसिक मनुष्योंको राजा न छोड़े अर्थात् अवश्य दंडदे ३४७ ॥

शस्त्रंद्विजातिभिर्ग्राह्यंधर्मोयत्रोपरुध्यते । द्विजातीनांचवर्णानांविप्लवेकालकारिते ३४८ ॥
आत्मनश्चपरित्राणेदक्षिणानांचसंगरे । स्त्रीविप्राभ्युपपत्तौचघ्नन्धर्मेणनदुष्यति ३४९ ॥

प० । शस्त्रं द्विजातिभिः ग्राह्यं धर्मः यत्रँ उपरुध्यँते द्विजातीनां चँ वर्णानां विप्लवे कालकारिते ॥

प० । आत्मनः चँ परित्राणे दक्षिणानां चँ संगरे स्त्रीविप्राभ्युपपत्तौ चँ घ्नन् धर्मेण नँ दुष्यँति ॥

यो० । यत्र द्विजातीनां वर्णानां धर्मः उपरुध्यते तत्र कालकारिते विप्लवे चपुनः आत्मनः परित्राणे चपुनः संगरे स्त्रीविप्राभ्युपपत्तौ सत्यां द्विजातिभिः शस्त्रं ग्राह्यं यतः धर्मेणघ्नन् न दुष्यति ॥

भा० । ता० । जिससमय द्विज और चारोंवर्णोंके धर्म का अवरोधहोय और समय का कियाहुआ विप्लवहो अर्थात् राजा के नहोने से शत्रु राजाकी सेना अपने देश में आयजाय अथवा स्त्रीके निमित्त संग्रामहोय और अपनी रक्षा के लिये और दक्षिणाओं के लिये युद्धहोय और स्त्री, ब्राह्मण, इनको कोई आपत्ति आनकर पड़े तो तीनों द्विजाति भी शस्त्रोंको ग्रहणकरैं क्योंकि धर्म के युद्धसे अन्योंको मारताहुआ द्विज दोषको प्राप्त नहीं होता ३४८ । ३४९ ॥

गुरुंवाबालवृद्धौवाब्राह्मणंवाबहुश्रुतम् । आततायिनमायान्तंहन्यादेवाविचारयन् ३५०

प० । गुरुं वा बालवृद्धौ वा ब्राह्मणं वा बहुश्रुतं आततायिनं आयांतं हन्यात् एव अविचारयन्

यो० । गुरुं वा बालवृद्धौ वा बहुश्रुतं ब्राह्मणं आयांतं आततायिनं अविचारयन् सन् हन्यात् एव ॥

भा० । गुरु, बालक, वृद्ध, धन विद्यासे संपन्न ब्राह्मण सन्मुख आतेहुये इतने आततायियों के मारने में विचार न करै अर्थात् अवश्य मारिदे ॥

ता० । गुरु, बालक, वृद्ध, और बहुश्रुत (अधिक विद्यावाला) ब्राह्मण सन्मुख आतेहुये इन आततायियों को भी विचारको छोड़कर मारिदे अर्थात् ये वित्त (धन) विद्यासे उत्कृष्टहों और पलायन (भाजनों) से अपनेको बचा भी न सकें तो भी इनको नष्टकरिदे क्योंकि उशना ऋषिने इस वचन से यह कहा है शस्त्रधारी आततायीको मारकर दोष नहीं होता और कात्यायन ने भी भृगुऋषि की यह संमति लिखी है कि तप, वेद, और उत्तम कुल में जन्म आदि से श्रेष्ठ भी आततायी के मारने में पाप नहीं होता क्योंकि भृगुऋषी ने नीचका वधही कहा है और मेधातिथि गोविंदराज तो यह कहतेहैं कि यह पहिले श्लोककाही अनुवाद है कि गुरु आदि आततायियोंको भी नष्टकरिदे तो अन्य आततायियों को क्यों नहीं नष्ट करै ३५० ॥

नाततायिवधेदोषोहन्तुर्भवतिकश्चन । प्रकाशंवाऽप्रकाशंवामन्युस्तंमन्युमृच्छति ३५१

प० । न आततायिवधे दोषः हंतुः भवति कश्चन प्रकाशं वा अप्रकाशं वा मन्युः तं मन्युं ऋच्छति

यो० । प्रकाशं वा अप्रकाशं आततायिवधे हंतुः कश्चन दोषः न भवति तं मन्युं मन्युः ऋच्छति ॥

भा० । ता० । बहुत मनुष्यों के सन्मुख अथवा एकांत में आततायी के मारने में मारनेवालेको कोई दोष नहीं होता क्योंकि मारनेवाले मनुष्यका मन्यु (क्रोधका देवता) मरनेवाले के क्रोध को नष्टकरताहै अर्थात् क्रोध अपराधी है और क्रोधही मारनेवाला है और उक्त साहसकरनेवाले मनुष्य को अपराध के अनुसार मारना (अंगका छेदन धनका छीनना आदि दंडदेने) ३५१ ॥

परदाराभिमर्शेषुप्रवृत्तान्नृन्महीपतिः । उद्वेजनकरैर्दण्डैश्छिन्नयित्वाप्रवासयेत् ३५२ ॥

प० । परदाराभिमर्शेषु प्रवृत्तान् नॄन् महीपतिः उद्वेजनकरैः दंडैः छिन्नयित्वा प्रवासयेत् ॥

यो० । महीपतिः परदाराभिमर्शेषु प्रवृत्तान्नृन् उद्वेजनकरैः दंडैः छिन्नयित्वा प्रवासयेत् ॥

भा० । ता० । परस्त्री के संभोगमें प्रवृत्तहुये मनुष्योंको उद्वेजन (कंपाना) करनेवाले दंडोंसे नाक, होठ, आदि काटकर अपने देश से राजा निकास दे ३५२ ॥

तत्समुत्थोहिलोकस्यजायतेवर्णसंकरः । येनमूलहरोधर्मःसर्वनाशायकल्पते ३५३ ॥

प० । तत्समुत्थः हि लोकस्य जायते वर्णसंकरः येन मूलहरः अधर्मः सर्वनाशाय कल्पते ॥

यो० । हि (यतः) तत्समुत्थः वर्णसंकरः लोकस्य जायते येन मूलहरः अधर्मः सर्वनाशाय कल्पते ॥

भा० । ता० । क्योंकि पराई स्त्री के गमनसे जगत् में वर्णोंका संकर होजाता है और जिस वर्ण-

---

१ गृहीतशस्त्रमाततायिनं हत्वा न दोषः ॥

२ आततायिनिचोत्कृष्टे तपःस्वाध्यायजन्मतः । वधस्तत्रतुनैवस्यात् पापेहीनेवधोभृगुः ॥

संकर से जगत् के मूलका नष्टकरनेवाला अधर्म सब जगत् के नाशके लिये होजाता है अर्थात् शुद्ध स्त्रीवाले यजमानके मिलने पर यज्ञ नहीं होती और सूर्य को आहुति नहीं पहुंचती आहुति के न पहुंचने पर वृष्टि नहीं और वृष्टि के न होने से जगत् का नाश होजाता है इसमें यह वचन प्रमाण है ३५३ ॥

परस्यपत्न्यापुरुषःसंभाषांयोजयन्रहः।पूर्वमाक्षारितोदोषैःप्राप्नुयात्पूर्वसाहसम् ३५४ ॥

प० । परस्य पत्न्या पुरुषः सम्भाषां योजयन् रहः पूर्वं आक्षारितः दोषैः प्राप्नुयात् पूर्वसाहसम् ॥

यो० । पूर्वं दोषैः आक्षारितः पुरुषः परस्य पत्न्या सह संभाषां रहः योजयन् सन् पूर्वसाहसं दण्डं प्राप्नुयात् ॥

भा० । ता० । जो मनुष्य एकान्त में दूसरे मनुष्य की स्त्री के संग संभाषण करे और और वह स्त्री जगत् में निन्दा आदि से डर कर प्रार्थना अथवा कठोर वचन से उस मनुष्य को भिड़कदे अर्थात् उसके अनुकूल बात न करे तो उस मनुष्य को राजा प्रथम साहस दण्ड दे ३५४ ॥

यस्त्वनाक्षारितःपूर्वमभिभाषेतकारणात्।नदोषंप्राप्नुयात्किंचिन्नहितस्यव्यतिक्रमः ३५५ ॥

प० । यः तु अनाक्षारितः पूर्वं अभिभाषेत कारणात् न दोषं प्राप्नुयात् किंचित् न हि तस्य व्यतिक्रमः ॥

यो० । पूर्वं अनाक्षारितः यः कारणात् पर पत्न्या सह अभि भाषेत सः किञ्चित् दोषं न प्राप्नुयात् हि (यतः) तस्य व्यतिक्रमः न अस्ति ॥

भा० । ता० । जिस मनुष्य को बोलने से पहिले स्त्री प्रार्थना कठोर वचन आदि कहि कर मने न करे और किसी प्रयोजन के लिये अन्य की स्त्री के संग जो मनुष्य सबके सन्मुख संभाषण करे वह मनुष्य दण्ड देने योग्य और दोष का भागी नहीं होता क्योंकि उसका कोई अपराध नहीं ३५५ ॥

परस्त्रियंयोऽभिवदेत्तीर्थेऽरण्येवनेऽपिवा । नदीनांवापिसंभेदेससंग्रहणमाप्नुयात् ३५६ ॥

प० । परस्त्रियं यः अभिवदेत् तीर्थे अरण्ये वने अपि वा नदीनां वा अपि संभेदे सः संग्रहणं आप्नुयात् ॥

यो० । यः मनुष्यः तीर्थे अरण्ये वने वा नदीनां संभेदे परस्त्रियं अभिवदेत् सः नरः संग्रहणं आप्नुयात् ॥

भा० । ता० । जो मनुष्य किसी तीर्थ अथवा अरण्य और वन वा नदियों के संगम में पराई स्त्री के संग संभाषण करे अनाक्षारित (जिसकी प्रार्थना आदि न की हो) भी वह मनुष्य संग्रहण के दण्ड (सहस्र) पण को प्राप्त होता है क्योंकि जिस से भली प्रकार अन्य स्त्री का संभोग जाना जाय उसे संग्रहण कहते हैं ३५६ ॥

उपचारक्रियाकेलिःस्पर्शोभूषणवाससाम् । सहखट्वासनंचैवसर्वंसंग्रहणंस्मृतम् ३५७ ॥

प० । उपचारक्रिया केलिः स्पर्शः भूषणवाससाम् सहखट्वासनं च एव सर्वं संग्रहणं स्मृतम् ॥

यो० । उपचारक्रिया केलिः भूषणवाससाम् स्पर्शः चपुनः सह खट्वासनं एतत् सर्वं मन्वादिभिः संग्रहणं स्मृतम् ॥

भा० । ता० । उपचारकी क्रिया अर्थात् मालाका धारण और गन्धका लेपन और हँसना वा स्पर्श करना अथवा भूषण और वस्त्रों को छूना और एक खट्वापर बैठना यह सम्पूर्ण मन्वादिकों ने संग्रहण कहा है ३५७ ॥

---

१ अग्नौप्रास्ताहुतिः सम्यक् आदित्यमुपतिष्ठते । आदित्यात् जायतेवृष्टिः वृष्टेरन्नं ततः प्रजाः ॥

स्त्रियंस्पृशेददेशेयःस्पृष्टोवामर्षयेत्तया। परस्परस्यानुमतेस्सर्वंसंग्रहणंस्मृतम् ३५८ ॥

प० । स्त्रियं स्पृशेत् अदेशे यः स्पृष्टः वा मर्षयेत् तया परस्परस्य अनुमते सर्वं संग्रहणं स्मृतम् ॥

यो० । यः अदेशे (योन्यादौ) स्त्रियं स्पृशेत् वा तया सह मर्षयेत् परस्परस्य अनुमतेः एतत्सर्वं संग्रहणं स्मृतम् ॥

भा० । ता० । जो मनुष्य अन्य की स्त्री के स्तन वा जंघा आदि का स्पर्श करै अथवा जिस मनुष्य का अन्य की स्त्री वृषण आदिकोंका स्पर्श करै और वह मनुष्य सहिले तो इस परस्पर के अंगिकार होने पर भी यह सब मनु आदिकों ने संग्रहण कहा है ३५८ ॥

अब्राह्मणःसंग्रहणेप्राणान्तंदण्डमर्हति। चतुर्णामपिवर्णानांदारारक्ष्यतमाःसदा३५९॥

प० । अब्राह्मणः संग्रहणे प्राणांतं दण्डं अर्हति चतुर्णाम् अपि वर्णानां दाराः रक्ष्यतमाः सदा ॥

यो० । संग्रहणे अब्राह्मणः प्राणांतं दंडं अर्हति चतुर्णाम् अपि वर्णानां सदा दाराः रक्ष्यतमाः भवन्ति ॥

भा० । ता० । संग्रहण करने में अब्राह्मण (शूद्र) प्राणान्तदण्ड (मृत्यु) को प्राप्त होता है क्योंकि चारों वर्णों को धन पुत्रादिक की अपेक्षा स्त्री सदैव रक्षा करने योग्य है यहां अब्राह्मणसे शूद्र लेते हैं क्योंकि क्षत्री वैश्य को इतना दण्ड नहीं हो सकता और यह दण्ड उस समय समझना ब्राह्मणी की इच्छा न होय और शूद्र बल से संग्रहण करै ३५९ ॥

भिक्षुकाबन्दिनश्चैवदीक्षिताःकारवस्तथा। संभाषणंसहस्त्रीभिःकुर्युरप्रतिवारिताः३६० ॥

प० । भिक्षुकाः बन्दिनः च एव दीक्षिताः कारवः तथा संभाषणं सह स्त्रीभिः कुर्युः अप्रतिवारिताः ॥

यो० । भिक्षुकाः चपुनः बन्दिनः दीक्षिताः एव तथा कारवः स्त्रीभिःसह संभाषणं अप्रतिवारिताः सन्तः कुर्युः ॥

भा० । ता० । भिक्षुक, बन्दीजन, दीक्षित, (जिनको यज्ञ करनेकेलिये दीक्षाकाउपदेश किया हो) सूपकारआदि कारीगर येसब पराई स्त्रियोंके संग सम्भाषणकरनेमें अनिवारितहैं अर्थात् इनकोमनेन करे ये संग्रहण के दण्डभागी नहीं हैं ३६० ॥

नसंभाषांपरस्त्रीभिःप्रतिषिद्धःसमाचरेत्। निषिद्धोभाषमाणस्तुसुवर्णंदण्डमर्हति ३६१ ॥

प० । न सम्भाषां परस्त्रीभिः प्रतिषिद्धः समाचरेत् निषिद्धः भाषमाणः तु सुवर्णं दण्डं अर्हति ॥

यो० । पतिना प्रतिषिद्धः पुरुषः परस्त्रीभिः संभाषां न समाचरेत् निषिद्धः भाषमाणस्तु सुवर्णं दण्डं अर्हति ॥

भा० । ता० स्त्री के पति ने मने किया हुआ मनुष्य अन्य की स्त्री के संग सम्भाषण न करै क्योंकि निषेध करने पर सम्भाषण करता हुआ मनुष्य सोलह मासे सुवर्ण के दण्ड को प्राप्त होता है ३६१ ॥

नैषचारणदारेषुविधिर्नात्मोपजीविषु। सज्जयन्तिहितेनारीर्निगूढाश्चारयन्तिच३६२॥

प० । न एषः चारणदारेषु विधिः न आत्मोपजीविषु सज्जयन्ति हि ते नारीः निगूढाः चारयन्ति च ॥

यो० । चारणदारेषु आत्मोपजीविषु एषः विधिः न अस्ति हि (यतः) निगूढाः ते नारीः सज्जयन्ति चपुनः चारयन्ति ॥

भा० । ता० । अन्य की स्त्रीकेसंग यह सम्भाषणका निषेध चारण(नट व गानेवाले) और आत्मो-

पजविी (भार्या से जो जीवें) इन में नहीं है क्योंकि ये सब अन्य पुरुषों को अपने घर में बुलाकर अपनी स्त्रियों का संग करते हैं और स्वयं आये हुये पुरुषों को अपने सन्मुख अपनी स्त्रियों से व्यवहार आप छिपकर कराते हैं यहां पर आत्मा पद से भार्य्या लीनी है क्योंकि स्त्री और पुत्रये दोनों अपना देह होते हैं ३६२ ॥

किंचिदेवतुदाप्यःस्यात्संभाषांताभिराचरन् । प्रैष्यासुचैकभक्तासुरहःप्रव्रजितासुच३६३॥

प० । किंचित् एव तु दाप्यः स्यात् सम्भाषां ताभिः आचरन् प्रैष्यासु च एकभक्तासु रहः प्रव्रजितासु च ॥

यो० । ताभिः सह चपुनः प्रैष्यासु एकभक्तासुचपुनः प्रव्रजितासु रहः संभाषांआचरन् पुरुषः किञ्चित् एवदाप्यःस्यात्॥

भा० । ता० । चारण आदिकों की स्त्रियों के संग और दासी और एक भक्त (बौद्धमतकी स्त्री) और ब्रह्मचारिणी इनके संग एकान्तमें सम्भाषण करतेहुये मनुष्यको यत्किञ्चित्‌ही दण्डदे३६३ ॥

योऽकामांदूषयेत्कन्यांससद्योवधमर्हति । सकामांदूषयंस्तुल्योनवधंप्राप्नुयान्नरः३६४॥

प० । यः अकामां दूषयेत् कन्यां सः सद्यः वधं अर्हति सकामां दूषयन् तुल्यः न वधं प्राप्नुयात् नरः॥

यो० । तुल्यः यः नरः अकामां कन्यां दूषयेत् सः सद्यः वधं अर्हति तुपुनः सकामां दूषयन् नरः वधं न प्राप्नुयात् ॥

भा० । ता० । जो सजातीय मनुष्य नहीं इच्छा करतीहुई किसी की कन्याके संग गमन करता है वह उसी समय मारने के योग्य होता है और इच्छा करती हुई कन्या को भोगता हुआ मनुष्य मारने के दण्ड को प्राप्त नहीं होता ३६४ ॥

कन्यांभजंतीमुत्कृष्टंनकिंचिदपिदापयेत् । जघन्यंसेवमानांतुसंयतांवासयेद्गृहे ३६५॥

प० । कन्यां भजन्तीं उत्कृष्टं न किञ्चित् अपि दापयेत् जघन्यं सेवमानां तु संयतां वासयेत् गृहे॥

यो० । उत्कृष्टं भजन्तीं कन्यां किञ्चित् अपि न दापयेत् तुपुनः जघन्यं सेवमानां गृहे संयतां वासयेत् ॥

भा० । ता० । जो कन्या उत्कृष्ट जातिकेपुरुष को भजतीहो उसकन्याको कुछभी दण्ड न दे और नीच वर्ण के मनुष्य को भजती हुई कन्याको तो रोक कर घर में वसावे अर्थात् उस कन्या का विवाह उत्कृष्ट जाति के उसी मनुष्य के संग करिदे जिसको उसने भजा था ३६५ ॥

उत्तमांसेवमानस्तुजघन्योवधमर्हति । शुल्कंदद्यात्सेवमानःसमामिच्छेत्पितायदि३६६

प० । उत्तमां सेवमानः तु जघन्यः वधं अर्हति शुल्कं दद्यात् सेवमानः समां इच्छेत् पिता यदि ॥

यो० । उत्तमां सेवमानः जघन्यः वधं अर्हति समां सेवमानः पुरुषः यदि पिता इच्छेत् तर्हि शुल्कं दद्यात् ॥

भा० । ता० । उत्तम वर्ण की कन्या को भोगता हुआ मनुष्य वधके योग्य होता है और सजातीय कन्या को भोगता हुआ मनुष्य यदि कन्या का पिता चाहै तो उसको शुल्क मोल देकर उस कन्या के संग विवाह करले ३६६ ॥

अभिषह्यतुयःकन्यांकुर्याद्दर्पेणमानवः । तस्याशुकर्त्येअंगुल्यौदण्डंचार्हतिषट्शतम्३६७॥

प० । अभिषह्य तु यः कन्यां कुर्यात् दर्पेण मानवः तस्य आशु कर्त्ये अंगुल्यौ दण्डं च अर्हति षट्शतम् ॥

यो० । यः मानवः दर्पेण अभिषह्य कन्यां कुर्यात् तस्य आशु अंगुल्यौ कर्त्ये भवतः चपुनः षट्शतं दण्डं अर्हति ॥

भा० । ता० । जो मनुष्य बलात्कार और अहंकार से किसी की कन्या की योनि में अंगुली डा-रकर दूषण लगाता है उसकी उसी समय अंगुलियों को राजा काट दे और छः सौ ६०० पण दण्ड दे ३६७ ॥

सकामांदूषयंस्तुल्योनांगुलिच्छेदमाप्नुयात् । द्विशतंतुदमंदाप्यःप्रसंगविनिवृत्तये ३६८॥

प० । सकामां दूषयन् तुल्यः न अंगुलिच्छेदं आप्नुयात् द्विशतं तु दमं दाप्यः प्रसंगविनिवृत्तये ॥

यो० । तुल्यः (सजातीयः) मनुष्यः सकामां दूषयनसन् अंगुलिच्छेदं न आप्नुयात्—किन्तु प्रसंगविनिवृत्तये किञ्चित् एव दमं दाप्यः (दण्ड्यः) स्यात् ॥

भा० । ता० । इच्छा करती हुई कन्या को दूषित करते हुये मनुष्य की अंगुलियोंका छेदनन करै किन्तु आगे को प्रसंग की निवृत्ति के लिये यत् किञ्चित्ही दण्ड दे ३६८ ॥

कन्यैवकन्यांयाकुर्यात्तस्याःस्याद्द्विशतोदमः।शुल्कंचद्विगुणंदद्याच्छिफाश्चैवाप्नुयाद्दश ३६९

प० । कन्या एव कन्यां या कुर्यात् तस्याः स्यात् द्विशतः दमः शुल्कं च द्विगुणं दद्यात् शिफाः च एव आप्नुयात् दश ॥

यो० । या कन्या एव अंगुलिप्रक्षेपेण कन्यां नाशयेत् तस्याः द्विशतः दमः स्यात् चपुनः द्विगुणं शुल्कं कन्या पितुः दद्यात्—चपुनः दशशिफाः (बेंत) आप्नुयात् ॥

भा० । ता० । जो कन्याही किसी की कन्या की योनि में अंगुली डालकर नष्ट करदे उस कन्या को दो सौ पण दण्ड राजादे और कन्याके पिताको वह कन्यादूना शुल्क (मोल) दे और दशबेंत के प्रहार उस कन्या को राजा लगवावे ३६९ ॥

यातुकन्यांप्रकुर्यात्स्त्रीसासद्योमौण्ड्यमर्हति । अंगुल्योरेववाछेदंखरेणोद्वहनंतथा ३७०

प० । या तु कन्यां प्रकुर्यात् स्त्री सा सद्यः मौण्ड्यं अर्हति अंगुल्योः एव वा छेदं खरेण उद्वहनं तथा ॥

यो० । तुपुनः या स्त्री कन्यां प्रकुर्यात सा सद्यः मौण्ड्यं—वा अंगुल्योः एवच्छेदनं - तथा खरेण राजमार्गे उद्वहनं—अर्हति ॥

भा० । ता० । जो स्त्रीही अंगुली डालकर कन्या को दूषित (भ्रष्ट) करदे—वह स्त्री उसी समय मुण्डन वा अंगुलियों के छेदन—अथवा गधे पर चढ़ाकर राजमार्ग (सड़क) में गमन—के योग्य होती है अर्थात् राजा उस स्त्री को उक्त दण्ड दे ३७० ॥

भर्त्तारंलंघयेद्यातुस्त्रीज्ञातिगुणदर्पिता । तांश्वभिःखादयेद्राजासंस्थानेबहुसंस्थिते ३७१

प० । भर्त्तारं लंघयेत् या तु स्त्री ज्ञातिगुणदर्पिता तां श्वभिः खादयेत् राजा संस्थाने बहुसंस्थिते ॥

यो० । तुपुनः या स्त्री ज्ञातिगुणदर्पिता सती भर्त्तारं लंघयेत् तां स्त्रीं बहुसंस्थिते संस्थाने राजा श्वभिः खादयेत् (भक्षयेत्) ॥

भा० । ता० । जो स्त्री अपने पिता भाई आदि के धन और गुणों से अभिमान करके अपने पति का अवलंघन करती है अर्थात् पुरुषान्तर का संग—वा पति की आज्ञा नहीं मानने से अपने ईश्वरके

समान पतिही में प्रीति नहीं रखती है उस स्त्री को जहां बहुत मनुष्य स्थित हों ऐसे स्थान में कुत्तों से भक्षण करा दे ३७१ ॥

पुमांसंदाहयेत्पापंशयनेतप्तआयसे । अभ्यादध्युश्चकाष्ठानितत्रदह्येतपापकृत् ३७२ ॥

प० । पुमांसं दाहयेत् पापं शयने तप्ते आयसे अभ्यादध्युः च काष्ठानि तत्र दह्येत पापकृत् ॥

यो० । आयसे तप्ते शयने पापं पुमांसं दाहयेत्—घातकाः काष्ठानि अभ्यादध्युः तत्र पापकृत् दह्येत—(भस्मीभूयात्) ॥

भा० । ता० । अन्य स्त्री के संग गमन करनेवाले पूर्वोक्त पापी मनुष्य को अग्नि से तपायमान लोहे की शय्यापर दग्ध करै—और घातक (हत्यारे) मनुष्य चारों ओर से काष्ठों को रखते जांय उस शय्यापर वह पाप करने वाला मनुष्य भस्म होजाय ३७२ ॥

संवत्सराभिशस्तस्यदुष्टस्यद्विगुणोदमः । व्रात्ययासहसंवासेचाण्डाल्यातावदेवतु ३७३

प० । संवत्सराभिशस्तस्य दुष्टस्य द्विगुणः दमः व्रात्यया सह संवासे चांडाल्या तावत् एव तु ॥

यो० । संवत्सराभिशस्तस्य दुष्टस्य द्विगुणः दमः (दण्डः) ज्ञेयः—तुपुनः व्रात्यया तथा चाण्डाल्यासहसंवासे सति तावत् एव (द्विगुणः) दण्डः देयः ॥

भा० । पर की स्त्री के संग करने वाले और व्रात्यजाति की और चाण्डाली के संग गमन करने वाले दुष्ट पुरुष को जो दण्ड (१००० पण) पहिले कहा है उससे दूना उस दुष्ट को जब होता है यदि वह वर्ष दिन के पीछे पुनः संग करै ॥

ता० । अन्य स्त्री के संग गमन करने से दुष्ट मनुष्य यदि वर्ष दिन से अधिक फिर निन्दा को प्राप्त होजाय तो पूर्वोक्त दण्ड से दूना दण्ड दे और तिसी प्रकार व्रात्य (जिनका शास्त्रोक्त समयतक यज्ञोपवीत संस्कार न होता हो) जाति की और चाण्डाली स्त्री के संग भोग करने में भी उतना ही दण्ड (दूना) वर्ष दिन के अनन्तर होता है अर्थात् चाण्डाली के संग एक वार गमन में सहस्र पण दण्ड कहा है यदि वर्ष दिन के अनन्तर पुनः संग करै तो दो सहस्र पण दण्ड देने योग्य होता है इसी प्रकार व्रात्या के भी गमन में एक वार होय तो एक सहस्र पण और वर्ष दिन के पीछे पुनः भी संग करै तो दो सहस्र पण दण्ड राजा दे ३७३ ॥

शूद्रोगुप्तमगुप्तंवाद्वैजातंवर्णमावसन् । अगुप्तमंगसर्वस्वैर्गुप्तंसर्वेणहीयते ३७४ ॥

प० । शूद्रः गुप्तं अगुप्तं वा द्वैजातं वर्णं आवसन् अगुप्तं अंगसर्वस्वैः गुप्तं सर्वेण हीयते ॥

यो० । गुप्तं वा अगुप्तं द्वैजातं वर्णं आवसन् शूद्रः यदि भवति तर्हि अगुप्तगमन अंगसर्वस्वैः गुप्तं गमन् सर्वेण हीयते ॥

भा० । रक्षा नहीं कीहुई द्विजातियोंकी स्त्रीको भोगताहुआ शूद्र लिंग छेदन और सर्वस्व छीनने के दंडको—और रक्षा कीहुई को भोगताहुआ शूद्र देहका वध और सर्वस्व छीनने के दंड को प्राप्त होताहै ॥

ता० । पति आदि से रक्षित वा अरक्षित द्विजातियों की स्त्री के संग भोगकरताहुआ शूद्र अंग (लिंग) छेदन और सर्वस्वको छीनने—के दंड को प्राप्त होताहै और यदि पूर्वोक्त स्त्री रक्षित न होय तो उस से संग करता हुआ शूद्र देहऔर धन छीनने के दण्ड को प्राप्त होता है यद्यपि इस श्लोक

में अंग का नाम कहा है तथापि अंगपदसे लिंगही इंद्रिय लेना क्योंकि इसे गौतम ऋषिके वचनसे यही प्रतीत होता है कि उत्तम वर्णों की स्त्रीके गमनकरने पर लिंगका छेदन और सर्वस्व का हरण दंड होताहै—और यदि स्त्रीका कोई रक्षक होय तो—गमन करनेवाले का वध, पूर्वोक्त दंडसे अधिक है अर्थात् उसका सर्वस्व हरण और वध दोनों दंड होतेहैं ३७४ ॥

वैश्यःसर्वस्वदण्डःस्यात्संवत्सरनिरोधतः।सहस्रंक्षत्रियोदण्ड्योमौण्ड्यंमूत्रेणचार्हति ३७५

प० । वैश्यः सर्वस्वदंडः स्यात् संवत्सरनिरोधतः सहस्रं क्षत्रियः दंड्यः मौंड्यं मूत्रेण च अर्हति॥

यो० । ब्राह्मणीगमने—वैश्यः संवत्सरनिरोधत. अनंतरं सर्वस्वदंड.स्यात्- क्षत्रियः सहस्रंदंड्यः स्यात् चपुनः मूत्रेण मौंड्यं अर्हति ॥

भा० । ता० । यदि वैश्य ब्राह्मणी के संग गमनकरे तो राजा उस वैश्यको एकवर्ष निरोध (कैद) के अनंतर सर्वस्व हरने का दंडदे—और यदि क्षत्रिय ब्राह्मणी के संग गमनकरै तो सहस्र पण दंड के और गधेके मूत्रसे मुंडनको प्राप्त होताहै ३७५ ॥

ब्राह्मणींयद्यगुप्तांतुगच्छेतांवैश्यपार्थिवौ।वैश्यंपंचशतंकुर्यात्क्षत्रियंतुसहस्रिणम्३७६॥

प० । ब्राह्मणीं यदि अगुप्तां तु गच्छेतां वैश्यपार्थिवौ वैश्यं पंचशतं कुर्यात् क्षत्रियं तु सहस्रिणम्॥

यो० । यदि वैश्यपार्थिवौ अगुप्तां ब्राह्मणीं गच्छेतां तर्हि वैश्यं पंचशतं क्षत्रियंतु सहस्रिणं राजा कुर्यात् ॥

भा० । ता० । यदि वैश्य और क्षत्रिय नही रक्षाकी हुई ब्राह्मणी के संग गमनकरैं तो वैश्य को पांचसौपण और क्षत्रियको सहस्रपण दंड राजा दे और यह वैश्यको पांचसौपण का दंड तभी दे जब वैश्यने उस ब्राह्मणीको शूद्रासमझाहो अथवा निर्गुण और जातिमात्रसेही जो जीवतीहो अर्थात् नाममात्रकी ब्राह्मणी हो—और यदि पूर्वोक्त से इतर (शुद्ध) ब्राह्मणी के संगही वैश्यगमन करै तो वैश्यको भी सहस्रपणकाही दंड राजा दे ३७६ ॥

उभावपितुतावेवब्राह्मण्यागुप्तयासह।विप्लुतौशूद्रवद्दण्ड्यौदग्धव्यौवाकटाग्निना ३७७॥

प० । उभौ अपि तु तौ एव ब्राह्मण्या गुप्तया सह विप्लुतौ शूद्रवत् दंड्यौ दग्धव्यौ वा कटाग्निना॥

यो० । तौ उभौ एव क्षत्रिय वैश्यौ गुप्तया ब्राह्मण्यासह संगतौ चेत् भवतः तर्हि विप्लुतौ शूद्रवत् दंड्यौ वा कटाग्निना दग्धव्यौ ॥

भा० । गुणवाली ब्राह्मणी के संग गमनकरनेवाले उन दोनों वैश्य और क्षत्रियको सर्वस्वहरण का दंडदे अथवा कट (तृण) की अग्निमें भस्म करदे ॥

ता० । यदि वेही दोनों क्षत्रिय और वैश्य रक्षित ब्राह्मणी का संगकरैं तो शूद्रके समान सर्वस्व हरने के दंडको प्राप्त होतेहैं अथवा कंठमें बांधकर दोनोंको राजा दग्ध करदे—तिस दाहमें यह विशेष है कि वैश्यको रक्त कुशाओं से दग्ध करै और क्षत्रियको शरोंके पत्तोंसे क्योंकि इस वचनसे वशिष्ठजीने यही कहा है और यद्यपि पहिले यह कहआये हैं कि क्षत्रियको ब्राह्मणी गमनपर एक सहस्र पण दंड और वैश्यको पांचसौ पण दंड होताहै परन्तु यह गुरु दंड तभी होताहै जब वह ब्राह्मणी गुणवतीहो ३७७ ॥

१ आर्यस्त्र्यभिगमनेलिंगोद्धारः सर्वस्वहरणं गोप्ताचेद्वधोऽधिकः ॥

सहस्रंब्राह्मणोदण्ड्योगुप्तांविप्रांबलाद्व्रजन् । शतानिपंचदण्डयस्स्यादिच्छन्त्यासहसंगतः३७८

प० । सहस्रं ब्राह्मणः दंड्यः गुप्तां विप्रां बलात् व्रजन् शतानि पंच दंड्यः स्यात् इच्छंत्या सह संगतः ॥

यो० । गुप्तां विप्रां बलात् व्रजन् ब्राह्मणः सहस्रं इच्छंत्यासह संगतः ब्राह्मणः पंचशतानि दंड्यः स्यात् ॥

भा० । ता० । रक्षा की हुई ब्राह्मणी के संग बलसे गमन करता हुआ ब्राह्मण एक सहस्र पण के दंड को और इच्छा करती हुई ब्राह्मणी के संग गमन करता हुआ ब्राह्मण पांचसौ पण दंड को प्राप्त होताहै ३७८ ॥

मौण्ड्यंप्राणान्तिकोदण्डोब्राह्मणस्यविधीयते । इतरेषांतुवर्णानांदंडःप्राणान्तिकोभवेत्३७९॥

प० । मौंड्यं प्राणांतिकः दंडः ब्राह्मणस्य विधीयते इतरेषां तु वर्णानां दंडः प्राणांतिकः भवेत् ॥

यो० । ब्राह्मणस्य प्राणांतिकः दंडः मौंड्यं विधीयते-इतरेषां वर्णानां तु प्राणांतिकः दंडः भवेत् ॥

भा० । ता० । ब्राह्मणका प्राणांतिक (वध) दंड मुंडनही शास्त्र में कहा है और ब्राह्मण से इतर तीनों वर्णोंका प्राणांतिक (मारण) ही दंड होताहै ३७९ ॥

नजातुब्राह्मणंहन्यात्सर्वपापेष्वपिस्थितम् । राष्ट्रादेनंबहिःकुर्यात्समग्रधनमक्षतम्३८०

प० । न जातु ब्राह्मणं हन्यात् सर्वपापेषु अपि स्थितं राष्ट्रात् एनं बहिः कुर्यात् समग्रधनं अक्षतम् ॥

यो० । सर्वपापेषु स्थितं अपि ब्राह्मणं जातु न हन्यात् किंतु समग्रधनं अक्षतं एनं (ब्राह्मणं) राजा राष्ट्रात् बहिः कुर्यात् ॥

भा० । ता० । सम्पूर्ण पापों में स्थित भी ब्राह्मण को कदाचित् न मारै किन्तु सम्पूर्ण धन सहित और देह में घावों से रहित इस पापी ब्राह्मण को राजा देश से बाहर निकास दे ३८० ॥

नब्राह्मणवधाद्भूयानधर्मोविद्यतेभुवि । तस्मादस्यवधंराजामनसापिनचिन्तयेत्३८१॥

प० । न ब्राह्मणवधात् भूयान् अधर्मः विद्यते भुवि तस्मात् अस्य वधं राजा मनसा अपि न चिन्तयेत् ॥

यो० । ब्राह्मणवधात् भूयान् अधर्मः भुवि न विद्यते-तस्मात् अस्य (ब्राह्मणस्य) वधं राजा मनसा अपि न चिन्तयेत् ॥

भा० । ता० । ब्राह्मण के वध से अधिक अधर्म पृथ्वी पर नहीं है तिससे सम्पूर्ण पापोंको करने वाले भी ब्राह्मण के वध की चिन्ता राजा मन से भी न करै ३८१ ॥

वैश्यश्चेत्क्षत्रियांगुप्तांवैश्यांवाक्षत्रियोव्रजेत् । योब्राह्मण्यामगुप्तायांतावुभौदंडमर्हतः३८२॥

प० । वैश्यः चेत् क्षत्रियां गुप्तां वैश्यां वा क्षत्रियः व्रजेत् यः ब्राह्मण्यां अगुप्तायां तौ उभौ दण्डं अर्हतः ॥

यो० । चेत् (यदि) वैश्यः गुप्तां क्षत्रियां—वा क्षत्रियः गुप्तां वैश्यां—तयोः अगुप्तायां ब्राह्मण्यां गमने यः दण्डः उक्तः तं दंडं तौ उभौ अर्हतः ॥

भा० । जो वैश्य रक्षित क्षत्रियाके संग वा क्षत्रिय वैश्याके संग गमन करता है उनदोनोंको वही दंडहोताहै जो अरक्षित ब्राह्मणीके गमनमें कहआये हैं अर्थात् वैश्यको पांचसौपण और क्षत्रिय को सहस्रपण ॥

ता० । जो वैश्य रक्षा की हुई क्षत्रिया के संग वा जो क्षत्रिय रक्षा की हुई वैश्या के संग गमन करैं वे दोनों उसीदण्डके योग्यहोतेहैं जो दण्ड नहीं रक्षाकीहुई ब्राह्मणीके गमनमें उनको पहिले कहआये हैं अर्थात् वैश्यको पांचसौपण और क्षत्रियको सहस्रपण दंड राजादे—और यहदण्ड उसी वैश्यको होताहै जो गुणवान् होकर निर्गुण क्षत्रियामें शूद्राजानकर गमन करता है और जानकर वैश्यामें गमन करतेहुये क्षत्रियको तो उक्तदण्ड योग्यही है ३८२ ॥

सहस्रंब्राह्मणोदंडंदाप्योगुप्तेतुतेव्रजन्।शूद्रायांक्षत्रियविशोःसाहस्रोवैभवेद्दमः ३८३ ॥

प० । सहस्रं ब्राह्मणः दण्डं दाप्यः गुप्ते तु ते व्रजन् शूद्रायां क्षत्रियविशोः साहस्रः वै भवेत् दमः ॥

यो० । गुप्ते ते (क्षत्रियवैश्यस्त्रियौ) व्रजन् ब्राह्मणः सहस्रं दंडं दाप्यः क्षत्रियविशोः शूद्रायां गमने साहस्रः दमः भवेत् ॥

भा० । ता० रक्षाकीहुई क्षत्रिया और वैश्यामें गमन करतेहुये ब्राह्मणको और रक्षित शूद्रामें गमन करतेहुये क्षत्रिय और वैश्यको भी एकसहस्रपण दंडदे ३८३ ॥

क्षत्रियायामगुप्तायांवैश्येपंचशतंदमः।मूत्रेणमौण्ड्यमिच्छेत्तुक्षत्रियोदंडमेववा ३८४ ॥

प० । क्षत्रियायां अगुप्तायां वैश्ये पंचशतं दमः मूत्रेण मौंड्यं इच्छेत् तु क्षत्रियः दण्डं एव वा ॥

यो० अगुप्तायां क्षत्रियायां वैश्ये गंतरि सति पंचशतं दमः भवति क्षत्रियः तु गर्दभ मूत्रेण मुण्डनं वा दंडं इच्छेत् अर्थात् तस्मै अन्यतरः दमः देयः ॥

भा० । ता० । नहीं रक्षित क्षत्रियाके संग गमन करतेहुये वैश्यको पांचसौपण दंडहोता है और अरक्षित क्षत्रियामेंगमनकरतेहुये क्षत्रियको तो गधेकेमूत्रसे मुण्डन वा पांचसौपण दंडहोताहै ३८४ ॥

अगुप्तेक्षत्रियावैश्येशूद्रांवाब्राह्मणोव्रजन्।शतानिपंचदण्ड्यःस्यात्सहस्रंत्वन्त्यजस्त्रियम् ३८५

प० । अगुप्ते क्षत्रियावैश्ये शूद्रां वा ब्राह्मणः व्रजन् शतानि पंच दंड्यः स्यात् सहस्रं तु अन्त्यजस्त्रियम् ॥

यो० । अगुप्ते क्षत्रियावैश्ये वा अगुप्तां शूद्रां व्रजन् ब्राह्मणः पंचशतानिदंड्यः—अन्त्यजस्त्रियं व्रजन् ब्राह्मणः तु सहस्रंपणं दंड्यःस्यात् ॥

भा० । ता० । नहीं रक्षाकीहुई क्षत्रिया और वैश्यामें वा अरक्षित शूद्रामें गमन करतेहुये ब्राह्मणको पांचसौपण, और अन्त्यजकी स्त्री (भंगन) में गमन करतेहुये ब्राह्मणको एकसहस्रपण, दण्ड राजादे—अन्त्यज वह कहाता है जो अन्तमेंहो अर्थात् जिससे परे कोई नीच न हो ३८५ ॥

यस्यस्तेनःपुरेनास्तिनान्यस्त्रीगोनदुष्टवाक्।नसाहसिकदंडघ्नौसराजाशक्रलोकभाक् ३८६

प० । यस्य स्तेनः पुरे न अस्ति न अन्यस्त्रीगः न दुष्टवाक् न साहसिकदण्डघ्नौ सः राजा शक्रलोकभाक् ॥

यो० । यस्य राज्ञः पुरे स्तेनः—अन्यस्त्रीगः—दुष्टवाक्— न अस्ति—साहसिकदण्डघ्नौ न स्तः सः राजा शक्रलोकभाक् (स्वर्गगामी) भवति ॥

भा० । ता० । जिस राजाके नगरमें चौर—परस्त्रीगामी (व्यभिचारी) दुष्टवाणी—और साहसिक और कठोरदण्डका दाता येसब नहीं हैं वह राजा इन्द्रकेलोकमें जाताहै ३८६ ॥

एतेषांनिग्रहोराज्ञःपंचानांविषयेस्वके। साम्राज्यकृत्सजात्येषुलोकेचैवयशस्करः ३८७॥

प० । एतेषां निग्रहः राज्ञः पंचानां विषये स्वके साम्राज्यकृत् सजात्येषु लोके च एव यशस्करः ॥

यो० । यस्य राज्ञः एतेषां पंचानां स्वके विषये निग्रहः अस्ति सः राजा सजात्येषु साम्राज्यकृत् चपुनः लोके यशस्करः भवति ॥

भा० । ता० । जिस राजाके राज्यमें इन पूर्वोक्त स्तेन आदिका निग्रह (दंड वा अभाव) है वह राजा अपने सजातीय राजाओंमें चक्रवर्ती राजाहोताहै और इसलोकमें यशका कर्त्ताहोताहै ३८७॥

ऋत्विजंयस्त्यजेद्याज्योयाज्यंचर्त्विक्त्यजेद्यदि। शक्तंकर्मण्यदुष्टंचतयोर्दण्डःशतंशतम् ३८८

प० । ऋत्विजं यः त्यजेत् याज्यः याज्यं च ऋत्विक् त्यजेत् यदि शक्तं कर्मणि अदुष्टं च तयोः दंडः शतं शतम् ॥

यो० । यः याज्यः कर्मणिशक्तं अदुष्टं ऋत्विजं त्यजेत् चपुनः ऋत्विक् यदि याज्यं त्यजेत् तयोः (ऋत्विक् याज्ययोः) शतं शतं पणं दण्डः भवेत् ॥

भा० ता० जो यजमान कर्म करानेमें समर्थ और अदुष्ट (साधु) ऋत्विज्को त्यागदे अथवा जो ऋत्विज् अदुष्ट यजमानको त्यागदे उन दोनोंको सौ२ पण दण्ड राजादे ३८८ ॥

नमातानपितानस्त्रीनपुत्रस्त्यागमर्हति। त्यजन्नपतितानेतान्राज्ञादण्ड्यःशतानिषट्३८९

प० । न माता न पिता न स्त्री न पुत्रः त्यागं अर्हति त्यजन् अपतितान् एतान् राज्ञा दण्ड्यः शतानि षट् ॥

यो० । माता पिता स्त्री पुत्रः त्यागं न अर्हति अपतितान् एतान् त्यजन् पुरुषः राज्ञा षट् शतानि दंड्यः भवेत् ॥

भा० । ता० । माता पिता स्त्री और पुत्र येसब त्यागनेके योग्य नहीं होते अर्थात् भरण पोषण आदिसे उपेक्षा योग्य नहींहोते और जो अपतित इनचारोंका परित्याग करता है उसको इनमेंसे एक२ के परित्याग करनेपर राजा छः २ सौ पण दंडदे ३८९॥

आश्रमेषुद्विजातीनांकार्येविवदतांमिथः। नविब्रूयान्नृपोधर्मंचिकीर्षन्हितमात्मनः३९०॥

प० । आश्रमेषु द्विजातीनां कार्ये विवदतां मिथः न विब्रूयात् नृपः धर्मं चिकीर्षन् हितं आत्मनः ॥

यो० । आश्रमेषु कार्ये मिथः विवदतां द्विजातीनां सतां आत्मनः हितं चिकीर्षुः नृपः धर्मं न विब्रूयात् ॥

भा० । ता० । गृहस्थाश्रमके कार्योंमें परस्पर इसप्रकार कि यह शास्त्रका अर्थ है यह शास्त्रका अर्थ नहीं है विवाद करतेहुये द्विजातियों के बीचमें अपने हितको चाहताहुआ राजा विशेषकर धर्मको न कहै कि यह धर्महै ऐसा उपदेश न करै ३९० ॥

यथार्हमेतानभ्यर्च्यब्राह्मणैःसहपार्थिवः। सांत्वेनप्रशमय्यादौस्वधर्मंप्रतिपादयेत् ३९१

प० । यथार्हं एतान् अभ्यर्च्य ब्राह्मणैः सह पार्थिवः सांत्वेन प्रशमय्य आदौ स्वधर्मं प्रतिपादयेत् ॥

यो० । पार्थिवः एतान् (आश्रमिणः) ब्राह्मणैः सह यथार्हं अभ्यर्च्य आदौ सांत्वेन प्रशमय्य स्वधर्मं प्रतिपादयेत् (बोधयेत्) ॥

भा० । ता० । इनसब आश्रमवालोंकी प्रथम राजा यथोचित पूजाकरके और शांतिके वाक्योंसे शांतकरके और इनके क्रोधकी निवृत्ति करके फिर इनका जो धर्म उसका प्रतिपादन करै अर्थात् बतावे ३९१ ॥

प्रातिवेश्यानुवेश्यौचकल्याणेविंशतिद्विजे। अर्हावभोजयन्विप्रोदण्डमर्हतिमाषकम ३९२ ॥

प० । प्रातिवेश्यानुवेश्यौ च कल्याणे विंशतिद्विजे अर्हौ अभोजयन विप्रः दण्डं अर्हति माषकम् ॥

यो० । विंशतिद्विजे कल्याणे अर्हौ प्रातिवेश्यानुवेश्यौ अभोजयन विप्रः माषकं दंडं अर्हति ॥

भा० । जिस उत्सवमें बीस ब्राह्मण भोजनकरें उसमें प्रातिवेश्य और अनुवेश्य का परित्याग करनेवाला ब्राह्मण एकमासा चांदी के दंड योग्य होताहै ॥

ता० । जो ब्राह्मण निरन्तर गृहमेंही वसै उसे प्रातिवेश्य और निरन्तर न वसै उसे अनुवेश्य कहतेहैं—जिस उत्सवमें बीस ब्राह्मणोंका भोजन कराया जाता है उस में प्रातिवेश्य और अनुवेश्य जो ब्राह्मणोंका परित्याग करै क्योंकि ये दोनों ब्राह्मण भोजन करानेके योग्य कहेहैं और इसे विष्णु के वचनसे इनके अवलंघनमें दोष कहा है उस ब्राह्मणको एकमासा चांदी दंडदे ३९२ ॥

श्रोत्रियःश्रोत्रियंसाधुंभूतकृत्येष्वभोजयन्। तदन्नंद्विगुणंदाप्योहिरण्यंचैवमाषकम् ३९३ ॥

प० । श्रोत्रियः श्रोत्रियं साधुं भूतकृत्येषु अभोजयन् तदन्नं द्विगुणं दाप्यः हिरण्यं च एवं माषकम् ॥

यो० । साधुं श्रोत्रियं भूतकृत्येषु अभोजयन श्रोत्रियः द्विगुणं तदन्नं चपुनः माषकं हिरण्यं दाप्यः (दंड्यः) ॥

भा० । ता० । जो वेदपाठी ब्राह्मण सज्जन वेदपाठीको विवाहादि कार्योंमें न जिमावे और प्रातिवेश्य और अनुवेश्य और अन्य ब्राह्मणको जिमा दे उस ब्राह्मणको राजा उससे दूना अन्न और एकमासा सोना दंडदे ३९३ ॥

अन्धोजडःपीठसर्पिस्सप्तत्यास्थविरश्चयः।श्रोत्रियेषूपकुर्वंश्चनदाप्याःकेनचित्करम्३९४॥

प० । अंधः जडः पीठसर्पिः सप्तत्या स्थविरः च यः श्रोत्रियेषु उपकुर्वन् च न दाप्याः केनचित् करम् ॥

यो० । अंधः जडः (वधिरः) पीठसर्पिः (पंगुः) चपुनः यः सप्तत्या स्थविरः सः चपुनः श्रोत्रियेषु उपकुर्वन् एते केनचित् अपि राज्ञा करं न दाप्याः ॥

भा० । ता० । अंध, वधिर, पंगु और ७० वर्ष का वृद्ध धन और अन्नसे वेदपाठियोंका उपकारी इतने ब्राह्मणोंको क्षीण कोष भी कोई राजा करका दंड न दे किंतु इनपर अनुग्रह करै ३९४ ॥

श्रोत्रियंव्याधितार्तौचबालवृद्धावकिंचनम्।महाकुलीनमार्यंचराजासंपूजयेत्सदा ३९५

प० । श्रोत्रियं व्याधितार्तौ च बालवृद्धौ अकिंचनं महाकुलीनं आर्यं च राजा संपूजयेत् सदा ॥

यो० । श्रोत्रियं–व्याधितार्तौ–बालवृद्धौ–अकिंचनं महाकुलीनं–चपुनः आर्यं–राजा सदा संपूजयेत् ॥

भा० । ता० । वेदपाठी–रोगी–और पुत्र के वियोग आदि से दुःखी बालक–वृद्ध–दरिद्री उत्तम कुल से उत्पन्न और उत्तम आचरण करनेवाला इतने ब्राह्मणों का राजा पूजन सदैव दान मान से करै ३९५ ॥

शाल्मलीफलकेश्लक्ष्णेनेनिज्यान्नेजकःशनैः। नचवासांसिवासोभिर्निर्हरेन्नचवासयेत् ३९६

---

१ प्रातिवेश्यब्राह्मणातिक्रमकारीत्र ॥

प० । शाल्मलीफलके श्लक्ष्णे नेनिज्यात् नेजकः शनैः न च वासांसि वासोभिः निर्हरेत् न च वासयेत् ॥

यो० । नेजकः (रजकः) श्लक्ष्णे शाल्मलीफलके शनैः वासांसि नेनिज्यात् वासोभिः वासांसि न निर्हरेत् चपुनः न वासयेत् ॥

भा० । ता० । रजक (धोबी) सेमरके चिकने पट्टेपर शनैः २ वस्त्रोंको धोवे और किसी के अन्य वस्त्रों में न मिलावे और दूसरे के वस्त्र अन्यको धारण करने को न दे और न आप धारणकरै यदि इसप्रकार न करै तो दंड देने योग्य होताहै ३९६ ॥

तन्तुवायोदशपलंदद्यादेकपलाधिकम् । अतोऽन्यथावर्तमानोदाप्योद्वादशकंदमम् ३९७॥

प० । तंतुवायः दशपलं दद्यात् एकपलाधिकं अतः अन्यथा वर्तमानः दाप्यः द्वादशकं दमम् ॥

यो० । तंतुवायः दशपलं सूत्रं गृहीत्वा एकपलाधिकं वस्त्रं दद्यात् अतः अन्यथा वर्तमानः सः राज्ञा द्वादशकं दमं दाप्यः (दंडनीयः) ॥

भा० । ता० । तंतुवाय (कोली वा जुलाहा) दशपल सूतको लेकर बारहपल वस्त्र स्वामी को तोलदे -यदि इससे अन्यथा वर्ताव करै तो राजा उस तंतुवायको बारहपल दंडदे और वह वस्त्र के स्वामी की प्रसन्नता करै ३९७ ॥

शुल्कस्थानेषुकुशलाःसर्वपण्यविचक्षणाः । कुर्युरर्घंयथापण्यंततोविंशंनृपोहरेत् ३९८ ॥

प० । शुल्कस्थानेषु कुशलाः सर्वपण्यविचक्षणाः कुर्युः अर्घं यथापण्यं ततः विंशं नृपः हरेत् ॥

यो० । शुल्कस्थानेषु सर्वपण्यविचक्षणाः कुशलाः यथापण्यं अर्घं कुर्युः ततः (अर्घात्) विंशं नृपः हरेत् ॥

भा० । ता० । संपूर्ण पण्यों (बेचने की वस्तु) के सार और असार के जाननेवाले कुशल मनुष्य शुल्क के स्थानों में पण्य की वस्तुके अनुसार अर्घ (मूल्य) का निश्चय करदें अर्थात् इसवस्तु पर इतना लाभ लेना चाहिये और उस लाभमें से बीसवां भाग राजा ग्रहणकरै—जल अथवा स्थलके मार्ग में जो कर व्यवहारी राजाको देतेहैं उसे शुल्क कहते हैं ३९८ ॥

राज्ञःप्रख्यातभाण्डानिप्रतिषिद्धानियानिच । तानिनिर्हरतोलोभात्सर्वहारंहरेन्नृपः ३९९

प० । राज्ञः प्रख्यातभांडानि प्रतिषिद्धानि यानि च तानि निर्हरतः लोभात् सर्वहारं हरेत् नृपः ॥

यो० । राज्ञः यानि प्रख्यात भांडानि–चपुनः यानि राज्ञा प्रतिषिद्धानि लोभात् तानि निर्हरतः पुरुषस्य नृपः सर्वहारं हरेत् ॥

भा० । ता० । राजा के जो प्रसिद्धपात्र और विक्रेय वस्तु और हाथी अश्व आदिहैं औरजो वस्तु राजाने निषिद्ध करदी हैं जैसा कि दुर्भिक्ष में देशांतरको अन्न कोई न लेजाय–इनको जो मनुष्य देशांतरमें लोभसे लेजाय–उसके सर्वस्वको राजा हरले (छीनले) ३९९ ॥

शुल्कस्थानंपरिहरन्नकालेक्रयविक्रयी । मिथ्यावादीचसंख्यानेदाप्योऽष्टगुणमत्ययम् ४०० ॥

प० । शुल्कस्थानं परिहरन् अकाले क्रयविक्रयी मिथ्यावादी च संख्याने दाप्यः अष्टगुणं अत्ययम् ॥

यो० । शुल्कस्थानं परिहरन्–अकाले क्रयविक्रयी–चपुनः संख्याने मिथ्यावादी–पुरुषः अष्टगुणं अत्ययं दाप्यः ॥

भा० । ता० । जो मनुष्य शुल्कस्थानको बचाकर कुमार्ग को अन्न आदि लेजाय अथवा जो अस-

मय में लेन देन करै अथवा शुल्ककी न्यूनता के लिये अधिक वस्तुको न्यून बतावे उसने झूंठ बोल कर जितना राजा का कर बचाया चाहाहो उससे आठगुना दंड राजा उस मनुष्य को दे ४०० ॥

आगमंनिर्गमंस्थानंतथावृद्धिक्षयावुभौ।विचार्य्यसर्वपण्यानांकारयेत्क्रयविक्रयौ४०१॥

प० । आगमं निर्गमं स्थानं तथा वृद्धिक्षयौ उभौ विचार्य्य सर्वपण्यानां कारयेत् क्रयविक्रयौ ॥

यो० । राजा आगमं- निर्गमं- स्थानं- तथा उभौ वृद्धिक्षयौ विचार्य- सर्वपण्यानां क्रयविक्रयौ कारयेत् ॥

भा० । द्रव्यों के आने और जाने और रखने का समय और वृद्धि और हानि इन सबका निर्णय करके राजा क्रय और विक्रय का स्थापन्न करै ॥

ता० । कितनी दूरके देशांतरसे यह द्रव्यआया है यह पदार्थ का आगम (आना) और अपने देश में पैदाहुआ द्रव्य कितनी दूर जायगा यह पदार्थ का निर्गम (जाना) और कितने काल पर्यंत रखने पर कितना मूल्य मिलेगा- और कितनी इस द्रव्य में वृद्धि हुई- और भृत्यों के भोजन वस्त्र और यान आदि में कितना व्यय (खर्च) हुआ- इसप्रकार इन सबका निश्चय करै जैसे खरीदनेवाले व्यापारियों को दुःख नहो फिर क्रय और विक्रयों का राजा स्थापन करै- अर्थात् बेचन और खरीदने के नियमों को नियत करै ४०१ ॥

पंचरात्रेपंचरात्रेपक्षेपक्षेऽथवागते।कुर्वीतचैषांप्रत्यक्षमर्घसंस्थापनन्नृपः ४०२ ॥

प० । पंचरात्रे पंचरात्रे पक्षे पक्षे अथवा गते कुर्वीत च एषां प्रत्यक्षं अर्घसंस्थापनं नृपः ॥

यो० । पंचरात्रे पंचरात्रे अथवा पक्षे पक्षे गतेगते एषां अर्घसंस्थापनं नृपः प्रत्यक्षं कुर्वीत ॥

भा० । ता० । पांच२ रात्रि अथवा पंद्रह२ दिनके अनन्तर इन संपूर्ण द्रव्योंके अर्घ (मोल) की व्यवस्थाका नियम सबव्यापारियों के सन्मुखकरै क्योंकि द्रव्योंका आनाजाना और उपाय इनका कोई नियत समय नहीं है ४०२ ॥

तुलामानंप्रतीमानंसर्वंचस्यात्सुलक्षितम्।षट्सुषट्सुचमासेषुपुनरेवपरीक्षयेत् ४०३॥

प० । तुलामानं प्रतीमानं सर्वं च स्यात् सुलक्षितम् षट्सु षट्सु च मासेषु पुनः एव परीक्षयेत् ॥

यो० । तुलामानं चपुनः प्रतीमानं सर्वं राजा सुलक्षितं स्यात् चपुनः षट्सु षट्सु मासेषु गतेषु राजा पुनः एव (अपि) परीक्षयेत् ॥

भा० । ता० । तोलका प्रमाण और सुवर्णआदिके तोलकी परीक्षाकेलिये जो कियाजाय वह प्रतीमान इन सबको राजादेखे अर्थात् स्वयं देखकर नियतकरै और छः२ महीने के अनन्तर पुनः परीक्षा करतारहै ४०३ ॥

पणंयानंतरेदाप्यंपौरुषोऽर्द्धपणंतरे । पादंपशुश्चयोषिच्चपादार्द्धंरिक्तकःपुमान् ४०४ ॥

प० । पणं यानं तरे दाप्यं पौरुषः अर्द्धपणं तरे पादं पशुः च योषित् च पादार्द्धं रिक्तकः पुमान् ॥

यो० । राज्ञा तरे यानं पणं दाप्यं- पौरुषः तरे अर्द्धपणं दाप्यः- पशुः चपुनः योषित् (स्त्री) पादं- रिक्तकः पुमान् पादार्द्धं दाप्यः ॥

भा० । ता० । नावसे पार उतारनेमें भांडोंसे भरेहुये यानोंपर राजा एकपण दंडदे अर्थात् एक

पण कर (महसूल) ले और पुरुषके भारपर आधापण—और पशु और स्त्रीसे चौथाई पण—और रिक्तक (रीता) अर्थात् भाररहित मनुष्यसे पणका आठवांभाग—राजा ग्रहणकरै ४०४ ॥

भाण्डपूर्णानियानानितार्यंदाप्यानिसारतः । रिक्तभाण्डानियत्किंचित्पुमांसश्चापरिच्छदाः ४०५

प० । भांडपूर्णानि यानानि तार्यं दाप्यानि सारतः रिक्तभांडानि यत् किंचित् पुमांसः च अपरिच्छदाः ॥

यो० । भांडपूर्णानि यानानि सारतः तार्यं राज्ञा दाप्यानि—रिक्तभांडानि चपुनः अपरिच्छदाः पुमांसः यत् किंचित् दाप्याः—(दंडनीयाः) ॥

भा० । ता० । विक्रयके द्रव्यसे भरेहुये शकट (गाडी) यानोंपर सारको देखकर अर्थात् जैसा द्रव्यभराहो वैसाही कर राजा ग्रहणकरै और द्रव्योंसे रहित गून और कम्बल आदिकोंपर और अपरिच्छद (दरिद्री) मनुष्योंपर यत् किंचितही करको राजा ग्रहणकरै ४०५ ॥

दीर्घाध्वनियथादेशंयथाकालंतरोभवेत् । नदीतीरेषुतद्विद्यात्समुद्रेनास्तिलक्षणम् ४०६

प० । दीर्घाध्वनि यथादेशं यथाकालं तरः भवेत् नदीतीरेषु तत् विद्यात् समुद्रे न अस्ति लक्षणम् ॥

यो० । दीर्घाध्वनि यथादेशं यथाकालं तरः भवेत् तत् (पूर्वोक्तं) नदीतीरेषु विद्यात्—समुद्रे लक्षणं न अस्ति ॥

भा० । ता० । यदि नदीके मार्गसे दूरदेशमें द्रव्यजाय तो वहांपर देशकालके अनुसार नावका करहोता है अर्थात् जलके न्यून वा अधिकवेगको और उष्णकाल और वर्षाके समयको देखकर नाव के मूल्य (कर) को राजा नियतकरै और यहमूल्य नदीके तीरपर समझना—और समुद्रमें तो पवन के आधीन नाव चलती है इससे नावके चलनेमें बाधा नहीं होसकती—वहां उचितही करको राजा ग्रहणकरै ४०६ ॥

गर्भिणीतुद्विमासादिस्तथाप्रव्रजितोमुनिः । ब्राह्मणालिङ्गिनश्चैवनदाप्यास्तारिकंतरे ४०७

प० । गर्भिणी तु द्विमासादिः तथा प्रव्रजितः मुनिः ब्राह्मणाः लिंगिनः च एव न दाप्याः तारिकं तरे ॥

यो० । द्विमासादिः गर्भिणी स्त्री तथा प्रव्रजितः मुनिः चपुनः लिंगिनः ब्राह्मणाः तरे तारिकं न दाप्याः ॥

भा० । ता० । दोमहीनेसे अधिक गर्भवती स्त्री और संन्यासी मुनि (वानप्रस्थ) और ब्रह्मचारी ब्राह्मण—इनसे नावका कर राजा ग्रहण न करै (नले) ४०७ ॥

यन्नाविकिंचिद्दासानांविशीर्येतापराधतः । तद्दासैरेवदातव्यंसमागम्यस्वतोऽशतः ४०८

प० । यत् नावि किंचित् दासानां विशीर्येत अपराधतः तत् दासैः एव दातव्यं समागम्य स्वतः अंशतः ॥

यो० । नावि यत् किंचित् द्रव्यं दासानां अपराधतः विशीर्येत (नश्येत्) तत् द्रव्यं स्वतः अंशतः दासैः एव समागम्य दातव्यम् ॥

भा० । ता० । जो द्रव्य नावमें दासों (सेवक) के अपराधसे नष्ट होजाय उसद्रव्यको अपने अंशमेंसे इकट्ठे होकर दासही देदे ४०८ ॥

एषनौयायिनामुक्तोव्यवहारस्यनिर्णयः । दासापराधतस्तोयेदैविकेनास्तिनिग्रहः ४०९

प० । एषः नौयायिनां उक्तः व्यवहारस्य निर्णयः दासापराधतः तोये दैविके न अस्ति निग्रहः ॥

यो० । नौयायिनां व्यवहारस्य एषः निर्णयः उक्तः तोये दासापराधतः दैविके निग्रहः न अस्ति ॥

भा० । ता० । नावमें जानेवाले व्यवहारियोंका जो द्रव्य जलमें दासोंके अपराधसे नष्टहोजाय उसको नावके चलानेवाले दासहीदें-यह निर्णय मैंनेकहा और दैवगतिसे अर्थात् प्रबल पवनआदि के वेगसे नष्टहुई नावके होनेपर जो हानिहोजाय वहां दासोंको कुछदण्ड नहींहोता ४०९ ॥

वाणिज्यंकारयेद्वैश्यंकुसीदंकृषिमेवच । पशूनांरक्षणंचैवदास्यंशूद्रंद्विजन्मनाम् ४१० ॥

प० । वाणिज्यं कारयेत् वैश्यं कुसीदं कृषिं एव च पशूनां रक्षणं च एव दास्यं शूद्रं द्विजन्मनाम् ॥

यो० । राजा वैश्यं वाणिज्यं-कुसीदं-कृषिं-चपुनः पशूनां रक्षणं कारयेत्-शूद्रं द्विजन्मनां दास्यं कारयेत् ॥

भा० । ता० । राजा-वैश्यसे वाणिज्य (लेनदेन) और कुसीद (व्याजपर रुपयादेना) और खेती और पशुओंकी रक्षा करवावे-और शूद्रपर द्विजातियोंकी सेवा करवावे यदि वैश्य और शूद्र न करें तो राजा दंडदे ४१० ॥

क्षत्रियंचैववैश्यंचब्राह्मणोवृत्तिकर्शितौ । बिभृयादानृशंस्येनस्वानिकर्माणिकारयन् ४११ ॥

प० । क्षत्रियं च एव वैश्यं च ब्राह्मणः वृत्तिकर्शितौ बिभृयात् आनृशंस्येन स्वानि कर्माणि कारयन् ॥

यो० । ब्राह्मणः वृत्तिकर्शितौ क्षत्रियं चपुनः वैश्यं स्वानि कर्माणि कारयन् सन् आनृशंस्येन बिभृयात् (पालयेत्)॥

भा० । ता० । आजीविकासे रहित क्षत्री और वैश्यपर उनकी जातिके कर्मोंको दयासे करवाता हुआ ब्राह्मण दोनोंको भोजन वस्त्रसे पालनाकरै यदि सामर्थ्यवाला ब्राह्मण शरणागतहुये और उक्त (कहेहुये) क्षत्रिय और वैश्यकी पालना न करै तो राजा उसको दंडदे ४११ ॥

दास्यंतुकारयँल्लोभाद्ब्राह्मणःसंस्कृतान्द्विजान् । अनिच्छतःप्राभवत्याद्राज्ञादण्ड्यःशतानिषट् ४१२

प० । दास्यं तु कारयन् लोभात् ब्राह्मणः संस्कृतान् द्विजान् अनिच्छतः प्राभवत्यात् राज्ञा दंड्यः शतानि षट् ॥

यो० । प्राभवत्यात् दास्यं अनिच्छतः संस्कृतान् द्विजान् लोभात् दास्यं कार्यं ब्राह्मणः षट् शतानि राज्ञा दंड्यः ॥

भा० । ता० । प्रभुतासे सेवाको नहीं चाहतेहुये संस्कृत (जिनका यज्ञोपवीत होचुकाहो) द्विजों पर लोभसे सेवाकरातेहुये ब्राह्मणको राजा ६०० पणदंडदे ४१२ ॥

शूद्रंतुकारयेद्दास्यंक्रीतमक्रीतमेववा । दास्यायैवहिसृष्टोऽसौब्राह्मणस्यस्वयंभुवा ४१३ ॥

प० । शूद्रं तु कारयेत् दास्यं क्रीतं अक्रीतं एव वा दास्याय एव हि सृष्टः असौ ब्राह्मणस्य स्वयंभुवा ॥

यो० । क्रीतं वा अक्रीतं एव शूद्रं ब्राह्मणः दास्यं कारयेत्-हि (यतः) स्वयंभुवा ब्राह्मणस्य दास्याय एव असौ सृष्टः (रचितः) ॥

भा० । ता० । भोजन वस्त्रदेकर पालन कियेहुये वा नहीं पालन कियेहुये शूद्रपर तो ब्राह्मणसेवा करवावे क्योंकि ब्राह्मणकी सेवाकेलियेही इसशूद्रको ब्रह्माने रचाहै ४१३ ॥

नस्वामिनानसृष्टोऽपिशूद्रोदास्याद्विमुच्यते । निसर्गजंहितत्तस्यकस्तस्मात्तदपोहति ४१४ ॥

प० । नँ स्वामिँना निसृष्टः अँपि शूद्रः दास्यात् विमुच्येते निसर्गजं हिँ तत् तस्य कः तस्मात् तत् अपोहँति ॥

यो० । स्वामिना निसृष्टः अपि शूद्रः दास्यात् न विमुच्यते-हि (यतः) तत् (दास्यं) तस्य निसर्गजं (स्वाभाविकं) अस्ति अतः तत् (दास्यं) तस्मात् कः अपोहति-(दूरीकरोति) ॥

भा० । स्वामीका त्यागाहुआ भी शूद्र सेवाकरनेसे नहीं छूटसकता क्योंकि सेवा शूद्रका स्वाभाविक धर्म है वह उससे दूरनहीं होसकता ॥

ता० । जिससे यह शूद्रध्वजा बांधकर संग्रामके जीतनेसे दासभावको प्राप्तहुआ है इससे स्वामीके त्यागनेपर भी दासभावसे नहीं छूटसकता-क्योंकि शूद्रका दासभावहोना स्वाभाविक कर्म है इससे उस दासकर्मको शूद्रसे कोई भी दूरनहीं करसकता अर्थात् जैसे उसकी शूद्रत्वजाति दूरनहीं होसकती इसीप्रकार दासकर्म भी दूरनहीं होसकता-इससे परलोकमें सुखकेलिये भी शूद्र ब्राह्मणों की सेवाकरे-यदि न करे तो शूद्रके धर्मोंमें दासकर्मका गिनना वृथा होजायगा ४१४ ॥

ध्वजाहृतोभक्तदासोगृहजःक्रीतदत्त्रिमौ । पैत्रिकोदण्डदासश्चसप्तैतेदासयोनय. ४१५ ॥

प० । ध्वजाहृतः भक्तदासः गृहजः क्रीतदत्त्रिमौ पैत्रिकः दंडदासः चँ सप्त एते दासयोनयः ॥

यो० । ध्वजाहृतः भक्तदासः गृहजः क्रीतदत्त्रिमौ पैत्रिकः चपुनः दण्डदास -एते सप्तदासयोनयः सन्ति ॥

भा० । ता० । ये सातप्रकारके दासके कारण होतेहैं-संग्रामसे जीता-भोजनदेकर रक्खाहुआ-दासीका पुत्र-मोलदेकर लिया-और सेवाकेलिये दियाहुआ-और पिताके आगेसे चलाआया-दण्ड आदिसे सेवा करनेवाला अर्थात् ऋणआदिके देने अर्थ जो सेवाका स्वीकारकरे ४१५ ॥

भार्यापुत्रश्चदासश्चत्रयएवाधनाःस्मृताः । यत्तेसमधिगच्छन्तियस्यतेतस्यतद्धनम् ४१६ ॥

प० । भार्या पुत्रः चँ दासः चँ त्रयः एवँ अधनाः स्मृताः यत् ते समधिगच्छंति यस्य ते तस्य तत् धनम् ॥

यो० । भार्या पुत्रः चपुनः दासः एतेत्रयः एव अधनाः स्मृताः ते यत् धनं समधिगच्छन्ति तत् धनं तस्य भवति यस्य ते भवन्ति ॥

भा० । स्त्री-पुत्र-दास-ये तीनों निर्द्धन कहे हैं ये तीनों जो धन संचित करते हैं वहधन उसकाही है जिसके ये तीनों होते हैं अर्थात् जो इनतीनोंका स्वामी है ॥

ता० । स्त्री-पुत्र-दास-इनतीनोंको मनुआदिकोंने निर्द्धन कहाहै क्योंकि जिस धनको ये तीनों संचय करतेहैं वह धन उसकाही होताहै जिसके ये तीनोंहोतेहैं-यह वचन भार्याआदि तीनोंको परतन्त्र जतानेकेलिये है और सर्वथा निर्द्धनका बोधक नहींहै क्योंकि आगे मनुजीही अध्यग्निआदि छःप्रकारका धन स्त्रीका कहेंगे और धनसेही अदृष्ट कर्म बनते हैं इससे स्त्रीको भी पतिके संग यज्ञ का अधिकार है और पुरुषके धनमें अनुमतिकेद्वारा स्त्रीभी धर्म करनेवाली होती है ४१६ ॥

विस्रब्धंब्राह्मणःशूद्राद्द्रव्योपादानमाचरेत् । नहितस्यास्तिकिंचित्स्वंभर्तृहार्यधनोहिसः ४१७

प० विस्रब्धं ब्राह्मणः शूद्रात् द्रव्योपादानं आचरेत् नँ हिँ तस्य अस्ति किंचित् स्वं भर्तृहार्य धनः हिँ सः ॥

यो० । ब्राह्मणः शूद्रात् विस्रब्धं द्रव्योपादानं आचरेत्–हि (यतः) तस्य (शूद्रस्य) किंचित् स्वं न अस्ति–हि (यतः) सः (शूद्रः) भर्तृहार्यधनः भवति ॥

भा० । ता० । ब्राह्मण शूद्रसे निस्संदेह होकर धनका ग्रहणकरै–क्योंकि जिससे उस शूद्रके धन का ग्राहक स्वामीहोता है इससे उस शूद्रका किंचित् भी धन नहींहोता–इससे यदि ब्राह्मण आपत्तिके समय बलात्कारसे भी शूद्रसे धनका ग्रहण करले तो राजा उस ब्राह्मणको दंड न दे ४१७ ॥

वैश्यशूद्रौप्रयत्नेनस्वानिकर्माणिकारयेत् ।तौहिच्युतौस्वकर्मभ्यःक्षोभयेतामिदंजगत् ४१८॥

प० वैश्यशूद्रौ प्रयत्नेन स्वानि कर्माणि कारयेत् तौ हि च्युतौ स्वकर्मभ्यः क्षोभयेतां इदं जगत् ॥

यो० । राजा वैश्यशूद्रौ प्रयत्नेन स्वानि कर्माणि कारयेत्– हि (यतः) स्वकर्मभ्यः च्युतौ तौ इदं जगत् क्षोभयेताम् ॥

भा० । ता० । वैश्य और शूद्रपर राजा बडे यत्नसे अपने२ कर्मोंको करावे क्योंकि अपने कर्मोंसे पतित येदोनों (न करतं) इस जगत्को अनुचित धनके मदसे व्याकुल करदेतेहैं ४१८ ॥

अहन्यहन्यवेक्षेतकर्मान्तान्वाहनानिच । आयव्ययौचनियतावाकरान्कोशमेवच ४१९ ॥

प० अहानि अहानि अवेक्षेत कर्मांतान् वाहनानि च आयव्ययौ च नियतौ आकरान् कोशं एव च ॥

यो० । कर्मांतान चपुन. वाहनानि नियतौ आयव्ययौ आकरान चपुन. कोशं राजा अहनि अहनि अवेक्षेत (पश्येत्) ॥

भा० । ता० । प्रारम्भ कियेहुये कर्मोंकी समाप्तिको और हाथीआदि वाहनोंको आज कौनवस्तु आई और कौनगई–और सुवर्ण आदेके आकर (खानि) और कोश– इन सबको राजा प्रतिदिन देखै ४१९ ॥

एवंसर्वानिमान्राजाव्यवहारान्समापयन् । व्यपोह्यकिल्बिषंसर्वंप्राप्नोतिपरमांगतिम् ४२० ॥

इतिमानवेधर्मशास्त्रेभृगुप्रोक्तायांसंहितायामष्टमोऽध्यायः ८ ॥

प० । एवं सर्वान् इमान् राजा व्यवहारान् समापयन् व्यपोह्य किल्बिषं सर्वं प्राप्नोति परमां गतिम् ॥

यो० । इमान सर्वान् व्यवहारान एवं समापयन् राजा सर्वं किल्बिषं व्यपोह्य परमां गतिं प्राप्नोति ॥

भा० । ता० । इस पूर्वोक्त रीतिसे इन संपूर्ण व्यवहारोंको समाप्त करताहुआ अर्थात् यथार्थ निर्णय करताहुआ राजा सबपापको नष्टकरके परमगतिको प्राप्तहोता है ४२० ॥

इति मन्वर्थ भास्करे अष्टमोऽध्यायः ८ ॥

अथनवमाध्यायः ९ ॥

पुरुषस्यस्त्रियाश्चैवधर्म्येवर्त्मनितिष्ठतोः।संयोगेविप्रयोगेचधर्मान्वक्ष्यामिशाश्वतान् १

प० । पुरुषस्य स्त्रियाः च एव धर्म्ये वर्त्मनि तिष्ठतोः संयोगे विप्रयोगे च धर्म्यान् वक्ष्यामि शाश्वतान् ॥

यो० । धर्म्ये वर्त्मनि तिष्ठतोः पुरुषस्य चपुनः स्त्रियाः संयोगे चपुनः विप्रयोगे शाश्वतान् धर्मान् वक्ष्यामि ॥

भा० । ता० । धर्मके हितकारी परस्पर प्रीतिके मार्गमें टिकतेहुये स्त्री और पुरुष के संयोग और वियोग में परंपरा से चले आये धर्मोंको कहताहूं— यहां व्यवहार के प्रकरणमें स्त्री पुरुष के धर्मोंका इसलिये वर्णन किया है कि यदि स्त्री अथवा पुरुष परस्परके कर्तव्य धर्म का अवलंबन करें तो दंड से भी राजा उनको उनके धर्म में स्थापन करे १ ॥

अस्वतन्त्राःस्त्रियःकार्य्याःपुरुषैस्वैर्दिवानिशम् ।विषयेषुचसज्जन्त्यःसंस्थाप्याआत्मनोवशे २

प० । अस्वतंत्राः स्त्रियः कार्याः पुरुषैः स्वैः दिवानिशं विषयेषु च सज्जंत्यः संस्थाप्याः आत्मनः वशे ॥

यो० । स्वैः पुरुषैः स्त्रियः दिवानिशं अस्वतंत्राः कार्याः चपुनः विषयेषु सज्जंत्यः स्त्रियः आत्मनः वशे संस्थाप्याः ॥

भा० । ता० । अपने पति आदि मनुष्य स्त्रियोंको सदैव अस्वतंत्र (पराधीन) रक्खें—और अनिषिद्ध भी विषयोंमें आसक्त हुई स्त्रियोंको अपने वशमें टिकावें अर्थात् पतिके अनुकूल जैसे रहैं उस प्रकार रक्खें २ ॥

पितारक्षतिकौमारेभर्त्तारक्षतियौवने।रक्षन्तिस्थविरेपुत्रानस्त्रीस्वातन्त्र्यमर्हति ३ ॥

प० । पिता रक्षति कौमारे भर्ता रक्षति यौवने रक्षंति स्थविरे पुत्राः न स्त्री स्वातंत्र्यं अर्हति ॥

यो० । कौमारे पिता रक्षति- यौवने भर्ता रक्षति—स्थविरे पुत्राः रक्षंति-अतः स्त्री स्वातंत्र्यं न अर्हति ॥

भा० । ता० । बालक अवस्थामें स्त्रीकी रक्षा पिता—और यौवन अवस्थामें पति—और वृद्धअवस्थामें पुत्र रक्षा, करते हैं— इससे स्त्री कभी भी स्वतंत्र रहने योग्य नहीं हैं—यहां पर यौवनमें पति की रक्षाका कथन प्रायिक है क्योंकि जिसके पति और पुत्र नहों उसकी रक्षा पिता आदि को भी कर्तव्य है ३ ॥

कालेऽदातापितावाच्योवाच्यश्चानुपयन्पतिः । मृतेभर्त्तरिपुत्रस्तुवाच्योमातुररक्षिता ४ ॥

प० । काले अदाता पिता वाच्यः वाच्यः च अनुपयन् पतिः मृते भर्तरि पुत्रः तु वाच्यः मातुः अरक्षिता ॥

यो० । काले अदाता पिता वाच्यः भवति—अनुपयन् पतिः वाच्यः—भर्त्तरि मृते सति मातुः अरक्षिता पुत्रः वाच्य. (निंदार्हः) भवति ॥

भा० । ता० । समयपर (ऋतुकाल से पूर्व) कन्याको नहीं देताहुआ पिता निंदाके योग्य होताहै क्योंकि इस[1] गौतमके वचनसे ऋतुकाल से पूर्वही कन्याका दान कहा है और ऋतुकालमें स्त्री के संग गमन को न करताहुआ पति—और पतिके मरने पर माताकी रक्षा न करताहुआ पुत्र निंदित होताहै ४ ॥

सूक्ष्मेभ्योऽपिप्रसंगेभ्यःस्त्रियोरक्ष्याविशेषतः । द्वयोर्हिकुलयोःशोकमावहेयुररक्षिताः ५ ॥

प० । सूक्ष्मेभ्यः अपि प्रसंगेभ्यः स्त्रियः रक्ष्याः विशेषतः द्वयोः हि कुलयोः शोकं आवहेयुः अरक्षिताः ॥

यो० । सूक्ष्मेभ्यः अपि प्रसंगेभ्यः स्त्रियः विशेषतः रक्ष्याः—हि (यतः) अरक्षिताः स्त्रियः द्वयोः कुलयोः शोकं आवहेयुः (दापयेयुः) ॥

---

१ प्रदानं प्रागृतोरिति ॥

भा० । ता० । अल्प २ भी कुसंगों (जिनसे शील नष्टहो) से स्त्रियोंकी विशेषकर रक्षा करनी क्योंकि नहीं की है रक्षा जिनकी ऐसी स्त्री दोनों कुलों (पिता और पति के) को शोक (संताप) दिलाती हैं ५ ॥

इमंहिसर्ववर्णानांपश्यन्तोधर्ममुत्तमम् । यतन्तेरक्षितुंभार्यांभर्त्तारोदुर्बलाअपि ६ ॥

प० । इमं हि सर्ववर्णानां पश्यंतः धर्मं उत्तमं यतंते रक्षितुं भार्यां भर्त्तारः दुर्बलाः अपि ॥

यो० । सर्ववर्णानां इमं उत्तमं धर्मं पश्यंतः दुर्बला· अपि भर्तारः भार्यां रक्षितुं यतंते (यत्नंकुर्वंति) ॥

भा० । ता० । ब्राह्मण आदि चारों वर्णों के इस उत्तम धर्म को देखतेहुये दुर्बल भी पति (अन्धे पंगु आदि) भार्या (स्त्री) की रक्षा करने में यत्नकरते हैं ६ ॥

स्वांप्रसूतिंचरित्रञ्चकुलमात्मानमेवच । स्वञ्चधर्मम्प्रयत्नेनजायांरक्षन्हिरक्षति ७ ॥

प० । स्वां प्रसूतिं चरित्रं च कुलं आत्मानं एव च स्वं च धर्मं प्रयत्नेन जायां रक्षन् हि रक्षति ॥

यो० । हि (यतः) प्रयत्नेन जायां रक्षन सन पुरुषः स्वां प्रसूतिं चरित्रं-कुलं चपुनः आत्मानं चपुनः स्वं धर्मं· रक्षति ॥

भा० । जिससे भार्या की रक्षा जो बड़े यत्न से करता है वह अपनी संतान—आचरण—कुल और अपने आत्मा—और अपने धर्म की रक्षा करता है इससे स्त्री की रक्षा करै ॥

ता० । जिससे बड़े यत्न से जाया (पत्नी) की रक्षा करनेवाला मनुष्य असंकीर्ण और विशुद्ध संतानकी उत्पत्ति से अपनी संतानकी—और शिष्टों के आचरण की—और अपने कुलकी और शुद्ध संतान के होने से अपने मरने पर और्द्ध्वदैहिक कर्म के करने से अपने आत्मा की और—अपने धर्म की—रक्षा करता है क्योंकि जिसकी भार्या शुद्धहो उसी को आधान (अग्निहोत्र) का भी अधिकार है इससे मनुष्य भार्या की रक्षा अवश्यमेव करै ७ ॥

पतिर्भार्यांसम्प्रविश्यगर्भोभूत्वेहजायते । जायायास्तद्धिजायात्वंयदस्यांजायतेपुनः ८ ॥

प० । पतिः भार्यां संप्रविश्य गर्भः भूत्वा इह जायते जायायाः तत् हि जायात्वं यत् अस्यां जायते पुनः ॥

यो० । पतिः भार्यां संप्रविश्य-गर्भः भूत्वा इह (भार्यायां) जायते हि (निश्चयेन) जायायाः जायात्वं तत् भवति यत् अस्यां (जायायां) पुनः जायते (उत्पद्यते) ॥

भा० । पति जायामें प्रविष्टहो और गर्भ होकर भार्यामें पैदा होताहै—और वही जायाका जायापनहै जो पति इस जायामें पुनः (फिर) पैदा होताहै ॥

ता० । पति शुक्ररूप होकर भार्या में प्रवेशकरके और गर्भ रूपहोकर दशवें मासमें पैदा होताहै—क्योंकि इस श्रुति में यह लिखाहै कि पुत्र अपनी आत्मा है और जायाका वही जायापन है कि जिससे पति इस जायामें फिर (दुबारा) पैदा होताहै और यही इसे बह्वृच ब्राह्मणमें लिखाहै कि पति मातारूप जायामें प्रवेश करता है और गर्भ होकर उसी भार्या से फिर नवीन होकर दशवें मास में

१ आत्मावै पुत्रनामासि ॥

२ पतिर्जायांप्रविशति गर्भोभूत्वेहमातरं तस्यां पुनर्नवोभूत्वा दशमेमासिजायते तज्जाया जाया भवति यदस्यां जायते पुनः ॥

उत्पन्न होताहै वही जाया जाया होती है जिसमें पति पुनः पैदा होताहै—इससे भार्या की अवश्य रक्षा करनी इसलिये इस श्लोक से जाया शब्द के अर्थकोही मनुजीने स्पष्ट किया है ८ ॥

यादृशंभजतेहिस्त्रीसुतंसूतेतथाविधम् । तस्मात्प्रजाविशुद्ध्यर्थंस्त्रियंरक्षेत्प्रयत्नतः ९ ॥

प० । यादृशं भजते हि स्त्री सुतं सूते तथाविधं तस्मात् प्रजाविशुद्ध्यर्थं स्त्रियं रक्षेत् प्रयत्नतः ॥

यो० । स्त्री यादृशं पुरुषं भजते तथाविधं सुतं सूते तस्मात् प्रजाविशुद्ध्यर्थं प्रयत्नतः स्त्रियं रक्षेत् ॥

भा० । ता० । जैसे (शास्त्रोक्त वा निषिद्ध) पतिको स्त्री भजती है वैसेही पुत्रको पैदाकरती है अर्थात् उत्तमसे उत्तम और नीचसे नीच को—तिससे संतानकी शुद्धिके लिये बड़े यत्नसे स्त्री की रक्षा करै ९ ॥

नकश्चिद्योषितःशक्तःप्रसह्यपरिरक्षितुम् । एतैरुपाययोगैस्तुशक्यास्ताःपरिरक्षितुम् १०

प० । न कश्चित् योषितः शक्तः प्रसह्य परिरक्षितुं एतैः उपाययोगैः तु शक्याः ताः परिरक्षितुम् ॥

यो० । कश्चित् अपि पुरुषः प्रसह्य योषितः परिरक्षितुं नशक्तः एतैः (वक्ष्यमाणैः) उपाययोगैः तु ताः स्त्रियः परिरक्षितुं शक्याः भवंति ॥

भा० । ता० । कोई भी मनुष्य बलसे स्त्रियोंकी रक्षा करनेको समर्थ नहीं होता—परंतु इनउपायोंसे (जो आगे कहेंगे) वे स्त्री रक्षाकरनेको शक्य हैं अर्थात् इन उपायों से मनुष्य इनकी रक्षा करसकता है १० ॥

अर्थस्यसंग्रहेचैनांव्ययेचैवनियोजयेत् । शौचेधर्मेऽन्नपक्त्यांचपारिणाह्यस्यचेक्षणे ११ ॥

प० । अर्थस्य संग्रहे च एनां व्यये च एव नियोजयेत् शौचे धर्मे अन्नपक्त्यां च पारिणाह्यस्य च ईक्षणे ॥

यो० । पुरुषः एनां (भार्यां) अर्थस्य (धनस्य) संग्रहे चपुनः व्यये शौचे—धर्मे चपुनः अन्नपक्त्यां (अन्नपाके) चपुनः पारिणाह्यस्य (गृहसामग्र्याः) ईक्षणे (दर्शने) नियोजयेत् ॥

भा० । ता० । उनही रक्षा के उपायोंको कहते हैं कि मनुष्य अपनी स्त्रीको धनके संग्रह और व्यय (खर्च) में—और द्रव्य और देहकी शुद्धिमें—और पतिकी सेवा आदि धर्ममें और अन्न के पाक (भोजन बनाना) में और शय्या—आसन—कुंड— कटाह आदि घरकी सामग्रियों के देखने में—नियुक्त करै—अर्थात् इनमें लगने से स्त्रीका चित्त अन्यथा न होगा ११ ॥

अरक्षितागृहेरुद्धाःपुरुषैराप्तकारिभिः । आत्मानमात्मनायास्तुरक्षेयुस्ताःसुरक्षिताः १२

प० । अरक्षिताः गृहे रुद्धाः पुरुषैः आप्तकारिभिः आत्मानं आत्मना याः तु रक्षेयुः ताः सुरक्षिताः ॥

यो० । आप्तकारिभिः पुरुषैः गृहे रुद्धाः स्त्रियः अरक्षिताः भवंति—तुपुनः याः स्त्रियः आत्मना आत्मानं रक्षेयुः ताः सुरक्षिताः भवंति ॥

भा० । साधु सेवकों से घरमें रोकीहुई स्त्री रक्षित नहीं होती और जो स्त्री अपनी बुद्धिसे ही अपनी रक्षाकरती हैं वे भलीप्रकार रक्षित होती हैं ॥

ता० । आप्त (सज्जन) आज्ञाके करनेवाले पुरुषों के घरके भीतर रुद्ध (रोकीहुई) भी स्त्री रक्षित (रक्षाकरने योग्य) नहीं होती अर्थात् दुष्टशील होने से अपनी रक्षाकर नहीं सकती और जो स्त्री

धर्म की ज्ञाताहोनेसे अपनी बुद्धिसेही अपने आत्माकी रक्षा करतीहैं वे स्त्री भलीप्रकार रक्षित होती हैं—इससे धर्म अधर्म के फल स्वर्ग और नरक आदि के उपदेशसे स्त्रियों का संयम करना—यही स्त्रियोंकी रक्षाका मुख्य उपाय है १२ ॥

पानंदुर्जनसंसर्गःपत्याचविरहोऽटनम् । स्वप्नोऽन्यगेहवासश्चनारीसंदूषणानिषट् १३ ॥

प० । पानं दुर्जनसंसर्गः पत्या च विरहः अटनं स्वप्नः अन्यगेहवासः च नारीसंदूषणानि षट् ॥

यो० । पानं—दुर्जनसंसर्गः चपुनः पत्या विरहः अटनं स्वप्नः चपुनः अन्यगेहवासः इमानिषट् नारीसंदूषणानि भवंति ॥

भा० । ता० । मदिराकापीना—दुर्जनोंका संग—पतिसे वियोग—इधर उधर भ्रमण—विना समय सोना—अन्य के घर में वास ये छः स्त्रियोंके दूषण हैं अर्थात् व्यभिचार आदि के पैदाकरनेवाले होते हैं तिससे इन दूषणों से स्त्रियोंकी रक्षा करै १३ ॥

नैतारूपंपरीक्षन्तेनासांवयसिसंस्थितिः । सुरूपंवाविरूपंवापुमानित्येवभुञ्जते १४ ॥

प० । न एताः रूपं परीक्षंते न आसां वयसि संस्थितिः सुरूपं वा विरूपं वा पुमान् इति एव भुंजते ॥

यो० । एताः (स्त्रियः) रूपं न परीक्षंते—एषां वयसि (यौवनादौ) संस्थितिः (आदरः) न भवति—किंतु पुमान् इति बुद्ध्वाएव सुरूपं वा विरूपं भुंजते ॥

भा० । ता० । ये स्त्री रूपकी परीक्षा नहीं करतीं और न इनका आदर यौवन आदि अवस्था में है किंतु पुरुषमात्रको देखकरही ये स्त्री भोगती हैं अर्थात् जैसे तैसे पुरुषका देखनाही इनकी रति का संपादक होताहै १४ ॥

पौंश्चल्याच्चलचित्ताच्चनैस्नेह्याच्चस्वभावतः । रक्षितायत्नतोऽपीहभर्तृष्वेताविकुर्वते १५

प० । पौंश्चल्यात् चलचित्तात् च नैस्नेह्यात् च स्वभावतः रक्षिताः यत्नतः अपि इह भर्तृषु एताः विकुर्वते ॥

यो० । यत्नतः रक्षिताः अपि एताः पौंश्चल्यात् चपुनः चलचित्तात् चपुनः स्वभावतः नैस्नेह्यात् भर्तृषु विकुर्वते (विकारं कुर्वंति) ॥

भा० । ता० । यत्नसे रक्षाकी हुई भी स्त्री—पुरुष के देखने से ही भोग आदि की अभिलाषा—चित्तकी अस्थिरता—और स्वभाव से स्नेहकी हीनता—से अपने भर्ताओं में विकारको प्राप्त होती हैं अर्थात् पतिके प्रतिकूल आचरण करती हैं १५ ॥

एवंस्वभावंज्ञात्वाऽऽसांप्रजापतिनिसर्गजम् । परमंयत्नमातिष्ठेत्पुरुषोरक्षणंप्रति १६ ॥

प० । एवं स्वभावं ज्ञात्वा आसां प्रजापतिनिसर्गजं परमं यत्नं आतिष्ठेत् पुरुषः रक्षणं प्रति ॥

यो० । प्रजापतिनिसर्गजं एषां एवं स्वभावं ज्ञात्वा पुरुषः रक्षणं प्रति परमं यत्नं आतिष्ठेत् (कुर्यात्) ॥

भा० । ता० । ब्रह्मा की सृष्टिकाल से पैदाहुये इनके ऐसे स्वभाव को जानकर इनकी रक्षा में मनुष्य परम यत्न करै १६ ॥

शय्यासनमलंकारंकामंक्रोधमनार्जवम् । द्रोहभावंकुचर्यांचस्त्रीभ्योमनुरकल्पयत् १७ ॥

प० । शय्यासनं अलंकारं कामं क्रोधं अनार्जवं द्रोहभावं कुचर्यां च स्त्रीभ्यः मनुः अकल्पयत् ॥

यो०। शय्यासनं अलंकारं-कामं क्रोधं-अनार्जवं-द्रोहभावं-चपुनः कुचर्या-मनुः स्त्रीभ्यः अकल्पयत् (अर्चयत्)॥

भा०। ता०। शय्यापर बैठना-भूषणों में प्रीति-कामदेव-क्रोध-कुटिलता-द्रोह-निंदित आचरण-ये सब मनुजी ने स्त्रियोंके लिये रचे हैं इससे स्त्री यत्नसे रक्षाकरने योग्य हैं १७॥

नास्तिस्त्रीणांक्रियामन्त्रैरितिधर्मेव्यवस्थितिः।निरिन्द्रियाह्यमन्त्राश्चस्त्रियोऽनृतमितिस्थितिः१८

प०। न अस्ति स्त्रीणां क्रिया मंत्रैः इति धर्मे व्यवस्थितिः निरिंद्रियाः हि अमंत्राः च स्त्रियः अनृतं इति स्थितिः॥

यो०। स्त्रीणां मंत्रैः क्रिया न अस्ति इति धर्मे व्यवस्थितिः अस्ति- निरिंद्रियाः चपुनः अमंत्राः स्त्रियः अनृतं (अनृत रूपाः) इति स्थितिः (धर्मशास्त्रमर्यादास्तीत्यर्थः)॥

भा०। स्त्रियोंका मंत्रों से संस्कार नहीं होता यही शास्त्रकी मर्यादा है और न इनको धर्म का ज्ञान होता और न ये मंत्रको जानती हैं-इससे झूंठकेसमान अमंगलरूपहैं-यही शास्त्रकी मर्यादाहै॥

ता०। स्त्रियोंके जातकर्म आदि संस्कार मंत्रों से नहीं होते यह शास्त्रकी धर्म के विषयमें मर्यादा है इसीसे मंत्रों सहित संस्कारोंके न होनेसे इनका अंतःकरण निष्पाप नहींहोता और धर्ममें प्रमाणश्रुति और स्मृतिसे हीन होने से धर्मका भी ज्ञान स्त्रियोंको नहीं होता-और पापके दूरकरनेवाले मंत्रोंके जपसे भी स्त्री हीन होती हैं अर्थात् दैवगति से पापके होनेपर उसका प्रायश्चित्त नहीं करसकतीं-इन कारणों से स्त्री अनृत (झूंठ) के समान अशुभ हैं यही शास्त्र की मर्यादा है-तिससे ये स्त्री यत्नसे रक्षाकरने योग्य हैं १८॥

तथाचश्रुतयोबह्वयोनिगीतानिगमेष्वपि।स्वालक्षण्यपरीक्षार्थंतासांशृणुतनिष्कृतीः १९

प०। तथा च श्रुतयः बह्वयः निगीताः निगमेषु अपि स्वालक्षण्यपरीक्षार्थं तासां शृणुत निष्कृतीः॥

यो०। तथाच बह्वयः श्रुतयः निगमेषु अपि स्वालक्षण्यपरीक्षार्थं निगीताः तासां श्रुतीनां मध्ये निष्कृतीः श्रुतीः (श्रुतिं) यूयं शृणुत॥

भा०। वेदोंमें बहुतसी श्रुतिकही हैं उनमें व्यभिचारकी परीक्षा (ज्ञान) के जतानेवाली जो श्रुति है उसको तुम सुनो॥

ता०। व्यभिचार करना स्त्रियोंका स्वभाव होताहै इसमें श्रुतिरूप प्रमाणको कहते हैं कि व्यभिचार ज्ञानकेलिये बहुतसी श्रुति वेदमें पढ़ीहैं कि यह हमनहीं जानसकते ब्राह्मण है वा अब्राह्मण-उन श्रुतियोंमें जो श्रुति व्यभिचारके प्रायश्चित्त बोधकहै अर्थात् व्यभिचारका प्रायश्चित्त जिनमें कहा है उन श्रुतियोंको तुमसुनो वहश्रुति यद्यपि एकही है इससे बहुवचन कहना असंगत है तथापि यहां बहुवचन (श्रुतीः) से एकही श्रुतिलेनी क्योंकि इस शास्त्रसे (अम्) इस एक वचनको (शस्) यह बहुवचन व्यत्ययसे होगया है [१] १९॥

यन्मेमाताप्रलुलुभेविचरन्त्यपतिव्रता। तन्मेरेतःपितावृक्तामित्यस्यैतन्निदर्शनम् २०॥

प०। यत् मे माता प्रलुलुभे विचरंती अपतिव्रता तत् मे रेतः पिता वृक्तां इति अस्य एतत् निदर्शनम्॥

---

१ सुप्तिङुपग्रहलिंगनराणां कालहलचस्वरकर्तृयङांच। व्यत्ययमिच्छतिशास्त्रकृदेषां सोपिचसिद्ध्यतिबाहुलकेन-इससे सुपका व्यत्यय होताहै॥

यो० । यत् अपतिव्रता विचरंती मे माता प्रलुलुभे तत् रेतः मे पिता वृक्तां इति एतत् अस्य निदर्शनं (दृष्टांतः) ॥

भा० । अन्य मनुष्योंके घरोंमें विचरती और अपतिव्रता मेरीमाता जो परपुरुषमें मनकोलुभाती भई व्यभिचारसे दुष्ट उसवीर्यको मेरेपिता शुद्धकरो यहीमन्त्र व्यभिचारका उदाहरण है ॥

ता० । कोई पुत्र अपनी माताके व्यभिचारको जानकर कहता है कि अपतिव्रता मेरीमाता (जो स्त्री मन वाणी कर्मसे पतिसे भिन्न पुरुषकी कामना न करै उसे पतिव्रता कहतेहैं)—अन्यके घरोंमें जातीहुई अन्य पुरुषोंमें मनको लुभातीभई वह जो परपुरुषके संकल्पसे भ्रष्टवीर्य है उसवीर्यको मेरापिता शुद्धकरो—स्त्रीके व्यभिचार शीलहोनेका यही उदाहरण है अर्थात् इसश्रुतिके तनिपादोंमें पढ़ाहै और यहमन्त्र चातुर्मास्य आदिमें पढ़ाहै २० ॥

ध्यायत्यनिष्टंयत्किंचित्पाणिग्राहस्यचेतसा । तस्यैपव्यभिचारस्यनिह्नवःसम्यगुच्यते २१

प० । ध्यायंती अनिष्टं यत् किंचित् पाणिग्राहस्य चेतसा तस्य एषः व्यभिचारस्य निह्नवः सम्यक् उच्यते ॥

यो० । चेतसा पाणिग्राहस्य यत्किंचित् अनिष्टं ध्यायन्ती मे माता प्रलुलुभे तस्य व्यभिचारस्य निह्नवः (प्रायश्चित्तं) एषः (पूर्वोक्तमन्त्रः) मन्वादिभिः सम्यक् उच्यते ॥

भा० । ता० । अब इसीमन्त्रको मानस व्यभिचारका भी प्रायश्चित्त वर्णन करतेहैं कि पतिको अप्रिय जो परपुरुषका गमन उसका ध्यान करतीहुई जो मेरीमाता लुभाई उसमानस व्यभिचार का भी यहीमंत्र भलीप्रकार शोधकहै यहमनु आदि कहतेहैं-इसश्लोकमें मातापद पढ़ा है इससे यह प्रायश्चित्त पुत्रही करै मातानहीं २१ ॥

यादृग्गुणेनभर्त्रास्त्रीसंयुज्येतयथाविधि । तादृग्गुणासाभवतिसमुद्रेणेवनिम्नगा २२ ॥

प० । यादृग्गुणेन भर्त्रा स्त्री संयुज्यते यथाविधि तादृग्गुणा सा भवति समुद्रेण इव निम्नगा ॥

यो० । स्त्री यादृग्गुणेन भर्त्रासह यथाविधि संयुज्येत सा स्त्री समुद्रेण संयुक्ता निम्नगा इव तादृग्गुणा एव भवति ॥

भा० । ता० । स्त्री विवाहकी विधिसे जैसे गुणी (साधु वा असाधु) पतिकेसंग संयुक्तहोती है वहस्त्री अपने पतिके समान गुणवती इसप्रकार होजाती है जैसे समुद्रके संगसे मिष्टनदी भी खारी होजातीहै—इससे अपने समान गुणोंकी प्राप्तिकेलिये पुरुष स्त्रीकी रक्षाकरै २२ ॥

अक्षमालावसिष्ठेनसंयुक्ताऽधमयोनिजा । शारंगीमन्दपालेनजगामाभ्यर्हणीयताम् २३

प० । अक्षमाला वसिष्ठेन संयुक्ता अधमयोनिजा शारंगी मन्दपालेन जगाम अभ्यर्हणीयताम् ॥

यो० । वसिष्ठेन संयुक्ता अधमयोनिजा अक्षमाला मन्दपालेन संयुक्ता शारंगी अभ्यर्हणीयतां जगाम (प्राप्तवान्)॥

भा० । ता० । अधम योनिमें पैदाहुई भी अक्षमाला वसिष्ठके संग विवाह होनेसे और मंदपाल ऋषिके संग विवाह होनेपर शारंगी (चटका) पूज्यताको प्राप्तहोगई २३ ॥

एताश्चान्याश्चलोकेऽस्मिन्नपकृष्टप्रसूतयः । उत्कर्षयोषितःप्राप्ताःस्वैःस्वैर्भर्तृगुणैःशुभैः २४

प० । एताः च अन्याः च लोके अस्मिन् अपकृष्टप्रसूतयः उत्कर्षं योषितः प्राप्ताः स्वैः स्वैः भर्तृगुणैः शुभैः ॥

यो० एताः चपुनः अन्याः अपकृष्टप्रसूतयः योषितः अस्मिन् लोके शुभैः स्वैः स्वैः भर्तृगुणैः उत्कर्षं प्राप्ताः ॥

भा० । ता० । अधम है जन्म जिनका ऐसी ये दोनोंस्त्री और सत्यवती आदि अन्यस्त्री अपने२ पतियोंके गुणोंसे इसलोकमें उत्तमताको प्राप्तहुईं २४ ॥

एषोदितालोकयात्रानित्यंस्त्रीपुंसयोःशुभा । प्रेत्येहचसुखोदर्कान्प्रजाधर्मान्निबोधत २५ ॥

प० । एषा उदिता लोकयात्रा नित्यं स्त्रीपुंसयोः शुभा प्रेत्य इह च सुखोदर्कान् प्रजाधर्मान् निबोधत ॥

यो० । नित्यं शुभा स्त्रीपुंसयोः एषा लोकयात्रा उदिता प्रेत्यचपुनः इहसुखोदर्कान् प्रजाधर्मान् यूयं निबोधत (शृणुत) ॥

भा० । ता० । सदैव शुभदायक स्त्री और पुरुषका यह लोकाचार हमनेकहा—अब परलोक और इसलोकमें सुखदायी प्रजा (सन्तान) के धर्मोंको सुनो २५ ॥

प्रजनार्थंमहाभागाःपूजार्हागृहदीप्तयः । स्त्रियःश्रियश्चगेहेषुनविशेषोऽस्तिकश्चन २६

प० । प्रजनार्थं महाभागाः पूजार्हाः गृहदीप्तयः स्त्रियः श्रियः च गेहेषु न विशेषः अस्ति कश्चन ॥

यो० । यस्मात् प्रजनार्थं महाभागाः पूजार्हाः गृहदीप्तयः स्त्रियः भवन्ति तस्मात् स्त्रियः चपुनः श्रियः गेहेषु कश्चन विशेषः न अस्ति ॥

भा० । ता० । यद्यपि स्त्रियोंकी बहुत दोषोंसे रक्षाकरनी कहीहै तथापि येस्त्री गर्भसे पुत्रोंको उत्पन्न करती हैं इससे महाभागिन (अनेक कल्याणोंसे युक्त) और वस्त्र भूषणआदिसे सन्मानके योग्य—और घरकी शोभाजनक होतीहैं तिससे लक्ष्मी और स्त्रीका घरोंमें कुछ विशेष नहींहोता अर्थात् जैसे लक्ष्मीकेविना घरकी शोभानहीं ऐसेही स्त्रीके विना भी नहीं होती २६ ॥

उत्पादनमपत्यस्यजातस्यपरिपालनम् । प्रत्यहंलोकयात्रायाःप्रत्यक्षंस्त्रीनिबन्धनम् २७ ॥

प० उत्पादनं अपत्यस्य जातस्य परिपालनं प्रत्यहं लोकयात्रायाः प्रत्यक्षं स्त्रीनिबन्धनम् ॥

यो० । अपत्यस्य उत्पादनं जातस्य परिपालनं लोकयात्रायाः प्रत्यहं प्रत्यक्षं एतत्सर्वं स्त्रीनिबन्धनंभवति ॥

भा० । ता० । सन्तानकी उत्पत्ति—और उत्पन्नहुई सन्तानकी पालना करनी—और प्रतिदिन लोकयात्रा (अतिथि मित्रबन्धुआदिका भोजनआदि (लोकव्यवहार) को प्रत्यक्ष (देखना) करना] इनसबका कारण स्त्रीही होती है २७ ॥

अपत्यंधर्मकार्याणिशुश्रूषारतिरुत्तमा । दाराधीनस्तथास्वर्गःपितॄणामात्मनश्चह२८ ॥

प० । अपत्यं धर्मकार्याणि शुश्रूषा रतिः उत्तमा दाराधीनः तथा स्वर्गः पितॄणां आत्मनः च ह ॥

यो० । अपत्यं धर्मकार्याणि शुश्रूषा उत्तमारतिः दाराधीना तथा पितॄणां चपुनः आत्मनः स्वर्गः दाराधीनः भवति ॥

भा० । ता० । संतानकी उत्पत्ति--अग्निहोत्र आदि धर्म के कार्य—और शुश्रूषा (सेवा) और पितर और अपने आत्माको स्वर्ग की प्राप्ति—ये सब स्त्री के ही आधीन हैं—यद्यपि पहिले श्लोक में भी संतान कहआये हैं तथापि संतान का फिर (दुबारा) कहना इसलिये है कि संतानही सब कार्यों में मुख्य है २८ ॥

पतिंयानाभिचरतिमनोवाग्देहसंयता॥साभर्तृलोकानाप्नोतिसद्भिःसाध्वीतिचोच्यते २९

प० । पतिं या न अभिचरति मनोवाग्देहसंयता सा भर्तृलोकान् आप्नोति सद्भिः साध्वी इति च उच्यते ॥

यो० । या स्त्री मनोवाग्देहसंयता सती पतिं न अभिचरति सा स्त्री भर्तृलोकान् आप्नोति चपुनः सद्भिः साध्वी इति उच्यते ॥

भा० । ता० । मन वाणी देह हैं वशमें जिसके ऐसी जो स्त्री मन वाणी देहसे अपने पति का व्यभिचार (अवलंघन) नहीं करती वह स्त्री अपने पतिके संग स्वर्ग आदि लोकोंको प्राप्त होती है और सज्जन मनुष्य इसलोक में भी उसको साध्वी कहते हैं २९ ॥

व्यभिचारात्तुभर्तुःस्त्रीलोकेप्राप्नोतिनिन्द्यताम् । सृगालयोनिंचाप्नोतिपापरोगैश्चपीड्यते ३०

प० । व्यभिचारात् तु भर्तुः स्त्री लोके प्राप्नोति निंद्यतां सृगालयोनिं च आप्नोति पापरोगैः च पीड्यते ॥

यो० । भर्तुः व्यभिचारात् स्त्री लोके निंद्यतां प्राप्नोति चपुनः सृगालयोनिं आप्नोति—चपुनः पापरोगैः पीड्यते पीडां प्राप्नोति) ॥

भा० । ता० । पतिके व्यभिचार से स्त्री जगत्में निंदाको और जन्मांतर में सृगाल (सियार) की योनिको प्राप्त होती है—और कुष्ठ आदि पाप रोगों से पीडित होती है—ये दोनों श्लोक पांच अध्याय के स्त्री धर्म प्रकरण में भी पढ़े हैं तथापि महान् प्रयोजन के लिये पुनः पढ़े हैं ३० ॥

पुत्रंप्रत्युदितंसद्भिःपूर्वजैश्चमहर्षिभिः । विश्वजन्यमिमंपुण्यमुपन्यासंनिबोधत ३१ ॥

प० । पुत्रं प्रति उदितं सद्भिः पूर्वजैः च महर्षिभिः विश्वजन्यं इमं पुण्यं उपन्यासं निबोधत ॥

यो० । सद्भिः चपुनः पूर्वजैः महर्षिभिः पुत्रं प्रति उदितं विश्वजन्यं पुण्यं इमं उपन्यासं यूयं निबोधत (शृणुत) ॥

भा० । ता० । पहिले सज्जन पुरुष और बड़े २ ऋषियों ने पुत्रके लिये कहेहुये और जगत्के हितकारी और पवित्र इस (जो आगे वर्णन करते हैं) विचारको तुम सुनो ३१ ॥

भर्तुःपुत्रंविजानंतिश्रुतिद्वैधंतुभर्तरि । आहुरुत्पादकंकेचिदपरेक्षेत्रिणंविदुः ३२ ॥

प० । भर्तुः पुत्रं विजानंति श्रुतिद्वैधं तु भर्तरि आहुः उत्पादकं केचित् अपरे क्षेत्रिणं विदुः ॥

यो० । ऋषयः भर्तुः पुत्रं विजानंति (मन्यंते) तुपुनः भर्तरि श्रुतिद्वैधं अस्ति केचित् अवोढारं अपि उत्पादकं अपरे अनुत्पादकं अपि क्षेत्रिणं (वोढारं) पुत्रिणं आहुः कथयंति ॥

भा० । ता० । स्त्री का जो पति उसीका पुत्रहोना है मुनियों ने यही कहा है—और कोई एक यह कहते हैं कि विवाहे हुये पतिसे भिन्न भी जो पैदाकरनेवाला (देवर आदि) उसीका पुत्र कहते हैं—और अन्यमुनि अन्य से पैदाहुआ भी पुत्र क्षेत्री (विवाहा) का ही होताहै—परंतु श्रेष्ठ वही है जो पुत्र अपने से अपनी स्त्री में हो ३२ ॥

क्षेत्रभूतास्मृतानारीबीजभूतःस्मृतःपुमान् । क्षेत्रबीजसमायोगात्संभवःसर्वदेहिनाम् ३३

प० । क्षेत्रभूता स्मृता नारी बीजभूतः स्मृतः पुमान् क्षेत्रबीजसमायोगात् संभवः सर्वदेहिनाम् ॥

यो० । नारी क्षेत्रभूता स्मृता—पुमान् बीजभूतः स्मृतः मन्वादिभिरितिशेषः क्षेत्रबीजसमायोगात् सर्वदेहिनां संभवः (भवति) ॥

भा० । स्त्री क्षेत्रके समानहोतीहै और पुरुष बीजके समान कहा है—और क्षेत्र और बीज के मेलसे संपूर्ण देहधारियोंकी उत्पत्ति होती है ॥

ता० । व्रीही आदि के उत्पत्ति के स्थानको क्षेत्र कहते हैं उसी के समान स्त्रीको भी मुनियों ने कहा है—और व्रीही आदि के बीजकी समान पुरुष (पुरुषका बीज) को कहाहै—और क्षेत्र और बीज का समागम होने से संपूर्ण प्राणियों की उत्पत्ति होती है—इससे क्षेत्र और बीज दोनोंको उत्पत्तिमें कारणता होनेसे यह विवाद ठीक है कि जिसका क्षेत्र उसका पुत्र होता है अथवा जिसका बीज उसका ३३ ॥

विशिष्टंकुत्रचिद्बीजंस्त्रीयोनिस्त्वेवकुत्रचित् । उभयंतुसमंयत्रसाप्रसूतिःप्रशस्यते ३४

प० । विशिष्टं कुत्रचित् बीजं स्त्रीयोनिः तु एव कुत्रचित् उभयं तु समं यत्र सा प्रसूतिः प्रशस्यते

यो० । कुत्रचित् बीजं विशिष्टं कुत्रचित् स्त्रीयोनि विशिष्टा भवति यत्र तु उभयं (योनिबीजे) समं (तुल्यं) भवति सा प्रसूतिः प्रशस्यते (श्रेष्ठाकथ्यते) मन्वादिभिरितिशेषः ॥

भा० । कहीं २ तो बीज प्रधान है और कहीं २ क्षेत्र और जहां बीज क्षेत्र दोनों एककेहीहों वही संतान मनु आदि ने श्रेष्ठकही है ॥

ता० । कहीं २ तो बीज उत्तम समझागया है जैसा कि जिस बीज के लिये क्षेत्र बोयाजाता है इसे न्यायसे परकी स्त्री में पैदाहुआ भी बुध चंद्रमाकाही पुत्रहुआ और व्यास ऋष्यशृंग आदि भी उनकेही पुत्रहुये जिनका बीजथा—और कहीं २ क्षेत्र कीही प्रधानता है क्योंकि मृत मनुष्यकी तल्प (शय्या) पर जो परपुरुष से पैदाहो वह उसकाही पुत्रहोताहै जिसका क्षेत्रथा यही बात इसे वचन से मनुजी कहेंगे—इसी से विचित्र वीर्य से क्षत्रिय जातिकी स्त्रीमें पैदाहुये धृतराष्ट्र आदि क्षत्रियही हुये—और जहां पर बीज और योनि दोनों समान हैं अर्थात् वही पैदाकरनेवाला और वही विवाहने वाला है—वही पुत्र मनु आदि ने श्रेष्ठ कहा है ३४ ॥

बीजस्यचैवयोन्याश्चबीजमुत्कृष्टमुच्यते । सर्वभूतप्रसूतिर्हिबीजलक्षणलक्षिता ३५ ॥

प० । बीजस्य च एव योन्याः च बीजं उत्कृष्टं उच्यते सर्वभूतप्रसूतिः हि बीजलक्षणलक्षिता ॥

यो० । बीजस्य चपुनः योन्याः (अनयोर्मध्ये) बीजं उत्कृष्टं उच्यते हि (यतः) सर्वभूतप्रसूतिः बीजलक्षणलक्षिता भवति ॥

भा० । ता० । बीज और योनि (क्षेत्र) इन दोनों में बीजही प्रधान कहा है क्योंकि प्राणियों के प्रारम्भ कियेहुये संपूर्ण पदार्थों (अन्नआदि) की उत्पत्ति बीजकेही लक्षण (चिह्न वा वर्ण) से लक्षित (संयुक्त) होतीहै ३५ ॥

यादृशंतूप्यतेबीजंक्षेत्रेकालोपपादिते । तादृग्रोहतितत्तस्मिन्बीजंस्वैर्व्यञ्जितंगुणैः ३६

प० यादृशं तु उप्यते बीजं क्षेत्रे कालोपपादिते तादृक् रोहति तत् तस्मिन् बीजं स्वैः व्यंजितं गुणैः ॥

यो० । कालोपपादिते क्षेत्रे यादृशं बीजं उप्यते—तत् बीजं तस्मिन् क्षेत्रे स्वैः गुणैः व्यंजितं सत् तादृक् रोहति ॥

भा० । ता० । समयपर संपादनकिये (बनायेहुये) खेतमें जिसजातिका बीज बोयाजाता है—

---

१ यदर्थमुत्पादयाम्—उत्पन्नोबीजिनोबुधः ॥
२ यस्तल्पजः प्रमीतस्य ॥

अपने वर्णआदि गुणों से संयुक्तही वहबीज वैसाही उसखेत में पैदाहोता है अर्थात् अन्यसे अन्य नहीं होता ३६ ॥

इयंभूमिर्हिभूतानांशाश्वतीयोनिरुच्यते।नचयोनिगुणान्कांश्चिद्बीजंपुष्यतिपुष्टिषु ३७

प० । इयं भूमिः हि भूतानां शाश्वती योनिः उच्यते न च योनिगुणान् कांश्चित् बीजं पुष्यति पुष्टिषु ॥

यो० । हि (निश्चये) इयं एव भूमिः भूतानां शाश्वती योनिः (मन्वादिभिः) उच्यते–अतः बीजं–कांश्चित् योनिगुणान् पुष्टिषु न पुष्यति (नभजते) ॥

भा० । ता० । यह भूमिही सब प्राणियोंके बोयेहुये तरु गुल्मआदिकी सदासे उत्पत्तिकी योनि (कारण) है और कोई भी योनिके मिट्टीआदिके रूपआदि धर्मोंको उत्पत्तिके समय बीज प्राप्तनहीं होता तिससे योनिके गुणोंका अनुवर्तन न होनेसे क्षेत्रकी मुख्यता नहीं होसकती और ३७ ॥

भूमावप्येककेदारेकालोप्तानिकृषीवलैः।नानारूपाणिजायन्तेबीजानीहस्वभावतः ३८ ॥

प० । भूमौ अपि एककेदारे कालोप्तानि कृषीवलैः नानारूपाणि जायन्ते बीजानि इह स्वभावतः॥

यो० । भूमौ अपि एककेदारे कृषीवलैः कालोप्तानि बीजानि इह नानारूपाणि स्वभावतः जायंते ॥

भा० । ता० । भूमिमें भी समयपर किसानोंने एकखेतमें बोयेहुये बीज–बीजके स्वभावानुसार नानारूप (मूंग धानआदि) के होतेहैं अर्थात् पृथिवी एकहै इसमें एकरूप नहींहोते ३८ ॥

व्रीहयःशालयोमुद्गास्तिलामाषास्तथायवाः। यथाबीजंप्ररोहन्तिलशुनानीक्षवस्तथा ३९ ॥

प० । व्रीहयः शालयः मुद्गाः तिलाः माषाः तथा यवाः यथाबीजं प्ररोहन्ति लशुनानि इक्षवः तथा ॥

यो० । व्रीहयः शालयः मुद्गाः तिलाः माषाः तथा यवाः लशुनानि तथा इक्षवः यथाबीजं प्ररोहंति ॥

भा० । ता० । सांठीधान–शालि (कलम वा चावल) मूंग–तिल–माष (उड़द)–लहशन और ईख येसब बीजके अनुसारही जमते हैं और नानारूपके होजाते हैं ३९ ॥

अन्यदुप्तंजातमन्यादित्येतन्नोपपद्यते। उप्यतेयद्धियद्बीजंतत्तदेवप्ररोहति ४० ॥

प० । अन्यत् उप्तं जातं अन्यत् इति एतत् न उपपद्यते उप्यते यत् हि यत् बीजं तत् तत् एव प्ररोहति ॥

यो० । अन्यत् उप्तं अन्यत् जातं इति एतत् न उपपद्यते हि (यतः) यत् यत् बीजं उप्यते तत् तत् एव प्ररोहति (उत्पद्यते)॥

भा० । ता० । अन्यबीज बोयाजाय और अन्य पैदाहोय अर्थात् व्रीहिबोनेसे मूंगपैदाहो–यहबात नहींहै तिससे जो बीज बोयाजाता है वही पैदाहोताहै इससे जैसे खेतोंमें बीजकीही प्रधानता है इसीप्रकार मनुष्योंमें भी बीजकीही प्रधानता है ४० ॥

तत्प्राज्ञेनविनीतेनज्ञानविज्ञानवेदिना । आयुष्कामेनवप्तव्यंनजातुपरयोषिति ४१ ॥

प० । तत् प्राज्ञेन विनीतेन ज्ञानविज्ञानवेदिना आयुष्कामेन वप्तव्यं न जातु परयोषिति ॥

यो० । तत् (तस्मात्) प्राज्ञेन विनीतेन ज्ञानविज्ञानवेदिना आयुष्कामेन पुरुषेण जातु (कदाचिदपि) परयोषिति न वप्तव्यम्–बीजमितिशेषः ॥

भा० । ता० । तिससे बुद्धिमान् और विशेषकर नम्र और वेदवेदांगोंके ज्ञाता–और अपनी अव-

स्याका अभिलाषी पुरुष कदाचित् भी अन्यकी स्त्रीमें बीजको न बोवे अर्थात् व्यभिचार न करे ४१॥

अत्रगाथावायुगीताःकीर्तयन्तिपुराविदः।यथाबीजंनवप्तव्यंपुंसापरपरिग्रहे ४२॥

प०। अत्र गाथाः वायुगीताः कीर्तयन्ति पुराविदः यथा बीजं न वप्तव्यं पुंसा परपरिग्रहे॥

यो०। अत्र (विषये) पुराविदः वायुगीताः गाथाः तथा कीर्तयन्ति यथा परपरिग्रहे पुंसा बीजं न वप्तव्यम्॥

भा०। ता०। बीतेहुये समयके ज्ञाता इसविषयमें वायुदेवताकी कहीहुई कथाओंको अर्थात् वेदोक्त वचनोंको कहतेहैं कि मनुष्य कभीभी दूसरे मनुष्यकी स्त्रीमें बीजको न बोवे अर्थात् अपनीही विवाहित स्त्रीमें रतरहै ४२॥

नश्यतीषुर्यथाविद्धःखेविद्धमनुविद्ध्यतः।तथानश्यतिवैक्षिप्रंबीजंपरपरिग्रहे ४३॥

प०। नश्यति इषुः यथा विद्धः खे विद्धं अनुविद्ध्यतः तथा नश्यति वै क्षिप्रं बीजं परपरिग्रहे॥

यो०। विद्धं मृगं अनुविद्ध्यतः पुरुषस्य इषुः (बाण) यथा नश्यति तथा परपरिग्रहे बीजं क्षिप्रं नश्यति (निष्फलो भवति)॥

भा०। ता०। जैसे अन्य पुरुषके बींधेहुये मृगके शरीरमें उसीछिद्रमें बाणको फेंकतेहुये मनुष्यका बाण निष्फल होताहै क्योंकि पहिले मारनेवालेकोही उसके मूल्यका लाभहोता है—इसीप्रकार परकीस्त्रीमें बोयाहुया बीजभी नष्टहोजाता है क्योंकि गर्भ ग्रहणके अनन्तर क्षेत्र (स्त्री) वालेकोही शीघ्रफलका लाभहोता है उक्त बोनेवालेको पापसे इतर कुछनहीं मिलसक्ता ४३॥

पृथोरपीमांपृथिवींभार्यांपूर्वविदोविदुः। स्थाणुच्छेदस्यकेदारमाहुःशल्यवतोमृगम् ४४

प०। पृथोः अपि इमां पृथिवीं भार्यां पूर्वविदः विदुःस्थाणुच्छेदस्य केदारं आहुःशल्यवतः मृगम्॥

यो०। पूर्वविदः इमां पृथिवीं पृथोः अपि भार्यां विदुः स्थाणुच्छेदस्य केदारं शल्यवतः मृगं आहुः॥

भा०। पिछले समयके ज्ञाताओंने भी इस पृथिवीको पृथुराजाकी भार्या इससे कहाहै कि पृथुराजाने इसको समानकिया है और इसका प्रथम परिग्रह कियाहै और स्थाणुओंका छेदन जो करै उसका खेत और जिसने पहिले मृगको बींधा उसका मृगकहाहै॥

ता०। यद्यपि अनेक राजाओंके संग इस पृथिवीका सम्बन्धहुआ है तथापि पृथुराजाने इसको सम (बराबर) कियाहै और पहिले स्वीकार कियाहै इससे पृथुकी भी भार्या इसको पूर्वकालके ज्ञाता कहतेहैं तिससे केदार (खेत) भी उसकाही होताहै जो स्थाणु (वृक्ष तृणआदि) ओंको उखाड़कर खेतको बनाता है और मृगभी उसकाही कहा है जिसने पहिले बाणसे बींधाहो—इससे पहिले जिसकेसंग विवाहहुआहो वही स्वामी होता है और अतएव उसकाही अपत्य होता है और पैदाकरनेवालेका नहीं होता ४४॥

एतावानेवपुरुषोयज्जायात्माप्रजेतिह।विप्राःप्राहुस्तथाचैतद्योभर्तासास्मृतांगना ४५

प०। एतावान् एव पुरुषः यत् जाया आत्मा प्रजा इति ह विप्राः प्राहुः तथा च एतत् यः भर्ता *सा स्मृता अंगना*॥

यो०। यत् जाया आत्मा प्रजा इति एतावान् (एतत्त्रयरूप) एव पुरुषो भवति—तथाच *यः भर्ता सा अंगना* स्मृता एतत् विप्राः प्राहुः (*कथयतिस्म*)॥

भा० । स्त्री पुरुष संतान इन तीनोंरूपही पुरुष होता है और इसीसे वेदके ज्ञाता ब्राह्मण यह कहते हैं कि जो भर्त्ता है वही स्त्रीहै इन दोनों देहोंमें कुछ भेद नहीं है ॥

ता० । एकाकी मनुष्यही पुरुष नहीं होताहै किन्तु यहबात प्रकटहै कि भार्या अपनादेह–और संतान येतीनों मिलकर पुरुषहोता है क्योंकि इस वाजसनेय ब्राह्मणसे यही प्रतीतहोता है कि यह स्त्री इस पुरुषका अर्द्धभाग है क्योंकि जबतक इसको जायानहीं मिलती तबतक उत्पन्न नहींहोता और तबतक यह असंपूर्ण रहताहै और जिससमय यह जायाको प्राप्तहोता है और उसमें पुत्ररूपसे पैदाहोता है तभी संपूर्ण होताहै और इसीसे वेदकेज्ञाता ब्राह्मण यह कहतेहैं कि जो भर्ता वहीस्त्री कहीहै अर्थात् दोनोंमें कुछभेद नहींहै इससे उसभार्यामें अन्य पुरुषसे पैदा कियाहुआ पुत्र भर्ताकाही पुत्रहोताहै इससे क्षेत्रकीही मुख्यता है बीजकी नहीं ४५ ॥

ननिष्क्रयविसर्गाभ्यांभर्तुर्भार्याविमुच्यते।एवंधर्मंविजानीमःप्रजापतिविनिर्मितम् ४६॥

प० । नँ निष्क्रयविसर्गाभ्यां भर्तुः भार्या विमुच्यते एवं धर्मं विजानीमः प्रजापतिविनिर्मितम् ॥

यो० । निष्क्रयविसर्गाभ्यां भर्तुः सकाशात् भार्या न विमुच्यते एवं रूपं प्रजापतिविनिर्मितं धर्मं वयं विजानीमः ॥

भा० । विक्रय और त्यागसे स्त्री पतिसे पृथक् नहीं होसकती ब्रह्मा के रचे इस धर्म को ही हम मानते हैं ॥

ता० । विक्रय (बेचने) और विसर्ग (त्यागने) से स्त्री पतिके स्त्री स्वरूपसे दूर नहीं होसकती यह प्रजापति का रचाहुआ जो धर्म उसको हम मानते हैं इससे परकी स्त्रीको मोल लेकर और अपने आधीन करके और उसमें जो संतान उत्पन्न हुई वह संतान उसकी ही होतीहै जिसकी वह स्त्री है और बीजवाले की नहीं होती ४६ ॥

सकृदंशोनिपततिसकृत्कन्याप्रदीयते।सकृदाहददानीतित्रीण्येतानिसतांसकृत् ४७॥

प० । सकृत् अंशः निपतति सकृत् कन्या प्रदीयते सकृत् आह ददानि इति त्रीणि एतानि सतां सकृत् ॥

यो० । अंशः सकृत् निपतति–कन्या सकृत् प्रदीयते अहं ददानि इति सकृत् आह एतानि त्रीणि सतां सकृत् भवंति (न पुनः पुनः) ॥

भा० । पिता के धन का विभाग–एक बार–कन्या का दान एकबार–और गौ आदि का दान एकबार–होताहै–इससे साधुजनोंके ये तीनों एकबारही होतेहैं बारंबार नहीं ॥

ता० । भाइयोंने जो पिता आदि के धनका विभाग किया है वह एकबारही होताहै फिर अन्यथा नहीं होसकता–और पिता आदि ने एक वरको दीहुई कन्या फिर अन्यको नहीं दीजाती–और यहां पर इसको इसलिये लिखा है कि किसी अन्य मनुष्यने अन्यको कन्या देदी और फिर वह कन्या पिता आदि को मिलगईहो उसमें पैदाहुई संतान भी बीजवाले की नहीं होती–और कन्यासे इतर गौ आदि द्रव्योंमें भी एकबारही (ददानि) मैं देताहूं यह कहाजाता है फिर वे अन्यको नहीं दिये

---

१ अर्द्धोह्वाएष आत्मनस्तस्मात् यज्जायांनविंदते नैतावत्प्रजायते असर्वोहितावद्भवति-अथयदैवजायांविंदतेऽथप्रजायते तर्हि सर्वोभवतितथा चैतद्वेदविदोविप्रावदन्ति योभर्तासैवभार्यास्मृतेति ॥

जाते—ये तीनों साधुजनोंके एकबारही होतेहैं बारंबार नहीं—यद्यपि यहां पर कन्यादानही प्रकृत में उपयोगी था तथापि भाग और दान भी प्रसंग से एकबारही वर्णन किये हैं और ददानि (देताहूं) इससे ही कन्यादान भी आजाता तथापि प्रकरणमें उपयुक्त होनेसेही पृथक् (जुदा) कहाहै ४७ ॥

यथागोऽश्वोष्ट्रदासीषुमहिष्यजाविकासुच । नोत्पादकःप्रजाभागीतथैवान्यांगनास्वपि ४८ ॥

प० । यथा गोऽश्वोष्ट्रदासीषु महिष्यजाविकासु च न उत्पादकः प्रजाभागी तथा एव अन्यांगनासु अपि ॥

यो० । गोऽश्वोष्ट्रदासीषु चपुनः महिष्यजाविकासु उत्पादकः यथा प्रजाभागी न भवति तथा एव अन्यांगनासु अपि उत्पादकः प्रजाभागी न भवति ॥

भा० । ता० । जैसे दूसरे की गौ-ऊंटनी-दासी-महिषी (भैंस) अजा भेड़ों में अपने बैल आदि से बछड़े-आदि के पैदाकरनेवाला मनुष्य प्रजा (वत्स आदि) का भागी नहीं होता इसीप्रकार अन्य की स्त्रियों में भी संतान को पैदाकरनेवाला मनुष्य संतान का भागी नहीं होता किन्तु उन स्त्रियों के स्वामीही होतेहैं ४८ ॥

येऽक्षेत्रिणोबीजवन्तःपरक्षेत्रप्रवापिणः। तेवैसस्यस्यजातस्यनलभन्तेफलंक्वचित् ४९ ॥

प० । ये अक्षेत्रिणः बीजवंतः परक्षेत्रप्रवापिणः ते वै सस्यस्य जातस्य न लभंते फलं क्वचित् ॥

यो० । अक्षेत्रिणः परक्षेत्रप्रवापिणः ये बीजवन्तः सन्ति ते जातस्य सस्यस्य फलं क्वचित् अपि न लभंते (नप्राप्नुवंति)॥

भा० । ता० । जो मनुष्य क्षेत्र (खेत) के स्वामी नहीं हैं और बीजके स्वामी हैं यदि वे अन्यके क्षेत्रमें बीजको बोदें तो वे क्षेत्रमें पैदाहुये धान्यआदि सस्यके फलको कभीभी प्राप्तनहीं होते किन्तु क्षेत्रका स्वामीही फलकाभागी होताहै ४९ ॥

यदन्यगोषुवृषभोवत्सानांजनयेच्छतम् । गोमिनामेवतेवत्सामोघंस्कन्दितमार्षभम् ५०

इतरेकृतवन्तस्तुपापान्येतान्यकामतः।सर्वस्वहारमर्हन्तिकामतस्तुप्रवासनम् २४२ ॥

प० । इतरे कृतवंतः तु पापानि एतानि अकामतः सर्वस्वहारं अर्हंति कामतः तु प्रवासनम् ॥

यो० । अकामतः एतानि पापानि कृतवंतः इतरे (क्षत्रियादयः) सर्वस्वहारं अर्हंति कामतः कृतवंतस्तु प्रवासनं (वधं) अर्हंति ॥

भा० । अज्ञानसे इन पापोंको करतेहुये क्षत्री आदि तीनों वर्णोंका सर्वस्वहरण राजा करै और यदि जानकर पूर्वोक्त अपराधकरें तो वधके योग्य होतेहैं ॥

ता० । अज्ञानसे इनपापोंको करतेहुये क्षत्रीआदि इतरवर्ण सर्वस्वहरणके योग्यहोते हैं अर्थात् राजा उनके सर्वस्वको छीनले और यदि जानकर उक्त पापोंकोकरें तो प्रवासन(वध)के योग्य होतेहैं यह सर्वस्वहरणकादण्ड और पूर्वोक्तउत्तम साहसकादण्ड ब्राह्मणकीजीविका और गुणीऔरनिर्गुणीकी अपेक्षाकी व्यवस्थासे देना और इसश्लोकमें प्रवासन शब्दसे इसअभिधानके अनुसार वधकाग्रहणहै कि प्रवासन परासन–निषूदन–निसंघन–ये भी वधके पर्याय शब्द हैं २४२ ॥

नाददीतनृपःसाधुर्महापातकिनोधनम्। आददानस्तुतल्लोभात्तेनदोषेणलिप्यते२४३॥

प० । न आददीत नृपः साधुः महापातकिनः धनं आददानः तु तत् लोभात् तेन दोषेण लिप्यते ॥

यो० । साधुः नृपः महापातकिनः धनं न आददीत लोभात् तत् धनं आददानः राजा तेन दोषेण लिप्यते ॥

भा० । ता० । धार्मिक राजा महापातकी के धनको ग्रहण न करै जो राजा लोभसे उक्त धनको ग्रहणकरताहै वह महापातक दोषसे लिप्त होताहै अर्थात् महापातकी होताहै किंतु २४३ ॥

अप्सुप्रवेश्यतंदण्डंवरुणायोपपादयेत्। श्रुतवृत्तोपपन्नेवाब्राह्मणेप्रतिपादयेत् २४४ ॥

प० । अप्सु प्रवेश्य तं दंडं वरुणाय उपपादयेत् श्रुतवृत्तोपपन्ने वा ब्राह्मणे प्रतिपादयेत् ॥

यो० । राजा तं दंडं अप्सु प्रवेश्य वरुणाय उपपादयेत् वा श्रुतवृत्तोपपन्ने ब्राह्मणे प्रतिपादयेत् ॥

भा० । ता० । महापातकी के उस दंडके धनको नदी आदि के जल में फेककर वरुणको देदे–अथवा वेद–और सदाचारसे युक्त ब्राह्मणको देदे २४४ ॥

ईशोदण्डस्यवरुणोराज्ञांदण्डधरोहिसः। ईशःसर्वस्यजगतोब्राह्मणोवेदपारगः २४५ ॥

प० । ईशः दंडस्य वरुणः राज्ञां दंडधरः हि सः ईशः सर्वस्य जगतः ब्राह्मणः वेदपारगः ॥

यो० । हि (यतः) सः वरुणः दंडस्य ईशः राज्ञां दंडधरः (अस्ति) वेदपारगः ब्राह्मणः सर्वस्य जगतः ईशः (अस्ति) अतः तौ उक्त दंडधनं अर्हतः ॥

भा० । ता० । जिससे वह राजा वरुण दंडके धनका स्वामी और राजाओं को दंड देनेवाला है–और वेदका पारगामी ब्राह्मण संपूर्ण जगत्‌का स्वामी होताहै इससे पूर्वोक्त महापातकी के दंड धन को वरुण और वेदपाठी ब्राह्मणही लेने योग्य होतेहैं २४५ ॥

यत्रवर्जयतेराजापापकृद्भ्योधनागमम्। तत्रकालेनजायन्तेमानवादीर्घजीविनः २४६
निष्पद्यन्तेचसस्यानियथोप्तानिविशांपृथक्। बालाश्चनप्रमीयन्तेविकृतंनचजायते २४७

प० । यत्र वर्जयते राजा पापकृद्भ्यः धनागमं तत्र कालेन जायंते मानवाः दीर्घजीविनः ॥

प० । निष्पद्यंते च सस्यानि यथोप्तानि विशां पृथक् बालाः च न प्रमीयंते विकृतं न च जायते ॥

यो० । राजा यत्र पापकृद्भ्यः धनागमं वर्जयते तत्र मानवाः कालेन दीर्घजीविनः जायंते विशां सस्यानि यथोप्तानि पृथक् निष्पद्यंते–चपुनः बालाः न प्रमीयंते चपुनः विकृतं न जायते ॥

भा० । ता० । जिस देशमें पूर्वोक्त महापातकी के धनको राजा वर्जता है अर्थात् ग्रहण नहीं करता–उस देशमें मनुष्य पूर्णकालमें पैदा होतेहैं और दीर्घजीवी होतेहैं–और वैश्योंने गोधूम आदि अन्नोंको जिसप्रकार बोयाहो उसीप्रकार खेतों में पृथक् २ उत्पन्न होतेहैं और बालकोंकी मृत्यु नहीं

होती और कोई वस्तु विकृत पैदा नहीं होती अर्थात् कुछ की कुछ नहीं जन्मती जैसा कि पंगु कुब्ज आदि मनुष्यों का जन्म २४६ । २४७ ॥

ब्राह्मणान्बाधमानंतुकामादवरवर्णजम् ।हन्याच्चित्रैर्वधोपायैरुद्वेजनकरैर्नृपः २४८ ॥

प० । ब्राह्मणान् बाधमानं तुं कामात् अवरवर्णजं हन्यात् चित्रैः वधोपायैः उद्वेजनकरैः नृपः ॥

यो० । नृपः कामात् ब्राह्मणान् बाधमानं अवरवर्णजं (शूद्रं) उद्वेजनकरैः चित्रैः वधोपायैः हन्यात् ॥

भा० । ता० । जान बूझकर ब्राह्मणोंको शरीर पीडा धनग्रहण आदि से दुःख देतेहुये शूद्रको उद्वेग करनेवाले और अनेक प्रकार के मारनेके उपायों से राजा वधकरै अर्थात् छेदन आदि से नष्ट करदे २४८ ॥

यावानवध्यस्यवधेतावान्वध्यस्यमोक्षणे ।अधर्मोनृपतेर्दृष्टोधर्मस्तुविनियच्छतः२४९ ॥

प० । यावान् अवध्यस्य वधे तावान् वध्यस्य मोक्षणे अधर्मः नृपतेः दृष्टः धर्मः तु विनियच्छतः ॥

यो० । अवध्यस्य वधे यावान् अधर्मः (भवति) वध्यस्य मोक्षणे तावान् अधर्मः नृपतेः दृष्टः विनियच्छतः तु नृपतेः धर्मः दृष्टः ॥

भा० । ता० । मारने के अयोग्य ब्राह्मण आदि के वधमें जितना पाप राजाको होताहै उतनाही अधर्म मारने के योग्य शूद्र आदि के छोडनेमें होताहै और शास्त्रके अनुसार दंड देनेवाले राजाको तो धर्म होताहै जिससे राजा दंड देने योग्यको अवश्य दंडदे २४९ ॥

उदितोऽयंविस्तरशोमिथोविवदमानयोः ।अष्टादशसुमार्गेषुव्यवहारस्यनिर्णयः२५० ॥

प० । उदितः अयं विस्तरशः मिथः विवदमानयोः अष्टादशसु मार्गेषु व्यवहारस्य निर्णयः ॥

यो० । अष्टादशसु मार्गेषु मिथः विवदमानयोः (पुरुषयोः) अयं व्यवहारस्यनिर्णयः विस्तरशः मया उदितः कथितः ॥

भा० । ता० । पूर्वोक्त ऋणादान आदि अष्टादश (अठारह) मार्गोंमें परस्पर विवादकरतेहुये मनुष्योंके व्यवहार का यह निर्णय विस्तारसे हमने वर्णन किया २५० ॥

एवंधर्म्याणिकार्याणिसम्यक्कुर्वन्महीपतिः ।देशानलब्धान्लिप्सेतलब्धांश्चपरिपालयेत्२५१॥

प० । एवं धर्म्याणि कार्याणि सम्यक् कुर्वन् महीपतिः देशान् अलब्धान् लिप्सेत लब्धान् च परिपालयेत् ॥

यो० । धर्म्याणि कार्याणि एवं कुर्वन् महीपतिः अलब्धान् देशान् लिप्सेत चपुनः लब्धान् परिपालयेत् (रक्षेत्) ॥

भा० । ता० । इस पूर्वोक्त प्रकार से धर्म के अनुसार कार्यों को भलीप्रकार करताहुआ राजा जो देश अलब्धहों अर्थात् अपने आधीन न हुये हों उनको तो स्वाधीन करने की इच्छाकरै—और जो अपने आधीनहों उनकी पालनाकरै २५१ ॥

सम्यङ्निविष्टदेशस्तुकृतदुर्गश्चशास्त्रतः ।कण्टकोद्धरणेनित्यमातिष्ठेद्यत्नमुत्तमम् २५२

प० । सम्यङ्निविष्टदेशः तु कृतदुर्गः च शास्त्रतः कंटकोद्धरणे नित्यं आतिष्ठेत् यत्नं उत्तमम् ॥

यो० । सम्यङ्निविष्टदेशः शास्त्रतः कृतदुर्गः राजा कंटकोद्धरणे नित्यं उत्तमं यत्नं आतिष्ठेत् (कुर्यात्) ॥

भा० । ता० । पूर्वोक्त (जांगलसस्यसंपन्न) देशमें स्थित और शास्त्रके अनुसार दुर्ग (किला) बनाकर कंटकों (चौर साहसिकआदि) के उद्धार(नाश)करनेमें प्रतिदिन उत्तम प्रयत्नकरै २५२ ॥

रक्षणादार्यवृत्तानांकण्टकानांचशोधनात् । नरेन्द्रास्त्रिदिवंयान्तिप्रजापालनतत्पराः २५३ ॥

प० । रक्षणात् आर्यवृत्तानां कंटकानां च शोधनात् नरेंद्राः त्रिदिवं यांति प्रजापालनतत्पराः ॥

यो० । प्रजापालनतत्पराः नरेन्द्राः आर्य वृत्तानां रक्षणात् चपुनः कंटकानां शोधनात् त्रिदिवं (स्वर्ग) यांति (प्राप्नुवन्ति) ॥

भा० । ता० । प्रजाकी पालनामें तत्पर जो राजा होतेहैं वे आर्यवृत्तों (साधुआचरण) की रक्षा और कंटकोंके शोधन (नाश) करनेसे स्वर्गमें जाते हैं–तिससे कंटकों के उद्धार करनेमें अवश्य यत्नकरै २५३ ॥

अशासंस्तस्करान्यस्तुबलिंगृह्णातिपार्थिवः । तस्यप्रक्षुभ्यतेराष्ट्रंस्वर्गाच्चपरिहीयते २५४ ॥

प० अशासन् तस्करान् यः तु बलिं गृह्णाति पार्थिवः तस्य प्रक्षुभ्यते राष्ट्रं स्वर्गात् च परिहीयते ॥

यो० । यः पार्थिवः तस्करान् अशासन् सन् बलिं गृह्णाति–तस्य राष्ट्रं प्रक्षुभ्यते चपुनः सः राजा स्वर्गात् परिहीयते (स्वर्गंनगच्छति) ॥

भा० । ता० । जो राजा–तस्करोंका निराकरण न करके षड् (छठा) भाग आदि बलिको ग्रहण करताहै उसका देश क्षोभकरताहै अर्थात् बिगड़जाताहै और वहराजा स्वर्गमें भी नहींजाताहै अर्थात् इसपापसे उसके अन्यकर्मोंसे संचित भी स्वर्ग नष्ट होजाताहै २५४ ॥

निर्भयंतुभवेद्यस्यराष्ट्रंबाहुबलाश्रितम् । तस्यतद्वर्द्धतेनित्यंसिच्यमानइवद्रुमः २५५ ॥

प० । निर्भयं तु भवेत् यस्य राष्ट्रं बाहुबलाश्रितम् तस्य तत् वर्द्धते नित्यं सिच्यमानः इव द्रुमः ॥

यो० । यस्य बाहुबलाश्रितं राष्ट्रं निर्भयं भवेत् तस्य तत् राष्ट्रं सिच्यमानः द्रुमः इव नित्यं वर्द्धते ॥

भा० । ता० जिस राजाकी भुजा बलके आश्रयसे राष्ट्र (देश) निर्भय होताहै उसराजाका वह देश इसप्रकार बढ़ताहै जैसा सींचनेसे वृक्ष बढ़ताहै २५५ ॥

द्विविधांस्तस्करान्विद्यात्परद्रव्यापहारकान् । प्रकाशांश्चाप्रकाशांश्चचारचक्षुर्महीपतिः २५६

प० । द्विविधान् तस्करान् विद्यात् परद्रव्यापहारकान् प्रकाशान् च अप्रकाशान् च चारचक्षुः महीपतिः ॥

यो० । चारचक्षुः महीपतिः प्रकाशान् चपुनः अप्रकाशान् परद्रव्यापहारकान् द्विविधान् तस्करान् विद्यात् (जानीयात्) ॥

भा० । ता० । दूतही हैं नेत्र जिसके ऐसा राजा परद्रव्यके चुराने वाले तस्करोंको प्रकाश और अप्रकाश (प्रकट अप्रकट) के भेदसे दोप्रकार के जाने २५६ ॥

प्रकाशवञ्चकास्तेषांनानापण्योपजीविनः । प्रच्छन्नवञ्चकास्त्वेतेयेस्तेनाटविकादयः २५७

प० । प्रकाशवंचकाः तेषां नानापण्योपजीविनः प्रच्छन्नवंचकाः तु एते ये स्तेनाटविकादयः ॥

यो० । तेषां (तस्कराणां) मध्ये नानापण्योपजीविनः प्रकाशवंचकाः तु ये स्तेनाटविकादयः एते प्रच्छन्नवंचकाःसंति ॥

भा० । अनेक प्रकार की बेचने योग्य वस्तुओंको बेचकर जो जीतेहैं वे प्रत्यक्ष वंचक और चोर और वनमें वसनेवाले (भील आदि) गुप्त वंचक होतेहैं ॥

ता० । तिन चोरोंके मध्यमें जो नानाप्रकारके पण्य (बेचने योग्य हिरण्यादि) से जीविकाकरते हैं वे प्रत्यक्ष वंचक (ठगहैं) अर्थात् पराये धनको तुला आदि के छलसे ग्रहणकरनेवाले प्रकट चोर

होतेहैं और स्तेन जो अच्छे वेष से अपने स्वरूपको छिपाते हैं—और गुप्तहोकर वन आदि में रहकर धनियोंके धनको ग्रहण करते हैं वे प्रच्छन्न (गुप्त) वंचक होतेहैं २५७ ॥

उत्कोचकाश्चौपधिकावञ्चकाःकितवास्तथा। मंगलादेशवृत्ताश्चभद्राश्चेक्षणिकैःसह २५८
असम्यक्कारिणश्चैवमहामात्राश्चिकित्सकाः।शिल्पोपचारयुक्ताश्चनिपुणाःपण्ययोषितः २५९
एवमादीन्विजानीयात्प्रकाशाँल्लोककण्टकान्।निगूढचारिणश्चान्याननार्यानार्यलिंगिनः २६०

प० । उत्कोचकाः च ओपधिकाः वंचकाः कितवाः तथा मंगलादेशवृत्ताः च भद्राः च ईक्षणिकैः सह ॥

प० । असम्यक्कारिणः च एव महामात्राः चिकित्सकाः शिल्पोपचारयुक्ताः च निपुणाः पण्ययोषितः ॥

प० । एवमादीन् विजानीयात् प्रकाशान् लोककंटकान् निगूढचारिणः च अन्यान् अनार्यान् आर्यलिंगिनः ॥

यो० । उत्कोचकाः चपुनः औपधिकाः-वंचकाः--तथाकितवाः चपुनः मंगलादेशवृत्ताः चपुनः ईक्षणिकैः सह भद्राः चपुनः असम्यक्कारिणः महामात्राश्चिकित्सकाः चपुनः शिल्पोपचारयुक्ताः निपुणाः पण्ययोषितः एवमादीन्--चपुनः आर्यलिङ्गिनः अनार्यान् निगूढचारिणः प्रकाशान् लोककंटकान् राजा दूतैर्विजानीयात् ॥

भा० । उत्कोचके ग्राहक भयदिखाकर धनलेनेवाले-वंचक-(सुनारआदि) द्यूतखेलनेवाले--शास्त्रहीन ज्योतिषी आकारमें श्रेष्ठ अंतःकरणमें मलीन हाथकी रेखाओंके देखनेवाले-अनुचित शिक्षादेनेवाले पीलवान् अनुचित करनेवाले वैद्य शिल्पविद्यासे जीनेवाले और चतुर वेश्या इत्यादिकोंको और ब्राह्मण आदि के वेषको धारकर गुप्त विचरनेवाले शूद्र आदिकोंको प्रत्यक्ष जगत् के कंटक दूतोंके द्वारा राजा जाने ॥

ता० । उत्कोच (रिशवत) के लेनेवाले अर्थात् जो कार्यवालों से धनको लेकर अनुचित कार्यको करतेहैं-और औपधिक जो कार्यवाले को भयदिखाकर धनको लेतेहैं और वंचक जो स्वच्छ सुवर्ण आदि द्रव्यको लेकर अपद्रव्यके प्रक्षेपसे (खोट मिलाकर) ठगतेहैं-और कितव जो पूर्वोक्त द्यूत वा समाह्वयसे खेलते हैं--और मंगलादेशवृत्त--जो किसी को धन पुत्रलाभ आदि मंगलको वृथाबताकर दूसरेके धनको ठगतेहैं-और भद्र-जिनका आकार शुद्धदीखे और यथार्थ में होयँ पापी और ईक्षणिक जो हाथकी रेखाको देखकर शुभ वा अशुभ फल बताने से जीवतेहैं-और असम्यक्(अयथार्थ)शिक्षा देनेवाले महामात्र अर्थात् हस्तियोंको अनुचित शिक्षा देनेवाले पीलवान् और असम्यक् करनेवाले चिकित्सक (वैद्य) और शिल्पोचारयुक्त अर्थात् चित्रलेख आदि उपाय से जीनेवाले वे भी निंदित चित्रामकी वृथा प्रशंसासे दूसरे के धनको छीनते हैं-और निपुण पण्यस्त्री अर्थात् परपुरुष को वश करने में चतुर वेश्या इत्यादिकों को और ब्राह्मण आदि का चिह्न धारणकरके गुप्त विचरनेवाले शूद्र आदि अन्यों को भी राजा प्रत्यक्ष जगत् के कंटक जाने २५८ । २५९ । २६० ॥

तान्विदित्वासुचरितैर्गूढैस्तत्कर्मकारिभिः।चारैश्चानेकसंस्थानैःप्रोत्साद्यवशमानयेत् २६१

प० । तान् विदित्वा सुचरितैः गूढैः तत्कर्मकारिभिः चारैः च अनेकसंस्थानैः प्रोत्साद्य वशं आनयेत् ॥

यो० । तत्कर्मकारिभिः गूढैः सुचरितैः चपुनः अनेकसंस्थानैः चारैः तान् विदित्वा प्रोत्साद्य राजा वशं आनयेत् ॥

भा० । ता० । उस कर्म केही करनेवाले गुप्त उत्तम चरित्रवाले सभासदोंसे और अनेकस्थानोंमें टिकेहुये चारोंसे उन पूर्वोक्त वंचकोंको जानकर और उचित ताडना देकर अपने वशमें करै २६१ ॥

तेषांदोषानभिख्याप्यस्वेस्वेकर्मणितत्त्वतः । कुर्वीतशासनंराजासम्यक्सारापराधतः २६२

प० । तेषां दोषान् अभिख्याप्य स्वे स्वे कर्मणि तत्त्वतः कुर्वीत शासनं राजा सम्यक् सारापराधतः ॥

यो० । राजा स्वे स्वे कर्मणि तत्त्वतः तेषां दोषान् अभिख्याप्य (प्रकटय्य) सारापराधतः सम्यक् शासनं कुर्वीत ॥

भा० । ता० । उन कंटकों के अपने २ कर्म में अर्थात् जो जिसने कर्म किया होय उसमें अपराधोंको जगत्‌मेंविदितकरिकै उनके देहकेसामर्थ्य और अपराधोंकेअनुसार भलीप्रकार दंडकोदें २६२

नहिदण्डादृतेशक्यःकर्तुंपापविनिग्रहः । स्तेनानांपापबुद्धीनांनिभृतंचरतांक्षितौ २६३ ॥

प० । न हि दंडात् ऋते शक्यः कर्तुं पापविनिग्रहः स्तेनानां पापबुद्धीनां निभृतं चरतां क्षितौ ॥

यो० । पापबुद्धीनां निभृतं क्षितौ चरतां स्तेनानां पापविनिग्रहः दंडात् ऋते कर्तुं न हि शक्यः ॥

भा० । ता० । पाप के आचरण में है बुद्धि जिनकी और पृथ्वी पर उत्तम वेषधारों० विचरतेहुये चोरोंके पाप का विनिग्रह अर्थात् चोरीकरनेका नियम करना दंडके विना अशक्यहै अर्थात् दंडसेही चोर चोरीको छोड़सक्ता है अन्यथा नहीं २६३ ॥

सभाप्रपापूपशालावेश्ममद्यान्नविक्रयाः । चतुष्पथाश्चैत्यवृक्षाःसमाजाःप्रेक्षणानिच २६४

जीर्णोद्यानान्यरण्यानिकारुकावेशनानिच । शून्यानिचाप्यगाराणिवनान्युपवनानिच २६५॥

एवंविधान्नृपोदेशान्गुल्मैःस्थावरजंगमैः । तस्करप्रतिषेधार्थंचारैश्चाप्यनुचारयेत् २६६

प० । सभाप्रपापूपशालावेश्ममद्यान्नविक्रयाः चतुष्पथाः चैत्यवृक्षाः समाजाः प्रेक्षणानि च ॥

प० । जीर्णोद्यानानि अरण्यानि कारुकावेशनानि च शून्यानि च अपि अगाराणि वनानि उपवनानि च ॥

प० । एवंविधान् नृपः देशान् गुल्मैः स्थावरजंगमैः तस्करप्रतिषेधार्थं चारैः च अपि अनुचारयेत् ॥

यो० । सभाप्रपापूपशालावेश्ममद्यान्नविक्रयाः चतुष्पथाः चैत्यवृक्षाः समाजाः चपुनः प्रेक्षणानि जीर्णोद्यानानि अरण्यानि कारुकावेशनानि चपुनः शून्यानि अगाराणि वनानि चपुनः उपवनानि-एवंविधान् देशान् नृपः स्थावरजंगमैः दूतैः गुल्मैः वा चपुनः चारैः तस्करप्रतिषेधार्थं अनुचारयेत् ॥

भा० । ता० । तस्करोंके निषेध (नाश) के लिये राजा इसप्रकारके देशोंमें स्थावर जंगम अर्थात् एकजगह रहनेवाले वा विचरनेवाले अपने दूतोंको अथवा चारोंकोभेजे कि सभा (ग्राम वा नगरमें जनोंकी बैठक-प्रपा-(प्याऊ) अपूपशाला (जहां मालपूये बिकतेहोयँ) और वेश्याकागृह मदिरा और अन्नके विक्रयका स्थान-चतुष्पथ (चौराहा) और विख्यात वृक्षोंकेमूल और जनसमूहका स्थान और प्रेक्षण (मेले) और जीर्णउद्यान (पुरानीवाटिका) बड़े २ वन और शिल्पकेगृह (कारीगरोंकेस्थान) और मनुष्यआदिकोंसे शून्यघर और वन और उपवनआदिमें २६४ । २६५ । २६६ ॥

तत्सहायैरनुगतैर्नानाकर्मप्रवेदिभिः । विद्यादुत्सादयेच्चैवनिपुणैःपूर्वतस्करैः २६७ ॥

प० । तत्सहायैः अनुगतैः नानाकर्मप्रवेदिभिः विद्यात् उत्सादयेत् च एव निपुणैः पूर्वतस्करैः ॥

यो० । तत्सहायैः अनुगतैः नानाकर्मप्रवेदिभिः निपुणैः पूर्वतस्करैः तान् तस्करान् विद्यात् चपुनः उत्सादयेत्(नाशयेत्) ॥

भा० । ता० । उन तस्करोंकी सहायताको प्राप्तहुये और उनके चरित्रोंके अनुवर्ती और सन्धिच्छेद आदिनानाकर्मोंके कर्तव्योंके ज्ञाता जो पुरानेचोर उनसे अर्थात् उनकोही चारबनाकर नवीनतस्करों को राजा जानले और फिर नष्टकरदे २६७ ॥

भक्ष्यभोज्योपदेशैश्चब्राह्मणानांचदर्शनैः।शौर्यकर्मापदेशैश्चकुर्युस्तेषांसमागमम् २६८

प० । भक्ष्यभोज्योपदेशैः च ब्राह्मणानां च दर्शनैः शौर्यकर्मापदेशैः च कुर्युः तेषां समागमम् ॥

यो० । ते (पूर्वचौराः) भक्ष्यभोज्योपदेशैः चपुनः ब्राह्मणानांदर्शनैः चपुनः शौर्यकर्मापदेशैः तेषां (नवीनचौराणाम्) राजपुरुषैः सह-समागमं कुर्युः ॥

भा० । भक्ष्य भोज्यकेमिससे-वा ज्योतिषीआदि ब्राह्मणोंके दर्शन-युद्धभूमि आदिके दर्शनके मिससे उन नवीनचोरोंको वे पुरानेचोर दंडदेनेवाले राजपुरुषोंका समागम कराकर पकड़वायदें ॥

ता० । दूत वा चारबनेहुये वे पूर्व चोर उननये चोरोंको इसप्रकार राजाके दण्डधारी पुरुषोंके संग समागम कराकर पकड़वायदें कि हमारे घरचलो वहां सबमिलकर मोदक और पायसआदि भक्षण करावेंगे इसप्रकार भक्ष्य भोज्यके मिससे-और हमारे देशमेंचलो वहां एकऐसा ब्राह्मणहै वह ऐसा मुहूर्त वा यत्न बताता है जिससे चोरोंके वांछितअर्थकी सिद्धि होती है इसप्रकार ब्राह्मणों के दर्शनसे-और चलो एकमनुष्य ऐसा बलवान्है अनेक मनुष्योंके संग एकाकी युद्धकरता है उसका दर्शन करेंगे-इस शूरवीरता कर्तव्यके बहानेसे-उनचोरोंको पकड़वायदें २६८ ॥

येतत्रनोपसर्पेयुर्मूलप्रणिहिताश्चये।तान्प्रसह्यनृपोहन्यात्समित्रज्ञातिबान्धवान् २६९

प० । ये तत्र न उपसर्पेयुः मूलप्रणिहिताः च ये तान् प्रसह्य नृपः हन्यात् समित्रज्ञातिबांधवान् ॥

यो० । ये नवीनचोराः तत्र न उपसर्पेयुः चपुनः येमूलप्रणिहिताः संति-समित्रज्ञातिबांधवान् तान् नृपः प्रसह्य हन्यात् ॥

भा० । ता० । जो नवीन पकड़नेकी शंकासे पूर्वोक्त स्थानोंमें न जायँ-अथवा जो राजनियुक्त पुराण चोरोंके पकड़नेमें सावधान रहें अर्थात् वशमें न आवें-मित्र और ज्ञाति और बांधवों सहित उनको राजा बलात्कारसे मारदे २६९ ॥

नहोढेनविनाचौरंघातयेद्धार्मिकोनृपः।सहोढंसोपकरणंघातयेदविचारयन् २७० ॥

प० । न होढेन विना चौरं घातयेत् धार्मिकः नृपः सहोढं सोपकरणं घातयेत् अविचारयन् ॥

यो० । धार्मिकः नृपः होढेन विना चौरं न घातयेत् सहोढं सोपकरणं चौरं अविचारयन सन घातयेत् ॥

भा० । ता० । धार्मिक राजा होढके विना अर्थात् द्रव्यका हरण संधिकाछेदन उपकरण (चोरी कासामान) आदि तिरस्कारके विना चोरको न मरवावे और होढ-और उपकरण सहित चोरको देखकर तो विचारको छोड़कर मरवायदे २७० ॥

ग्रामेष्वपिचयेकेचिच्चौराणांबलदायकाः।भाण्डावकाशदाश्चैवसर्वांस्तानपिघातयेत् २७१

प० । ग्रामेषु अपि च ये केचित् चौराणां बलदायकाः भाण्डावकाशदाः च एव सर्वान् तान् अपि घातयेत् ॥

यो० । ये केचित् ग्रामेषु अपि चौराणां बलदायकाः चपुनः भाण्डावकाशदाः (सन्ति)तान् अपि सर्वान् घातयेत् ॥

भा० । ता० । ग्रामोंमें भी जो कोई मनुष्य चोरोंके बल देनेवाले हैं अर्थात् भोजन वस्त्रआदिसे

चोरोंके सहायकहैं अथवा जो चोरोंको चोरीके उपयोगी शस्त्र भाण्ड और घरआदिमें निवास देते हैं उनसबको भी मरवायदे २७१ ॥

राष्ट्रेषुरक्षाधिकृतान्सामन्तांश्चैवचोदितान् ।अभ्याघातेषुमध्यस्थान्शिष्याच्चौरानिवद्रुतम् २७२

प० । राष्ट्रेषु रक्षाधिकृतान् सामंतान् च एव चोदितान् अभ्याघातेषु मध्यस्थान् शिष्यात् चौरान् इव द्रुतम् ॥

यो० । अभ्याघातेषुमध्यस्थान राष्ट्रेषु रक्षाधिकृतान् चपुनः चोदितान् सामंतान् अपि चौरान् इव द्रुतं शिष्यात् ॥

भा० । ता० । जो देशकी रक्षामें नियुक्त पुरुष और राज्यकी समीपर वसनेवाले राजसेवक सामंत चोरीकरानेमें मध्यस्थहों अर्थात् उदासीनरहैं उनको भी चोरोंके समानही शीघ्रदण्डदे २७२ ॥

यश्चापिधर्मसमयात्प्रच्युतोधर्मजीवनः । दण्डेनैवतमप्योषेत्स्वकाद्धर्माद्धिविच्युतम् २७३

प० । यः च अपि धर्मसमयात् प्रच्युतः धर्मजीवनः दंडेन एव तं अपि ओषेत् स्वकात् धर्मात् हि विच्युतम् ॥

यो० । यः धर्मजीवनः अपि धर्मसमयात् प्रच्युतः भवति स्वकात् धर्मात् विच्युतं तं अपि दंडेन एव ओषेत् ॥

भा० । ता० । यज्ञकराने और प्रतिग्रहलेनेसे धर्मपूर्वक जीविका करनेवाला जो ब्राह्मणहै वहभी यदि धर्मकी मर्यादासे रहितहोजाय अर्थात् शास्त्रोक्तरीतिसे यज्ञआदि न करावे तो अपने धर्मसे पतित उसको भी राजा दंडसेही ताडनादे २७३ ॥

ग्रामघातेहिताभंगेपथिमोषाभिदर्शने । शक्तितोनाभिधावन्तोनिर्वास्याःसपरिच्छदाः २७४

प० । ग्रामघाते हिताभंगे पथि मोषाभिदर्शने शक्तितः न अभिधावन्तः निर्वास्याः सपरिच्छदाः ॥

यो० । ग्रामघाते—हिताभंगे—पथि मोषाभिदर्शनेसति ये शक्तितः न अभिधावन्तःसन्ति ते सपरिच्छदाः राज्ञानिर्वास्याः॥

भा० । ता० । जो पुरुष चोरोंसे ग्रामके लूटनेपर और जलके सेतुओंके टूटनेपर और मार्गमें चोरोंके दीखनेपर समीपमें टिकनेपर भी अपनी शक्तिके अनुसार नहीं दौड़ते अर्थात् रक्षानहीं करते शय्या गौ—अश्वआदि सामग्री सहित उनको भी अपने देशमेंसे निकासदे २७४ ॥

राज्ञःकोशापहर्तॄंश्चप्रतिकूलेषुचस्थितान् । घातयेद्विविधैर्दण्डैररीणांचोपजापकान् २७५

प० । राज्ञः कोशापहर्तॄन् च प्रतिकूलेषु च स्थितान् घातयेत् विविधैः दंडैः अरीणां च उपजापकान् ॥

यो० । राज्ञः कोशापहर्तॄन चपुनः प्रतिकूलेषु स्थितान चपुनः अरीणां उपजापकान राजा विविधैः दंडैः घातयेत् ॥

भा० । ता० । जो पुरुष राजाके कोशमेंसे धनको चुरातेहैं अथवा राजाकी आज्ञाका अवलंघन करतेहैं और जो राजाके शत्रुओंके वैरको राजाके संग बढ़ाते हैं इनसबको विविध दंडोंसे अर्थात् कर चरण जिह्वा छेदनआदिसे मरवायदे २७५ ॥

संधिंछित्वातुयेचौर्यंरात्रौकुर्वन्तितस्कराः । तेषांछित्वानृपोहस्तौतीक्ष्णेशूलेनिवेशयेत् २७६॥

प० । सन्धिं छित्वा तु ये चौर्यं रात्रौ कुर्वंति तस्कराः तेषां छित्वा नृपः हस्तौ तीक्ष्णे शूले निवेशयेत् ॥

यो० । ये तस्कराः संधिं छित्वारात्रौ चौर्यं कुर्वंति नृपः तेषां हस्तौछित्वा तीक्ष्णे शूले निवेशयेत् ॥

भा० । ता० । रात्रिके समय भीति वा किवाड़आदिको छेदनकरके जोचोर चोरीको करतेहैं राजा उनके हाथोंको छेदनकरके तीक्ष्ण शूलीपर प्रवेशकरदे २७६ ॥

अंगुलीग्रंन्थिभेदस्यछेदयेत्प्रथमेग्रहे। द्वितीयेहस्तचरणौतृतीयेवधमर्हति २७७॥

प० अंगुलीः ग्रंथिभेदस्य छेदयेत् प्रथमे ग्रहे द्वितीये हस्तचरणौ तृतीये वधं अर्हति ॥

यो० । ग्रंथिभेदस्यप्रथमेग्रहे अंगुलीः द्वितीयेहस्तचरणौ छेदयेत् तृतीये अपराधेसति वधं अर्हति ॥

भा० । ता० । पटप्रान्तः १ (पिटयारी) आदिमें रक्खेहुये सुवर्णादिकको ग्रंथि खोलकर जो चुराताहै उसको ग्रन्थिभेद कहतेहैं उस ग्रन्थिभेदके प्रथमग्रहमें अर्थात् पूर्वोक्त सुवर्णचुरानेके प्रथम अपराधमें अंगुलियोंको अर्थात् इस याज्ञवल्क्यके वचनानुसार अँगूठा और तर्जनीको छेदनकरै और दूसरेमें हाथ और चरण और तीसरे अपराधमें वधके योग्यहोताहै २७७ ॥

अग्निदान्भक्तदांश्चैवतथाशस्त्रावकाशदान्। संनिधातॄंश्चमोषस्यहन्याच्चौरमिवेश्वरः २७८

प० । अग्निदान् भक्तदान् च एवं तथा शस्त्रावकाशदान् संनिधातॄन् च मोषस्य हन्यात् चौरं इव ईश्वरः ॥

यो० । अग्निदान्- भक्तदान्-तथा शस्त्रावकाशदान्-चपुनः मोषस्य (चोरधनस्य) संनिधातॄन्-ईश्वरः (राजा) चौरं इव हन्यात् (मारयेत्) ॥

भा० । ता० । अग्निके देनेवाले और चोरोंको भोजन के दाता-और चोरोंके शस्त्रों और चोरीके धनको अपनेपास रखनेवाले-इनको भी राजा चोरोंके समानही मारदे-अर्थात् चोरोंको जो दंड होताहै वही उनको भी दे २७८ ॥

तडागभेदकंहन्यादप्सुशुद्धवधेनवा। यद्वापिप्रतिसंस्कुर्याद्दाप्यस्तूत्तमसाहसम् २७९ ॥

प० । तडागभेदकं हन्यात् अप्सु शुद्धवधेन वा यत् वा अपि प्रतिसंस्कुर्यात् दाप्यः तु उत्तमसाहसम् ॥

यो० । राजा तडागभेदकं अप्सु वा शुद्धवधेन हन्यात्- यद्वा तडागं प्रतिसंस्कुर्यात् तर्हि उत्तमसाहसं दाप्यः (दंडनीयः) ॥

भा० । ता० । जो मनुष्य स्नान जलपानके उपकारी तड़ागको सेतु (मर्यादा) के भेदन आदिसे नष्टकरताहै उसको जल में डुबाकर वा शुद्धवधसे राजा मारदे और यदि वह तडागका पुनः संस्कार करदे अर्थात् ज्योंका त्यों करदे तो राजा उस मनुष्यको उत्तमसाहस दंड दे २७९ ॥

कोष्ठागारायुधागारदेवतागारभेदकान्। हस्त्यश्वरथहर्तॄंश्चहन्यादेवाविचारयन् २८०॥

प० । कोष्ठागारायुधागारदेवतागारभेदकान् हस्त्यश्वरथहर्तॄन् च हन्यात् एव अविचारयन् ॥

यो० । कोष्ठागारायुधागारदेवतागारभेदकान् चपुनः हस्त्यश्वरथहर्तॄन् पुरुषान् राजा अविचारयन् सन् हन्यात्(मारयेत्) ॥

भा० । ता० । राजा का कोठार आयुध का और देवताका स्थान इनकोजो नष्टकर्ता हैं और हाथी अश्व रथ इनके जो चोर हैं उन मनुष्योंको भी विना विचारे मरवाय दे-इसी वचनसे जो आगे प्रतिमाके भेदकको पंचशत ५०० पणदंडकहेंगे वह मिट्टीकीप्रतिमाके भेदकको दंडदेना जानना २८०॥

---

१ उत्क्षेपकग्रंथिभेदौ करसंदंशहीनकौ ॥

यस्तुपूर्वनिविष्टस्यतडागस्योदकंहरेत्।आगमंवाप्यपांभिंद्यात्सदाप्यःपूर्वसाहसम् २८१

प० । यः तु पूर्वनिविष्टस्य तडागस्य उदकं हरेत् आगमं वा अपि अपां भिंद्यात् सः दाप्यः पूर्व-साहसम् ॥

यो० । यः पुरुषः पूर्व निविष्टस्य तडागस्य उदकं हरेत् वा अपां (जलानां) आगमं भिंद्यात् सः पुरुषः राज्ञा उत्तमसाहसं दाप्यः (दंड्यः) ॥

भा० । ता० । जो मनुष्य प्रथम से किसी के बनायेहुये तडाग के जलको चुरावे अथवा जल आने के मार्ग को सेतु (पुल) आदि को बांधकर नष्टकर(रोक)दे—उस मनुष्यको राजा पूर्वसाहस दंड दे—और संपूर्ण तड़ागके नाशकरनेमें तो वधका दंड पहिले कहचुके हैं २८१ ॥

समुत्सृजेद्राजमार्गेयस्त्वमेध्यमनापदि।सद्वौकार्षापणौदद्यादमेध्यंचाशुशोधयेत् २८२

प० । समुत्सृजेत् राजमार्गे यः तु अमेध्यं अनापदि सः द्वौ कार्षापणौ दद्यात् अमेध्यं च आशु शोधयेत् ॥

यो० । यः पुरुषः राजमार्गे अनापदि अमेध्यं (अपवित्रं विष्ठा आदि) समुत्सृजेत् सः पुरुषः राज्ञे द्वौ कार्षापणौ दद्यात् चपुनः अमेध्यं आशु शोधयेत् ॥

भा० । ता० । जो मनुष्य राजमार्ग में अपवित्र विष्ठा आदि वस्तुको विना आपत्तिके समय डाल दे वह पुरुष राजाको दो सुवर्ण दंड दे और अपवित्र वस्तुको उठवाकर मार्गको शुद्धकरदे २८२ ॥

आपद्गतोऽथवावृद्धोगर्भिणीबालएववा।परिभाषणमर्हंतितच्चशोध्यमितिस्थितिः २८३॥

प० । आपद्गतः अथवा वृद्धः गर्भिणी बालः एव वा परिभाषणं अर्हंति तत् च शोध्यं इति स्थितिः॥

यो० । आपद्गतः अथवावृद्धः गर्भिणी—वा बालः एव एते परिभाषणं अर्हंति चपुनः तत् अमेध्यं एतैः शोध्यं इति स्थितिः (शास्त्रमर्यादा) अस्ति ॥

भा० । ता० । यदि राजमार्ग में अपवित्र वस्तुको रोगी वृद्ध—गर्भवती स्त्री बालक—ये डालें तो परिभाषण (निंदा वा झिड़कना) के योग्य होतेहैं अर्थात् बुराकिया यही कहने योग्य होतेहैं और उस अपवित्र वस्तुको दूरकराकर मार्ग को शुद्धकरदें २८३ ॥

चिकित्सकानांसर्वेषांमिथ्याप्रचरतांदमः।अमानुषेषुप्रथमोमानुषेषुतुमध्यमः २८४॥

प० । चिकित्सकानां सर्वेषां मिथ्याप्रचरतां दमः अमानुषेषु प्रथमः मानुषेषु तु मध्यमः ॥

यो० । मिथ्याप्रचरतां सर्वेषां चिकित्सकानां अमानुषेषु प्रथमः साहसः मानुषेषु तु मध्यमः साहसः दंडः स्यात् इति स्थितिः (शास्त्रमर्यादा) अस्ति ॥

भा० । ता० । जो चिकित्सक (वैद्य) मनुष्य भिन्नोंमें मिथ्या चिकित्सा अर्थात् कुछ रोगकी कुछ करें उनको प्रथम साहस दंड होताहै और जो वैद्य मानुषोंकी पूर्वोक्त चिकित्सा करें उसको मध्यम साहस दंड होताहै २८४ ॥

संक्रमध्वजयष्टीनांप्रतिमानांचभेदकः।प्रतिकुर्याच्चतत्सर्वंपंचदद्याच्छतानिच २८५॥

प० । संक्रमध्वजयष्टीनां प्रतिमानां च भेदकः प्रतिकुर्यात् च तत् सर्वं पंच दद्यात् शतानि च ॥

यो० । संक्रमध्वजयष्टीनां चपुनः प्रतिमानां भेदकः पुरुषः तत् (संक्रमादिकं) सर्वं प्रतिकुर्यात् चपुनः पंचशतानि पणानि दंडं दद्यात् ॥

भा० । ता० । संक्रम (जलके ऊपरसे जाने का काष्ठ वा शिलाका मार्ग) ध्वज (राजद्वारकाचिह्न) यष्टि अर्थात् पुष्करणी आदि में पूजन का स्तंभ और मिट्टीकी क्षुद्र प्रतिमा इनका जो भेदक है वह पांचसौ ५०० पण दंड दे—और विनाश कियेहुये संक्रम आदिकोंको पुनः नवीन बनवायदे २८५ ॥

अदूषितानांद्रव्याणांदूषणेभेदनेतथा । मणीनामपवेधेचदण्डःप्रथमसाहसः २८६ ॥

प० । अदूषितानां द्रव्याणां दूषणे भेदने तथा मणीनां अपवेधे च दंडः प्रथमसाहसः ॥

यो० । अदूषितानां द्रव्याणां दूषणे तथाभेदने चपुनः मणीनां अपवेधे प्रथमसाहसः दंडः कार्यः ॥

भा० । ता० । यथार्थ द्रव्योंको निंदित द्रव्य मिलाकर दूषितकरने और माणिक्य आदि मणियों के भेदनकरने अथवा अयोग्य स्थानमें बींधने पर प्रथमसाहस दंडको राजा दे—और दूसरेके द्रव्यनाशकरनेपर उसकीप्रसन्नताकरनी अर्थात् द्रव्यान्तरदेकरउसकासंतोषकरना सबजगहसमझना २८६ ॥

समैर्हिविषमंयस्तुचरेद्वैमूल्यतोऽपिवा । समाप्नुयाद्दमंपूर्वंनरोमध्यममेववा २८७ ॥

प० । समैः हि विषमं यः तु चरेत् वै मूल्यतः अपि वा समाप्नुयात् दमं पूर्वं नरः मध्यमं एव वा ॥

यो० । यः पुरुषः समैः सह विषमंचरेत् वा मूल्यतः विषमं चरेत् सः नरः पूर्वंदमं वा मध्यमं एव दमं समाप्नुयात् ॥

भा० । ता० । जो मनुष्य समानमूल्य देनेवालोंके संग उत्कृष्ट वा अपकृष्ट द्रव्योंको देकर विषम व्यवहार करताहै अर्थात् किसीको अच्छा और किसीको निकृष्टदेताहै अथवा समान मूल्यके द्रव्यको देकर किसीसे अधिकमूल्य और किसीसे अल्पमूल्य लेताहै उसमनुष्यको प्रथम साहस अथवा मध्यमसाहस दण्ड द्रव्यके अनुसार होताहै २८७ ॥

बन्धनानिचसर्वाणिराजामार्गेनिवेशयेत् । दुःखितायत्रदृश्येरन्विकृताःपापकारिणः २८८

प० । बंधनानि च सर्वाणि राजा मार्गे निवेशयेत् दुःखिताः यत्र दृश्येरन् विकृताः पापकारिणः ॥

यो० । राजासर्वाणि बंधनानि मार्गे निवेशयेत् यत्र दुःखिताः विकृताः-पापकारिणः जनैः दृश्येरन् ॥

भा० । ता० । राजा सबबन्धनोंके आगारों (गृहों) को मार्गमें बनवावे क्योंकि वहां विकृतरूप वाले दुःखित पापियोंको अनेकजनदेखें जिससे कोई भी पापमें प्रवृत्तनहो २८८ ॥

प्राकारस्यचभेत्तारंपरिखाणांचपूरकम् । द्वाराणांचैवभंक्तारंक्षिप्रमेवप्रवासयेत् २८९ ॥

प० । प्राकारस्य च भेत्तारं परिखाणां च पूरकं द्वाराणां च एव भंक्तारं क्षिप्रं एव प्रवासयेत् ॥

यो० । राजा प्राकारस्यभेत्तारं चपुनः परिखाणां पूरकं चपुनः द्वाराणां भंक्तारं क्षिप्रं एवप्रवासयेत् ॥

भा० । ता० । राजगृह वा पुरीके प्राकार (परकोटा) भेदक और परिखा (खाई) ओंके पूरणकरने वाले राजगृह वा पुरीके द्वारोंके तोड़नेवालोंको शीघ्रही देशसे निकासदे २८९ ॥

अभिचारेषुसर्वेषुकर्तव्योद्विशतोदमः । मूलकर्मणिचानाप्तेःकृत्यासुविविधासुच २९० ॥

प० । अभिचारेषु सर्वेषु कर्तव्यः द्विशतः दमः मूलकर्मणि च अनाप्तेः कृत्यासु विविधासु च ॥

यो० । सर्वेषु अभिचारेषु चपुनः मूलकर्मणि चपुनः विविधासु कृत्यासु फले अनाप्तेःसति द्विशतः दमःकर्तव्यः ॥

भा० । सम्पूर्ण अभिचारके कर्मों और जड़काटनेके कर्मोंमें और अनेकप्रकारकी उच्चाटन आदि कृत्याओंमें भी दोसौपण दंड अपराधीको देना ॥

ता० । सम्पूर्ण अभिचार (मारने) होमआदि शास्त्रोक्त उपायोंमें और मूलकर्म अर्थात् जड़का खोदना अथवा किसीके पैरकेनीचेकी धूलिको ग्रहणकरनेपर यदि मरणरूपी फल न होय तो दोसै पणदंडदेना और मरणहोजाय तो मारनेका दण्डहोताहै इसीप्रकार अनेकप्रकारकी कृत्याओंमें भी अर्थात् किसीको मोहितकरिकै धन छीननेकेलिये वशीभूतकरना अथवा किसीके उच्चाटनआदिकोंमें दोसौपण दण्डसमझना २९० ॥

अबीजविक्रयीचैवबीजोत्कृष्टंतथैवच । मर्यादाभेदकश्चैवविकृतंप्राप्नुयाद्वधम् २९१ ॥

प० । अबीजविक्रयी चँ एवँ बीजोत्कृष्टं तथाँ एवँ चँ मर्यादाभेदकः चँ एवँ विकृतं प्राप्नुयात् वधम् ॥

यो० । अबीजविक्रयी चपुनः तथैव बीजोत्कृष्टं यः विक्रीणाति-चपुनः यः पुरुषः मर्यादाभेदकः अस्ति सः पुरुषः विकृतं यथा स्यात्तथा वधं प्राप्नुयात् ॥

भा० । ता० । जो मनुष्य उपजने के अयोग्य बीजको बेचताहै अथवा यत् किंचित् श्रेष्ठ बीजको मिलाकर सबकोही उत्तमबताकर जो विक्रय करै (बेचै) और ग्राम आदि की सीमाका जो भेदनकरै वह नासिका कर चरण कर्ण आदि के छेदन रूप वध (हिंसा) को प्राप्त होताहै २९१ ॥

सर्वकण्टकपापिष्ठंहेमकारंतुपार्थिवः । प्रवर्तमानमन्यायेछेदयेल्लवशःक्षुरैः २९२ ॥

प० । सर्वकंटकपापिष्ठं हेमकारं तुँ पार्थिवः प्रवर्तमानं अन्यायें छेदयेत् लवशः क्षुरैः ॥

यो० । पार्थिवः अन्याये प्रवर्तमानं सर्वकंटकपापिष्ठं हेमकारं क्षुरैः लवशः छेदयेत् ॥

भा० । ता० । तोलका छल-निंदित वस्तु (खोट) का मिलाव-आदि से अन्याय सोने की चोरी का कर्ता जो सब कंटकों में अत्यंत पापी सुवर्णकार (सुनार) है उसके देहका छेदन राजा छुरियोंसे लेश २ करै-अर्थात् अपराधके अनुसार सब अंगका वा प्रत्येक अंगका छेदनकरै २९२ ॥

सीताद्रव्यापहरणेशस्त्राणामौषधस्यच । कालमासाद्यकार्यंचराजादण्डंप्रकल्पयेत् २९३

प० । सीताद्रव्यापहरणे शस्त्राणां औषधस्य चँ कालं आसाद्य कार्यं चँ राजा दंडं प्रकल्पयेत् ॥

यो० । सीताद्रव्यापहरणे-शस्त्राणां-चपुनः औषधस्य-हरणे कालं-आसाद्य (दंडदानं) कार्यं दंडं राजा प्रकल्पयेत् (कुर्यात्) ॥

भा० । ता० । हल कुदाल आदि जो भूमिको जोतने के द्रव्य उनकी चोरी और खड्ग आदि शस्त्रों औषधकी चोरी में-समयके अनुसार राजा दंड की कल्पना करै अर्थात् पूर्वोक्त वस्तुओं की आवश्यकता समय अधिक और अनावश्यकताके समय में अल्प दंडदे २९३ ॥

स्वाम्यमात्यौपुरंराष्ट्रंकोशदण्डौसुहृत्तथा । सप्तप्रकृतयोह्येताःसप्तांगराज्यमुच्यते २९४ ॥

प० । स्वाम्यमात्यौ पुरं राष्ट्रं कोशदंडौ सुहृत् तथा सप्त प्रकृतयः हि एताः सप्तांगं राज्यं उच्यते ॥

यो० । स्वाम्यमात्यौ-पुरं-राष्ट्रं-कोशदंडौ-तथासुहृत् (मित्र) एताः सप्त प्रकृतयः (अंगानि) भवंति बुधैः राज्यं सप्तांगं उच्यते ॥

भा० । राजा-मंत्री-पुर-देश-कोश-सेना-मित्र-ये सात अंग होतेहैं और इनसेही राज्यको सप्तांग (सात अंगवाला) कहते हैं ॥

ता० । स्वामी–(राजा) अमात्य (मंत्री आदि) पुर (जिसमें राजा का बनायाहुआ दुर्गहो ऐसा नगर) राष्ट्र (देश)–कोश (जिसमें संचित धनरहै–खजाना) और दंड (हाथी अश्व रथ आदि) अर्थात् सेना और सुहृत् सातवें अध्यायमें कहेहुये तीनप्रकारके मित्र ये सात प्रकृति (अंग) होतेहैं और राज्य इनसेही सप्तांग कहाताहै २९४ ॥

सप्तानांप्रकृतीनांतुराज्यस्यासांयथाक्रमम् । पूर्वंपूर्वंगुरुतरंजानीयाद्व्यसनंमहत् २९५

प० । सप्तानां प्रकृतीनां तु राज्यस्य आसां यथाक्रमं पूर्वं पूर्वं गुरुतरं जानीयात् व्यसनं महत् ॥

यो० । आसां सप्तानां राज्यस्य प्रकृतीनां मध्ये–यथाक्रमं पूर्वं पूर्वं गुरुतरं महत् व्यसनं जानीयात् ॥

भा० । राज्यके इन सात प्रकृतियों में पूर्व २ व्यसनको यथाक्रम महान् और अतीव गुरु जाने इससे प्रथम २ की रक्षापूर्वक उत्तर २ की रक्षा में यत्नकरै ॥

ता० । इन पूर्वोक्त सातों राज्यकी प्रकृतियों के मध्यमें पूर्व पूर्व प्रकृतिके नाशका जो दुःख है उसको महान् (बड़ा) गुरु जानै अर्थात् मित्रके व्यसनसे सबलका व्यसन गुरुतर अत्यंत गुरु है–क्योंकि जो बलसे संपन्न है वही अनुग्रह करनेमें समर्थ होताहै–इसीप्रकार बलसे कोशका व्यसन गुरुतर है क्योंकि कोशके नाशमें बलका भी नाश होजाताहै–कोशसे राष्ट्रका व्यसन गुरुतरहै क्योंकि राष्ट्रके नाशमें कोशकी उत्पत्ति कैसे होसक्ती है–राष्ट्रके नाशसे दुर्गका व्यसन गुरुतर है–क्योंकि अन्न यवस इंधन आदि से संपन्न दुर्गसेही राज्यकी रक्षा होसक्तीहै–दुर्ग के व्यसनसे मंत्रीका व्यसन गुरुहै क्योंकि प्रधानमंत्रीके नाशपर राज्यके सब अंगोंमें व्याकुलता होजातीहै–और मंत्रीके व्यसन से स्वामी (राजा) का व्यसन गुरुतरहै क्योंकि राजाही सबकी रक्षाकाकारण होताहै–तिससे प्रथम २ की रक्षाको उत्तर २ की अपेक्षासे बड़े २ यत्नसे करैं २९५ ॥

सप्तांगस्येहराज्यस्यविष्टब्धस्यत्रिदण्डवत् । अन्योन्यगुणवैशेष्यान्नकिंचिदतिरिच्यते २९६

प० । सप्तांगस्य इह राज्यस्य विष्टब्धस्य त्रिदंडवत् अन्योन्यगुणवैशेष्यात् न किंचित् अतिरिच्यते ॥

यो० । त्रिदंडवत् विष्टब्धस्य सप्तांगस्य राज्यस्य अन्योन्यगुणवैशेष्यात् किंचित् न अतिरिच्यते ॥

भा० । संन्यासीके तीन दंडों के समान परस्पर मिलाहुआ जो सप्तांग राज्य उसमें परस्पर अंग की अपेक्षासे कोई अंग अधिक नहीं होता ॥

ता० । त्रिदंडके समान परस्पर संबद्ध (मिलित) जो सप्तांग राज्य उसके परस्पर उपकारकहोनेसे कोई अंग अधिक नहीं होता अर्थात् ये सब परस्पर ऐसे सापेक्ष हैं कि एकके विना दूसरे की उन्नति में अंतर आजाताहै यद्यपि पूर्व श्लोकमें पूर्व२ अंगकी अधिकता कहीहै तथापि इन अंगों में कोई अंग अन्य अंगके अपकार को नहीं करसक्ता इससे पूर्व पूर्व अंगका उत्तर उत्तर अंगकी अपेक्षा करनी इसलिये पूर्व पूर्व अंगकी अधिकता का निषेधहै–और वे अंग इसप्रकार अधिक नहीं होते जैसे चार अंगुलके गोवालोंसे बँधेहुये संन्यासी के तीनोंदंड परस्पर संबद्ध होते हैं और उनमेंसे एक भी अंग अधिक नहीं होता तिसीप्रकार राज्यके अंगों में भी कोई अंग अधिक नहीं होता २९६ ॥

तेषुतेषुतुकृत्येषुतत्तदंगंविशिष्यते । येनयत्साध्यतेकार्यंतत्तस्मिन्श्रेष्ठमुच्यते २९७ ॥

प० । तेषु तेषु तु कृत्येषु तत् तत् अंगं विशिष्यते येन यत् साध्यते कार्यं तत् तस्मिन् श्रेष्ठं उच्यते ॥

यो० । तुपुनः तेषु तेषु कृत्येषु तत् तत् अंगंविशिष्यते येन अंगेन यत् कार्यं साध्यते तस्मिन् कार्ये तत् अंगं श्रेष्ठं उच्यते।।

भा० । ता० । तिस २ कार्य में वही २ अंग श्रेष्ठ होताहै जो कार्य जिस अंगसे सिद्धहो उसकार्य के लिये वही अंग उत्तम होताहै अर्थात् कार्य की साधकतासेही उत्तमताहै और सब अंगोंमें परस्पर गुण विशेष होने से कोई भी अंग अधिक नहींहोता २९७ ॥

चारेणोत्साहयोगेनक्रिययैवचकर्मणाम्। स्वशक्तिंपरशक्तिंचनित्यंविद्यान्महीपतिः २९८

प० । चारेण उत्साहयोगेन क्रियया एव च कर्मणां स्वशक्तिं परशक्तिं च नित्यं विद्यात् महीपतिः

यो० । महीपतिः चारेण उत्साहयोगेन चपुनः कर्मणां क्रियया स्वशक्तिं चपुनः परशक्तिं नित्यं विद्यात् ॥

भा० । ता० । कापटिक आदि सातवें ७ अध्याय में उक्त चार से और उत्साह के योगसे—और हस्तिबंध वणिक्पथ आदि कर्मों के करनेसे पैदाहुई अपनी शक्तिको और प्रतिपक्षी राजा की शक्ति को नित्य राजा जाने २९८ ॥

पीडनानिचसर्वाणिव्यसनानितथैवच। आरभेततत:कार्यंसंचिन्त्यगुरुलाघवम् २९९

प० । पीडनानि च सर्वाणि व्यसनानि तथा एव च आरभेत ततः कार्यं संचिंत्य गुरुलाघवम् ॥

यो० । सर्वाणि पीडनानि तथैव व्यसनानि—गुरुलाघवं संचिंत्य—ततः राजा कार्यं आरभेत—(कार्यारम्भः कुर्वीत) ॥

भा० । ता० । मारकआदि सम्पूर्ण पीडा और काम क्रोधसे पैदाहुये सम्पूर्ण दुःखोंको और अपने और पराये देशमें उन पीडनआदि का गुरुलाघव (न्यूनाधिकभाव) को प्रथम विचारकर पीछे से कार्यों का प्रारम्भ राजाकरै २९९ ॥

आरभेतैवकर्माणिश्रान्तःश्रान्तःपुनःपुनः। कर्माण्यारभमाणंहिपुरुषंश्रीर्निषेवते ३०० ॥

प० । आरभेत एव कर्माणि श्रांतः श्रांतः पुनः पुनः कर्माणि आरभमाणं हि पुरुषं श्रीः निषेवते॥

यो० । हि (यतः) कर्माणि आरभमाणं पुरुषं श्रीः निषेवते अतः श्रांतः श्रांतः (थकितः) राजा पुनः पुनः कर्माणि आरभेत एव—नविरमेत इत्यर्थः ॥

भा० । श्रान्त (थका) हुआ भी राजा पुनः पुनः कार्यों का प्रारम्भकरै अर्थात् एकदोबार कार्य की सिद्धि न होनेसे उदासीन नहो—क्योंकि कार्यों का आरम्भकरनेवाले मनुष्यकोही लक्ष्मी सेवती है—अर्थात् वही धनी होताहै जो वारंवार कार्यों का प्रारम्भ करताहै ॥

ता० । अपने राज्यकी वृद्धि और परराज्य की हानि के करनेवाले कार्योंको—यह कार्य छलआदि के आरम्भ करनेपर भी क्यों न हुआ इसप्रकार खिन्नहुआभी राजा वारंवार उन्हीं कार्योंका आरम्भ करै क्योंकि वारंवार कार्योंका प्रारम्भकरतेहुये पुरुषकी लक्ष्मी निरन्तर सेवाकरती है और इसशास्त्र की आज्ञाके अनुसार भी राजा उदासीन न रहै कि जो ब्राह्मण का भक्त नहीं जिसका कोई प्रबल आश्रयनहीं, उसके यहां श्री (लक्ष्मी) नहींहोती—और होतीभी है तो नष्टहोजाती है और उसकेकिये कर्म भी तिस २ युगके अनुसार नहींफलते—क्योंकि ३०० ॥

कृतंत्रेतायुगंचैवद्वापरंकलिरेवच। राज्ञोवृत्तानिसर्वाणिराजाहियुगमुच्यते ३०१ ॥

प० । कृतं त्रेतायुगं च एव द्वापरं कलिः एव च राज्ञः वृत्तानि सर्वाणि राजा हि युगं उच्यते ॥

१ नाब्राह्मणेनानाश्रयेश्रीरस्तीविप्ररोहितापिशोषमेति नचयुगानुरूपेणकर्माणिफलंतीतिराज्ञोदासीतव्यम् ॥

यो० । कृतं-चपुनः त्रेतायुगं-द्वापरं चपुनः कलिः एतानि सर्वाणि राज्ञः वृत्तानि भवंति हि (हेतौ) राजा मन्वादिभिः युगं उच्यते ॥

भा० । ता० । सतयुग त्रेता द्वापर और कलियुग ये सब चारोंयुग राजाकेही आचरण विशेष हैं इसीसे मनुआदिकों ने राजाको युगकहा है-और इनचेष्टाओं को करताहुआ राजा तिस २ युगका रूप होता है २०१ ॥

कलिःप्रसुप्तोभवतिसजाग्रद्द्वापरंयुगम्।कर्मस्वभ्युद्यतस्त्रेताविचरंस्तुकृतंयुगम् ३०२ ॥

प० । कलिः प्रसुप्तः भवति सः जाग्रत् द्वापरं युगं कर्मसु अभ्युद्यतः त्रेता विचरन् तु कृतं युगम् ॥

यो० । प्रसुप्तः सः राजा कलिः-जाग्रत् द्वापरंयुगं-कर्मसु अभ्युद्यतः त्रेता-विचरन् सः कृतंयुगं भवति ॥

भा० । उद्यमरहित राजा कलियुग-और जानकरभी कार्योंका न करनेवाला द्वापर और कार्योंका उद्योगी त्रेता-और कार्यों को करताहुआ अपने देश में विचरनेवाला सत्ययुग होताहै ॥

ता० । जब राजा सोता है अर्थात् अज्ञान आलस्य आदिसे उद्यमको नहीं करताहै उस समय कलियुग होताहै और जब जागताहै अर्थात् जानकर भी कर्मोंको नहीं करताहै उस समय द्वापर-और जब कार्योंके करने में उद्योगी होता है उससमय त्रेता-और जब शास्त्रोक्तरीति से कार्यों को करताहुआ अपने देशमें विचरता है उससमय सत्ययुग-रूपहोताहै-इससे यहकहा कि राजा कार्यों के करने में तत्पररहै कुछ वास्तविक कलियुगादि रूपही राजाको वर्णन नहींकिया ३०२ ॥

इन्द्रस्यार्कस्यवायोश्चयमस्यवरुणस्यच।चन्द्रस्याग्नेःपृथिव्याश्चतेजोवृत्तंनृपश्चरेत् ३०३

प० । इन्द्रस्य अर्कस्य वायोः च यमस्य वरुणस्य च चन्द्रस्य अग्नेः पृथिव्याः च तेजोवृत्तं नृपः चरेत् ॥

यो० । नृपः इन्द्रस्य-अर्कस्य-वायोः-यमस्य चपुनः वरुणस्य-चन्द्रस्य-अग्नेः चपुनः पृथिव्याः तेजोवृत्तं चरेत् ॥

भा० । ता० । इन्द्र-सूर्य-वायु-यमराज-वरुण-चन्द्रमा-अग्नि और पृथिवी-इनआठोंके तेज से युक्त आचरण को राजाकरै अर्थात् इनके कर्त्तव्योंके अनुसार वर्ते कि ३०३ ॥

वार्षिकांश्चतुरोमासान्यथेन्द्रोऽभिप्रवर्षति।तथाभिवर्षेत्स्वंराष्ट्रंकामैरिन्द्रव्रतंचरन् ३०४

प० । वार्षिकान् चतुरः मासान् यथा इंद्रः अभिप्रवर्षति तथा अभिवर्षेत् स्वं राष्ट्रं कामैः इंद्रव्रतं चरन् ॥

यो० । इन्द्रव्रतं चरन् राजा-यथा इंद्रः वार्षिकान् चतुरः मासान् अभिप्रवर्षति तथा स्वंराष्ट्रं कामैः अभिवर्षेत्-प्रजा कामान् पूरयेत् इत्यर्थः ॥

भा० । ता० । कंटकों के उद्धार करने से प्रताप और अनुरागसे इसप्रकार इन्द्रके समान आचरणकरै कि-जैसे श्रावणआदि वर्षा के चारमासों में सस्यआदिकी सिद्धिकेलिये वर्षताहै इन्द्रचरित को करताहुआ राजा भी इसीप्रकार अपनेदेशको कामनाओं से पूर्णकरै ३०४ ॥

अष्टौमासान्यथादित्यस्तोयंहरतिरश्मिभिः।तथाहरेत्करंराष्ट्रान्नित्यमर्कव्रतंहितत् ३०५

प० । अष्टौ मासान् यथा आदित्यः तोयं हरति रश्मिभिः तथा हरेत् करं राष्ट्रात् नित्यं अर्कव्रतं हि तत् ॥

यो० । यथा आदित्यः अष्टौ मासान् रश्मिभिः तोयंहरति तथा राजा राष्ट्रात् नित्यं करं हरेत्-तत् हि (निश्चयेन) अर्कव्रतं भवति ॥

भा० । ता० । जैसे सूर्य आठमासपर्यंत अपनी किरणोंसे जलको हरता (पीता) है इसीप्रकार राजा भी अपने देशमेंसे नित्य करका ग्रहणकरै यह अर्कव्रत होता है अर्थात् सूर्यके समान आचरण करता है ३०५ ॥

प्रविश्यसर्वभूतानियथाचरतिमारुतः। तथाचारैःप्रवेष्टव्यंव्रतमेतद्धिमारुतम् ३०६ ॥

प० । प्रविश्य सर्वभूतानि यथा चरति मारुतः तथा चारैः प्रवेष्टव्यं व्रतं एतत् हि मारुतम् ॥

यो० । यथा सर्वभूतानि प्रविश्य मारुतः चरति तथा राज्ञा चारैः प्रवेष्टव्यं एतत् मारुतं व्रतं भवति ॥

भा० । ता० । जैसे प्राणरूपवायु सबप्राणियोंके भीतर प्रविष्ट होकर विचरताहै इसीप्रकार राजा भी अपने और पराये मण्डलों में अपने कर्त्तव्यों के ज्ञानार्थ प्रवेशकरै यह मारुत (पवन) का व्रत होता है ३०६ ॥

यथायमःप्रियद्वेष्यौप्राप्तेकालेनियच्छति। तथाराज्ञानियन्तव्याःप्रजास्तद्धियमव्रतम् ३०७

प० । यथा यमः प्रियद्वेष्यौ प्राप्ते काले नियच्छति तथा राज्ञा नियंतव्याः प्रजाः तत् हि यमव्रतम् ॥

यो० । यथा यमः काले प्राप्तेसति प्रियद्वेष्यौ नियच्छति तथा राज्ञा प्रजाः नियंतव्याः हि (निश्चयेन) तत् यमव्रतं भवति ॥

भा० । ता० जैसे यमराज अपने शत्रु और मित्रोंको अर्थात् अपने निंदक और पूजकों को काल की प्राप्ति (मरण) के समय दंड देता है अर्थात् मारता है इसीप्रकार राजा भी अपराध के समय शत्रु और मित्रभावको छोडकर प्रजाको दंडदे यही राजाका यमव्रत है ३०७ ॥

वरुणेनयथापाशैर्बद्धएवाभिदृश्यते। तथापापान्निगृह्णीयाद्व्रतमेतद्धिवारुणम् ३०८ ॥

प० । वरुणेन यथा पाशैः बद्धः एव अभिदृश्यते तथा पापान् निगृह्णीयात् व्रतं एतत् हि वारुणम् ॥

यो० । यथा वरुणेन पाशैः बद्धः एव जनः दृश्यते तथा राजा पापान् निगृह्णीयात् हि एतत् वारुणं व्रतं भवति ॥

भा० । ता० । जो मनुष्य वरुणकी पाश (रज्जु) से बांधनेयोग्य है उसको वरुणपाशमें बँधेहुये कोही देखता है इसीप्रकार राजा पापी मनुष्यों को शंकाहीन होकर तबतक शिक्षादे जबतक पापसे निवृत्तनहों–यह वारुण व्रत होता है ३०८ ॥

परिपूर्णंयथाचन्द्रंदृष्ट्वाहृष्यन्तिमानवाः।तथाप्रकृतयोयस्मिन्सचान्द्रव्रतिकोनृपः ३०९॥

प० । परिपूर्णं यथा चन्द्रं दृष्ट्वा हृष्यन्ति मानवाः तथा प्रकृतयः यस्मिन् सः चांद्रव्रतिकः नृपः ॥

यो० । यथा परिपूर्णं चन्द्रं दृष्ट्वा मानवाः हृष्यन्ति तथा यस्मिन् दृष्टे सति प्रकृतयः हृष्यन्ति स नृपः चांद्रव्रतिकः भवति॥

भा० । ता० । जिसप्रकार परिपूर्ण चन्द्रमा को देखकर मनुष्य प्रसन्न होते हैं–इसी प्रकार जिस राजा को देखकर सम्पूर्णप्रजा प्रसन्नहो वहराजा चन्द्रव्रतवालाहै अर्थात् चन्द्रमाके समानहै ३०९ ॥

प्रतापयुक्तस्तेजस्वीनित्यंस्यात्पापकर्मसु। दुष्टसामन्तहिंस्रश्चतदाग्नेयंव्रतंस्मृतम् ३१० ॥

प० । प्रतापयुक्तः तेजस्वी नित्यं स्यात् पापकर्मसु दुष्टसामन्तहिंस्रः च तत् आग्नेयं व्रतं स्मृतम् ॥

यो० । राजा पापकर्मसु नित्यं प्रतापयुक्तः तेजस्वी–चपुनः दुष्टसामन्तहिंस्रः स्यात् तत् व्रतं आग्नेयं स्मृतम् (कथितम्)

भा० । ता० । पापकर्ता मनुष्यों को सदा दंडदेकर प्रतापी और तेजस्वी (आलस्यहीन) राजा रहै और प्रतिकूल मन्त्रियों की हिंसा में तत्पररहै यह राजाका अग्निसम्बन्धी व्रत है ३१० ॥

यथासर्वाणिभूतानिधराधारयतेसमम् । तथासर्वाणिभूतानिबिभ्रतःपार्थिवंव्रतम् ३११

प० । यथा सर्वाणि भूतानि धरा धारयते समं तथा सर्वाणि भूतानि बिभ्रतः पार्थिवं व्रतम् ॥

यो० । यथा सर्वाणि भूतानि धरा समं धारयते तथा सर्वाणि भूतानि बिभ्रतः राज्ञः पार्थिवं व्रतं भवति ॥

भा० । ता० । जैसे पृथिवी छोटे बड़े स्थावर जंगम ऊंचे नीचे सब भूतोंको सम रीतिसे धारती है उसीप्रकार जो राजा संपूर्ण विद्वान्, धनी, गुणियोंको और दीन अनाथ भूतोंकी धनदेने आदि से पालना करताहै वह राजा पार्थिव व्रत (पृथ्वी के समान आचरण करनेवाला) कहाता है ३११ ॥

एतैरुपायैरन्यैश्चयुक्तोनित्यमतन्द्रितः । स्तेनान्राजानिगृह्णीयात्स्वराष्ट्रेपरएवच ३१२॥

प० । एतैः उपायैः अन्यैः च युक्तः नित्यं अतंद्रितः स्तेनान् राजा निगृह्णीयात् स्वराष्ट्रे परे एव च ॥

यो० । एतैः उपायैः चपुनः अन्यैः नित्यं युक्तः अतंद्रितः राजा स्वराष्ट्रे चपुनः परेराष्ट्रे स्तेनान् निगृह्णीयात् (दंडयात्)॥

भा० । ता० । इन पूर्वोक्त उपायों से और अपनी बुद्धिसे विचारेहुये अन्य उपायोंसे संयुक्त और आलस्य हीन राजा अपने देशमें वसतेहुये चोरोंका और जो अन्यके देशमें वसकर राजाके देश को आकर लूटतेहों उन सब चोरोंका प्रतिदिन निग्रहकरै अर्थात् दंडदे ३१२ ॥

परामप्यापदंप्राप्तोब्राह्मणान्नप्रकोपयेत् । तेह्येनंकुपिताहन्युःसद्यःसबलवाहनम् ३१३॥

प० । परां अपि आपदं प्राप्तः ब्राह्मणान् न प्रकोपयेत् ते हि एनं कुपिताः हन्युः सद्यः सबलवाहनम्॥

यो० । परां आपदं अपि प्राप्तः राजा ब्राह्मणान् न प्रकोपयेत् हि (यतः) कुपिताः ते ब्राह्मणाः सबलवाहनं एनं (राजानं) सद्यः हन्युः ॥

भा० । ता० । कोशके क्षय आदि से परम आपत्तिको प्राप्तहुआ भी राजा ब्राह्मणों को कुपित न करै क्योंकि कोपको प्राप्तहुये वे ब्राह्मण, सेना, और वाहन सहित इस राजाको शाप आदि देकर शीघ्रही नष्ट करदेते हैं ३१३ ॥

यैःकृतःसर्वभक्ष्योऽग्निरपेयश्चमहोदधिः । क्षयीचाप्यायितःसोमःकोननश्येत्प्रकोप्यतान् ३१४

प० । यैः कृतः सर्वभक्ष्यः अग्निः अपेयः च महोदधिः क्षयी च आप्यायितः सोमः कः न नश्येत् प्रकोप्य तान् ॥

यो० यैः ब्राह्मणैः अग्निः सर्वभक्ष्यः चपुनः महोदधिः अपेयः कृतः चपुनः क्षयी सोमः आप्यायितः कृतः तान् प्रकोप्य कः न नश्येत् अपितु सर्वोपि नश्येत् इत्यर्थः ॥

भा० । ता० । जिन ब्राह्मणों ने अग्निको सर्व भक्षक समुद्रकोपीनेके अयोग्य करदिया और क्षय से नष्टहुये चंद्रमाको पुनः पूरितकरदिया अर्थात् उसके क्षयरोगको दूरकरदिया ऐसे ब्राह्मणोंको कोप कराकर ऐसा कौनहै जो नष्ट न होय ३१४ ॥

लोकानन्यान्सृजेयुर्येलोकपालांश्चकोपिताः । देवान्कुर्युरदेवांश्चकःक्षिण्वंस्तान्समृध्नुयात् ३१५

प० । लोकान् अन्यान् सृजेयुः ये लोकपालान् च कोपिताः देवान् कुर्युः अदेवान् च कः क्षिण्वन् तान् समृध्नुयात् ॥

यो० । ये ब्राह्मणाः कोपिताः संतः अन्यान् लोकान् चपुनः लोकपालान् सृजेयुः चपुनः देवान् अदेवान् कुर्युः तान् क्षिण्वन् सन् कः समृध्नुयात्—न कोपीत्यर्थः ॥

भा०। ता०। कोपको प्राप्तहुये जो ब्राह्मण, लोक और लोकपालोंको अन्य (दूसरे) रच सक्ते हैं अर्थात् ब्रह्माकी रचनासे दूसरीरचना बनासक्ते हैं और देवताओंको मनुष्य कर सक्ते हैं ऐसे ब्राह्मणों को पीड़ादेकर कौन पुरुष वृद्धिको प्राप्त होसका है अर्थात् कोई नहीं होसका ३१५॥

यानुपाश्रित्यतिष्ठन्तिलोकादेवाश्चसर्वदा। ब्रह्मचैवधनंयेषांकोहिंस्यात्तान्जिजीविषुः३१६॥

प०। यान् उपाश्रित्य तिष्ठन्ति लोकाः देवाः च सर्वदा ब्रह्म च एव धनं येषां कः हिंस्यात् तान् जिजीविषुः॥

यो०। यान् ब्राह्मणान् उपाश्रित्य लोकाः चपुनः देवाः सर्वदा तिष्ठंति चपुनः येषां धनं ब्रह्म (वेदः) अस्ति कः जिजीविषुः तान् ब्राह्मणान् हिंस्यात् न कोपीन्यर्थः॥

भा०। ता०। यज्ञकरने और करानेवाले जिन ब्राह्मणों के आश्रयसे संपूर्ण पृथिवी आदि लोक और इंद्र आदि देवता टिकतेहैं और जिनका धन भी वृद्धिका कारण होनेसे वेदही है अर्थात् यज्ञ आदि कराने से जो वेदद्वाराही धनसंचय करते हैं ऐसे ब्राह्मणों की हिंसाको ऐसा कौन है जो जीवन का अभिलाषी होकर करेगा—इससे यह न समझे कि विद्वान् ब्राह्मणकीही सेवाकरै क्योंकि ३१६॥

अविद्वांश्चैवविद्वांश्चब्राह्मणोदैवतंमहत्। प्रणीतश्चाप्रणीतश्चयथाग्निर्दैवतंमहत् ३१७॥

प०। अविद्वान् च एव विद्वान् च ब्राह्मणः दैवतं महत् प्रणीतः च अप्रणीतः च यथा अग्निः दैवतं महत्॥

यो०। यथा प्रणीतः (आहितः) चपुनः अप्रणीतः अग्निः महत् दैवतं भवति—तथा अविद्वान् चपुनः विद्वान् ब्राह्मणः महत् दैवतं भवति॥

भा०। ता०। शास्त्रोक्त विधिसे स्थापनकीहुई वा नहीं स्थापनकीहुई अग्नि जैसे महान्देवता होती है इसप्रकार मूर्ख अथवा पण्डित ब्राह्मण भी परम देवतारूप होता है—इससे किसी प्रकारके ब्राह्मण का भी अपमान न करै ३१७॥

श्मशानेष्वपितेजस्वीपावकोनैवदुष्यति। हूयमानश्चयज्ञेषुभूयएवाभिवर्द्धते ३१८॥

प०। श्मशानेषु अपि तेजस्वी पावकः न एव दुष्यति हूयमानः च यज्ञेषु भूयः एव अभिवर्द्धते॥

यो०। तेजस्वी पावकः श्मशानेषु अपि नैव दुष्यति यज्ञेषु हूयमानः भूयः एव अभिवर्द्धते॥

भा०। ता०। तेजवाला अग्नि श्मशान में शवको दग्धकरताहुआ भी दूषित नहींहोता अर्थात् उसही अग्निमें यज्ञका होम कियाजाय तो पुनःवृद्धि को प्राप्तहोजाता है—इसीप्रकार अनिष्टकर्मों में वर्त्तमानभी ब्राह्मणों की सदैव पूजाकरै ३१८॥

एवंयद्यप्यनिष्टेषुवर्तन्तेसर्वकर्मसु। सर्वथाब्राह्मणाःपूज्याःपरमंदैवतंहितत् ३१९॥

प०। एवं यद्यपि अनिष्टेषु वर्तन्ते सर्वकर्मसु सर्वथा ब्राह्मणाः पूज्याः परमं दैवतं हि तत्॥

यो०। यद्यपि ब्राह्मणाः एवं अनिष्टेषु सर्वकर्मसु वर्त्तंते तथापि ब्राह्मणाः सर्वथा पूज्याःभवंति—हि (यतः) तत् (ब्राह्मण रूपं) परमं दैवतं अस्ति॥

भा०। ता०। यद्यपि ब्राह्मण कुत्सितकर्मोंको चाहेकरें तथापि सबप्रकारसे पूजनेयोग्यहैं क्योंकि वे ब्राह्मण परमदेवतारूपहैं—इसवचनको ब्राह्मणोंकी स्तुतिका बोधकहोनेसे यथाश्रुतअर्थमें विरोधकी शंका न करनी ३१९॥

क्षत्रस्यातिप्रवृद्धस्यब्राह्मणान्प्रतिसर्वशः । ब्रह्मैवसंनियन्तृस्यात्क्षत्रंहिब्रह्मसंभवम् ३२०

प० । क्षत्रस्य अतिप्रवृद्धस्य ब्राह्मणान् प्रति सर्वशः ब्रह्म एव संनियंतृ स्यात् क्षत्रं हि ब्रह्मसंभवम् ॥

यो० । ब्राह्मणानप्रति अतिप्रवृद्धस्य सर्वशः क्षत्रस्य–संनियंतृ ब्रह्म (ब्राह्मणः) एवस्यात्हि (यतः) क्षत्रं ब्रह्मसंभवं भवति ॥

भा० । ता० । ब्राह्मणों की पीडामें प्रवृत्तहुये क्षत्रियके नियामक अर्थात् शाप वा अभिचार से शिक्षा वा दंडके दाता ब्राह्मणही होतेहैं क्योंकि ब्राह्मणोंसेही क्षत्रियकी उत्पत्तिहुईहै अर्थात् ब्रह्माकी भुजा से उत्पन्नहुये क्षत्रिय का ब्राह्मणही शिक्षकहै ३२० ॥

अद्भ्योऽग्निर्ब्रह्मतःक्षत्रमश्मनोलोहमुत्थितम् । तेषांसर्वत्रगंतेजःस्वासुयोनिषुशाम्यति ३२१

प० । अद्भ्यः अग्निः ब्रह्मतः क्षत्रं अश्मनः लोहं उत्थितं तेषां सर्वत्रगं तेजः स्वासु योनिषु शाम्यति

यो० । अद्भ्यः अग्निः–ब्रह्मतः क्षत्रं–अश्मनः लोहं–उत्थितं–सर्वत्रगं तेषां तेजः स्वासुयोनिषु शाम्यति ॥

भा० । जल–ब्राह्मण–पाषाण–इनसे अग्नि–क्षत्रिय और लोहा क्रमसे उत्पन्न होते हैं और सर्वत्र इनका तेज कार्यकारी होताहै परंतु अपने पैदाकरनेवाले पूर्वोक्तों में शांत होजाता है अर्थात् कार्यकारी नहीं होता ॥

ता० । जलसे अग्निकी–ब्राह्मण से क्षत्रियकी–और अश्म (पत्थर) से लोहे (शस्त्रों) की उत्पत्ति होतीहै–इनका जो तेज सर्व व्यापि अर्थात् सर्वत्र दहन अभिभवच्छेदन आदि कार्योंको करता हैं परंतु इनके जो कारण जल और ब्राह्मण–पाषाणों में दहन–अभिभवच्छेदनरूप कार्य को नहीं करता–अर्थात् अग्नि सबको दग्ध करसक्ती है परंतु जलमें स्वयं शांत होजाती है इसीप्रकार क्षत्री सबका अभिभव करताहै परंतु ब्राह्मणका तिरस्कार करनेसे स्वयं नष्ट होजाताहै इसीप्रकार लोहे के शस्त्र सबको छेदन करतेहैं परंतु पाषाणमें स्वयं कुंठित होजातेहैं ३२१ ॥

नाब्रह्मक्षत्रमृध्नोतिनाक्षत्रंब्रह्मवर्द्धते । ब्रह्मक्षत्रंचसंपृक्तमिहचामुत्रवर्द्धते ३२२ ॥

प० । न अब्रह्म क्षत्रं ऋध्नोति न अक्षत्रं ब्रह्म वर्द्धते ब्रह्म क्षत्रं च संपृक्तं इह च अमुत्र वर्द्धते ॥

यो० । अब्रह्म क्षत्रं न ऋध्नोति अक्षत्रं ब्रह्म न वर्द्धते चपुनः संपृक्तं ब्रह्म क्षत्रं इह चपुनः अमुत्र वर्द्धते ॥

भा० । ब्राह्मणके विना–क्षत्रिय और क्षत्रियके विना ब्राह्मण नहीं बढ़सक्ता और मिलेहुये ब्राह्मण और क्षत्री दोनों लोकोंमें बढ़तेहैं ॥

ता० । ब्राह्मणके विना क्षत्रिय वृद्धिको प्राप्त नहीं होता अर्थात् ब्राह्मणके विना शांतिक और पुष्टि के जनक कर्म और व्यवहार का दर्शन आदि धर्म के न होनेसे क्षत्रीके प्रताप वृद्धि नहीं होती इसी प्रकार क्षत्रियके विना ब्राह्मणकी वृद्धि नहीं होती–क्योंकि क्षत्रीकी रक्षाके विना याग आदि कर्म ब्राह्मण स्वतंत्र होकर नहीं करसक्ता–और परस्पर मिलेहुयेही ब्राह्मण और क्षत्रिय पूर्वोक्त कर्मकी संपत्तिसे धर्म–अर्थ–काम–मोक्ष की प्राप्ति के द्वारा इसलोक और परलोक में वृद्धिको प्राप्तहोतेहैं–दंडप्रकरणमें यह ब्राह्मणकी स्तुति इसलिये है कि यदि ब्राह्मणही राजाहोय तो भी ब्राह्मण को लघु दंड दे ३२२ ॥

दत्त्वाधनंतुविप्रेभ्यःसर्वदण्डसमुत्थितम् । पुत्रेराज्यंसमासृज्यकुर्वीतप्रायणंरणे ३२३ ॥

प० । दत्त्वा धनं तु विप्रेभ्यः सर्वं दंडसमुत्थितं पुत्रे राज्यं समासृज्य कुर्वीत प्रायणं रणे ॥

यो० । विप्रेभ्यः दंडसमुत्थितं सर्वं धनं दत्त्वा पुत्रे राज्यं समासृज्य राजा–रणे प्रायणं (मरणं) कुर्वीत ॥

भा० । राजा मरणकी समीप अवस्था में दंडसे पैदाहुये संपूर्ण धनको ब्राह्मणोंके अर्पण और राज्यको पुत्रके अर्पण करके रणमें प्राणोंको त्यागे ॥

ता० । जिससमय राजाको उत्तम ज्ञानहो अथवा चिकित्साके अयोग्य व्याधि होजाय उससमय मृत्युको समीप देखकर महापातकी के दंडसे भिन्न जो संपूर्ण दंडका धन उसको ब्राह्मणों के अर्पण करके और पुत्रको राज्यका भार देकर उत्तम फलकी प्राप्तिके लिये संग्राम में अपने प्राणोंका त्याग राजाकरै यदि संग्राम न होय तो अनशन व्रतसे अर्थात् भोजनको त्यागकर प्राणोंको त्यागे ३२३ ॥

एवंचरन्सदायुक्तोराजधर्मेषुपार्थिवः।हितेषुचैवलोकस्यसर्वान्भृत्यान्नियोजयेत् ३२४ ॥

प० । एवं चरन् सदा युक्तः राजधर्मेषु पार्थिवः हितेषु च एव लोकस्य सर्वान् भृत्यान् नियोजयेत् ॥

यो० । राजधर्मेषु सदा युक्तः पार्थिवः एवं चरन्सन् लोकस्य हितेषु सर्वान् भृत्यान् नियोजयेत् ॥

भा० । ता० । इसप्रकार पूर्वोक्त राजधर्मों के अनुसार सदैव यत्नसे आचरण करताहुआ राजा अपने भृत्योंको संपूर्ण जगत्के कल्याण में नियुक्तकरै ३२४ ॥

एषोऽखिलःकर्मविधिरुक्तोराज्ञःसनातनः। इमंकर्मविधिंविद्यात्क्रमशोवैश्यशूद्रयोः ३२५

प० । एषः अखिलः कर्मविधिः उक्तः राज्ञः सनातनः इमं कर्मविधिं विद्यात् क्रमशः वैश्यशूद्रयोः ॥

यो० । अखिलः सनातनः राज्ञः एषः कर्मविधिः उक्तः वैश्यशूद्रयोः क्रमशः कर्मविधिं इमं विद्यात् ॥

भा० । ता० । यह संपूर्ण राजाके कर्मोका सनातन (परंपरासे आगत) कर्त्तव्य वर्णन किया– और वैश्य शूद्रके इस कर्म विधानको क्रमसे तुम सुनो ३२५ ॥

वैश्यस्तुकृतसंस्कारःकृत्वादारपरिग्रहम्। वार्तायांनित्ययुक्तःस्यात्पशूनांचैवरक्षणे ३२६

प० । वैश्यः तु कृतसंस्कारः कृत्वा दारपरिग्रहं वार्तायां नित्ययुक्तः स्यात् पशूनां च एव रक्षणे ॥

यो० । कृतसंस्कारः वैश्यः दारपरिग्रहं कृत्वा वार्तायां चपुनः पशूनां रक्षणे नित्ययुक्तः स्यात् ॥

भा० । ता० । हुये हैं यज्ञोपवीत आदि संस्कार जिसके ऐसा वैश्य विवाहको करके वार्ता (कृषि गो रक्षा आदि) में और विशेषकर पशुओं की रक्षामें सदैव युक्त रहै ३२६ ॥

प्रजापतिर्हिवैश्यायसृष्ट्वापरिददेपशून्। ब्राह्मणायचराज्ञेचसर्वाःपरिददेप्रजाः ३२७ ॥

प० । प्रजापतिः हि वैश्याय सृष्ट्वा परिददे पशून् ब्राह्मणाय च राज्ञे च सर्वाः परिददे प्रजाः ॥

यो० । हि (यतः) प्रजापतिः पशून् सृष्ट्वा वैश्याय परिददे ब्राह्मणाय चपुनः राज्ञे सर्वाः प्रजाः सृष्ट्वापरिददे ॥

भा० । ता० । क्योंकि ब्रह्माने पशुओंको रचकर रक्षाके लिये वैश्यको दिया इससे वैश्य पशुओं की रक्षा अवश्य करै और ब्राह्मणको और क्षत्रियको और रचना करके संपूर्ण प्रजाको दिया इससे ब्राह्मण राजा दोनों मिलकर संपूर्ण प्रजाकी रक्षाकरें ३२७ ॥

नचवैश्यस्यकामःस्यान्नरक्षेयंपशूनिति। वैश्येचेच्छतिनाऽन्येनरक्षितव्याःकथंचन ३२८

